Digitized by Madhuban Trust, Delhi

अक्षपादीयः

गौतमीयापरसूत्रप्रकाशः

(निदानसूत्रं तथा व्याख्यासहितः)

AKSHAPADIYAH
GOUTAMIYAPARASUTRAPRAKASHAH

(With Commentary and Indices)

संग्राहकः

विद्वान् ॥ प्रकाश सुब्राय भट्टः, कोलगि, शिरलगि,

सिद्दापुर–मण्डलम्, कर्नाटक–राज्यम्

५८१३५५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अक्षपादीयः

गौतमीयापरसूत्रप्रकाशः

(निदानसूत्रं तथा व्याख्यासहितः)

AKSHAPADIYAH

GOUTAMIYAPARASUTRAPRAKASHAH

(With Commentary and Indices)

संग्राहकः

विद्वान् ॥ प्रकाश सुब्राय भट्टः, कोलगि, शिरलगि,

सिद्दापुर–मण्डलम्, कर्नाटक–राज्यम्

५८१३५५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रन्थनाम – गौतमीयापरसूत्रप्रकाशः

सम्पादकः + अक्षरसंयोजकः

विद्वान्. प्रकाश सुब्राय भट्टः, कोलगि

प्रथममुद्रणम् – २०१२

पृष्ठसङ्ख्या – १८०+२२

प्रतिकृतयः – ५००

मूल्यम् – १०० रूप्यकाणि

वर्षम् – २०१२

ग्रन्थः प्रकाशकसङ्केते लेखकसङ्केते च उपलभ्यते ।

मुद्रकः – वागर्थ, न.रा.कालोनी, बेङ्गलूरु – ५६० ०१९

ग्रन्थस्य प्रकाशकः – राणायनीयसंशोधनाप्रतिष्ठानम्

18.01.26/5B, Dwarakanagar
Tirupati – 517 507 K.T. Road
M0-9951051209

ग्रन्थसम्पादकः –

विद्वान्. प्रकाश सुब्राय भट्टः
कोलगि, पो–शिरलगि,
सिद्दापुर उपमण्डलम्, ५८१३५५
उत्तरकन्नडमण्डलम् । दूरभाषा– 08389-231172

ISBN 978-93-5087526-1

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ सम्पादकीया वाणी ॥

कल्पसूत्रे गृह्यसूत्रविभागे गृह्यकर्म इव अपरकर्माण्यपि प्रधानान्येव । तानि कर्माणि निर्दिशति आचार्यगौतमः गौतमीयापर-सूत्रनाम्ना रचितस्य ग्रन्थस्य द्वारा ।

परमधुना नोपलभ्यते यतो हि गीर्वाणलिप्या कदापि न मुद्रितः । ग्रन्थाक्षरेण द्रविडप्रान्ते प्राचीनपुस्तकमासीत् । इदं सवृत्ति वरहूरु श्रीकृष्णस्वामिश्रौतिभिः पुरा मुद्रापितमिति म.रामनाथदीक्षितमहाभागः स्वीयसामसारसर्वस्वे लिलेख । तदिदानीं न लभ्यते एव । पुरा अस्मद्गुरवः वेदमूर्ति श्री हारूरिसुब्रायसत्यनारायणभट्टमहोदयाः द्रविडदेशं गत्वा तत्र म.रामनाथदीक्षितमहाभागस्य साहाय्येन अनतिकाले एव ग्रन्थाक्षराण्यधीत्य संस्कृतलिप्या लिखित्वा आनीय स्वशिष्यान् अध्यापितवन्तः । अयं ग्रन्थः स्मार्तविद्वत्कक्षायां ('आचार्य'समायाम्) पथरूपेणापि विद्यते । परन्तु कुत्रापि न लभ्यते एव । अतः बहुपरिश्रमेण तमिलुग्रन्थाक्षरैः स्थितममुं ग्रन्थं सम्यक् परिशोध्य सङ्गृहीतं विद्यते ॥ अस्मिन् कार्ये मम गुरवः वेदमूर्ति. श्री सुब्रायसत्यनारायणभट्ट, हारूरि, गोकर्ण एषां प्रेरणा मार्गदर्शनं च सर्वदा अस्त्येव । यतोहि सामवेदस्य मन्त्रभागस्य तथा गृह्य-अपर-धर्मसूत्रादीनां पूर्वापरप्रयोगस्य च अध्ययनं तेषां सन्निधावेव मया कृतम् ।

तेषामन्तेवासिषु अन्यतमोऽहमध्ययनकाले एव गुरुभिरादिष्टः - तेषां मनीषामिदानीं साक्षात्कुर्वन्नस्मि । तथा च आहिताग्नेः पात्रासादनविशेषस्तु पतञ्जलिना स्वनिदानसूत्रे सुविहितत्वात् तथा तद्भागेनैव गौतमीयापरसूत्रं परिपूर्णं भवतीति विचिन्त्य तद्भागं (पातञ्जलिनिदानसूत्रस्य द्वितीयप्रपाठकस्य षष्ठाध्यायमपि) विवरणसहितं सङ्गृहीतं विद्यते । निदानसूत्रस्यास्य खण्डस्य तथा गौतमीयापरसूत्रस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च विवरणं (भाष्यं) श्रीमता विदुषा अल्लालभट्टेन कृतमस्ति । अत्र **भाष्य(विवरण)सहितापरसूत्राणि** आदौ दत्त्वा ततः **निदानसूत्रं, अपरसूत्रपाठः, सूत्रोक्तमन्त्राणां सङ्ग्रहः** तथा **सूत्रानुक्रमणिकापि** दत्ता विद्यते । तथा च निदानसूत्रेणास्य अपरसूत्रस्य सम्यक् प्रकाशो भवतीति धिया **गौतमीयापरसूत्रप्रकाशः** इति नामाङ्कनमपि दत्तं विद्यते । तथा आदावेव विस्तरेण ग्रन्थस्यास्य समग्रविवरणम् **अपरसूत्र-ग्रन्थान्तरङ्गम्** इत्यस्मिन् भागे संस्कृतम् आङ्लञ्चेति (संस्कृतभाषा-परिचयरहितानामपि ग्रन्थस्यास्यावबोधायाङ्लभाषया) भाषाद्वयेन निबद्धम् अस्ति । ततः विषयसूची दत्ता विद्यते ।

अस्मिन् संयोजितनिदानसूत्रस्य सङ्गृहे परिशोधने च मद्रपुरीनिवासी वेदमूर्तिः नागराजश्रौतिमहाभागः बहुधा उपकारं सकाले अकरोत् । दोषानपि परिशोध्य अदात् । सकाले बेङ्गलूरुनिवासी वेदमूर्तिः श्री रविनारायणशर्ममहोदयोऽपि मार्गदर्शनं अकरोत् । अतः तौ द्वावपि अस्मिन् समये कृतज्ञताप्रदर्शनपूर्वकं सनमोवाकं स्मरामि । तथा मम अनुजं वेदमूर्तिं श्री हरीशशर्माणम्, अस्य प्रकाशने बहुधा सहकृतवन्तं मम अन्तेवासिनं वेदमूर्तिं श्री गिरिजाप्रसादषडङ्गिनमपि अस्मिन् समये स्मरामि । वेदमाता अनयोः कृते योग्यं भविष्यं प्रसादयतु इति तामेव प्रार्थये । तथा अस्य ग्रन्थस्य मुद्रणकार्ये अतीव आदरेण दायित्वं स्वीकृतवते संस्कृतभारतीसंस्थायाः पदाधिकारिणे श्री च.मू.कृष्णशास्त्रिणे धन्यवादं समर्पयामि ।

अक्षरसंयोजनं कृत्वा परिष्कृतममुं **"गौतमीयापरसूत्रप्रकाश"**-नामकं ग्रन्थम् अस्मिन् कार्ये प्रेरकेभ्यः अस्मद्गुरूणां **वेदमूर्तिनां श्री हारूरिसुब्राय्सत्यनारायणभट्टपादानां** चरणारविन्देभ्यः ससम्भ्रमं सहर्षं सादरं समर्पये ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सामशाखिनः अमुं ग्रन्थं सादरमस्मदीयमिति अङ्गीकुर्युः, अध्ययनादिना उपकृताश्च भवेयुः, तदा एव मम श्रमः सार्थको भूयादिति आशास्य, विद्वांसः अमुं ग्रन्थं परिशील्य अस्मिन् पुस्तके स्थितौ गुणदोषौ न्यूनातिरेकञ्च संसूच्य ममापि ज्ञानवृद्धौ सहायं कुर्वन्त्विति तान् सम्प्रार्थ्य, अस्मिन् कार्ये (मयि प्रवृत्तिमुत्पाद्य कर्मकरणसामर्थ्यं च दत्त्वा) मह्यमवसरं दत्तवतीं वेदमातरं सामगाचार्यं (सामवेदीय-धर्मसूत्रस्य अपरसूत्रस्य च प्रणेतारम्) महर्षिगौतमञ्च पुनः आदरेण सँवन्द्य, सर्वेभ्यो शर्म यच्छत्विति तावेव सम्प्रार्थ्य विरमामि ॥

सज्जनविधेयः

सम्पादकः

विद्वान् प्रकाशसुब्रायभट्टः

कोलगि, शिरलगि, सिद्दापुरमण्डलम्

कर्नाटकराज्यम्

स्थलम् – कोलगि

दिनाङ्कः – १ .१०.२०१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अपरसूत्रग्रन्थान्तरङ्गम् ॥

वेदाङ्गेष्वन्यतमं कल्पसूत्रम् । गृह्यसूत्रं कल्पसूत्रेऽन्तर्भवति । अपरसूत्रं गृह्यसूत्रस्य भागः एव । गृह्यकर्मणां गृह्यसूत्रं यथाधारभूतं तथैव अपरकर्मणामपरसूत्रम् । जीविनः शरीरान्निर्गमनकालात् प्रागारभ्य जीविने शरीराय च दीयमानसंस्कारविधिं निर्दिशत्यपरसूत्रम् ।

चतुर्षु वेदेष्वन्यतमोऽयं सामवेदः । तच्छाखिनामपरक्रियायाः विधिनियमान् सूचयति आचार्यः गौतमः गौतमीयापरसूत्रग्रन्थद्वारा । यद्यपि आचार्यगौतमः गीर्वाणवाण्या रचितवान्, तथाप्यद्यावधि ग्रन्थोऽयं देवनागरलिपिं नापश्यत् । कर्नाटके हस्तप्रतिकृतिरेव । पुरा "द्रविडदेशे वरहूरुकृष्णस्वामिश्रौतिवर्येण द्रविड(ग्रन्थाक्षर)लिप्या एव मुद्रापितमासीत् दुर्लभमिदानीम्" इति (स्वकीयसामसारसर्वस्वे पृष्ठ १८४ मायूरं म. रामनाथ दीक्षितवर्यः) । तस्मिन् पुस्तके अल्लालभट्टाख्येन विदुषा कृता व्याख्यापि अस्ति । अस्मिन् मुद्रणदोषाः बहवः सन्ति । परमधुना जीर्णतां दशां प्राप, तदपि न लभ्यते एव । सामशाखिनामपरकर्मणाम् आधारभूतः, तथा सामस्मार्तविद्वत्कक्षायां पठ्यत्वेन अधीयमानोऽयं ग्रन्थः नेपथ्यं गमिष्यतीति धिया तस्य सङ्ग्रहार्थं कश्चित् प्रयत्नः कृतः ।

अध्ययनावसरे विद्यागुरूणां (वेदमूर्ति श्री हारूरि सुब्राय **सत्यनारायण भट्ट गोकर्ण**) सविधे स्थितहस्तप्रतिकृतिमनुसृत्यैव अध्ययनम् अकारि । तत्र अनेकस्थले वाक्यसंयोजनमपि दुष्करम् आसीत् । तथा मद्रास्निवासिनः मायूरं म. रामनाथदीक्षितमहोदयस्य कृपया प्राप्तं ग्रन्थाक्षरे मुद्रितपुस्तकमपि गुरवः मह्यं दत्तवन्तः आसन् । हस्तप्रतिकृतौ मुद्रितग्रन्थे च तत्र तत्र स्थितं विभिन्नवाक्यसँयोजनम् अपि अद्राक्षम् । प्रतिकृतिद्वयेऽपि दोषबाहुल्यमासीत् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमपटलस्य द्वितीये खण्डे **आहिताग्निश्चेदेतस्मिन् काले पात्राण्यासाद्य** इति पात्रासादनकालः विहितः । परं कथं ? कुत्र ? इत्यादयः प्रश्नाः मनसि भवन्ति । उत्तरमत्र नास्त्येव । कथं कुत्र इत्यादीनां प्रश्नानां समाधानात्मकं विवरणं महर्षिपतञ्जलिना स्वनिदानसूत्रस्य द्वितीयप्रपाठकस्य षष्ठे खण्डे दत्तमस्ति । गौतमीयापरसूत्रं तथा अस्य निदानसूत्रस्य षष्ठखण्डस्य च न्यूनत्व-पूरणात्मकसम्बन्धमनुलक्ष्य अल्लालभट्टमहोदयः अस्य खण्डस्यापि व्याख्यानमकरोत् । मद्रास्प्रान्ते मुद्रिते पुस्तके अल्लालभट्टीय-व्याख्यासहितः निदानसूत्रस्य द्वितीयप्रपाठकस्य षष्ठः खण्डोऽपि विद्यते । अनेन खण्डेन युक्ते सत्यपरसूत्रस्यास्य परिपूर्णत्वं समग्रत्वं च भवेदिति धिया तदप्यस्मिन् पुस्तके सङ्गृहीतम् ।

ग्रन्थेऽस्मिन् पटलद्वयं, त्रयोदश खण्डाः, चतुर्विंशत्युत्तरत्रिशत-(३२४) सङ्ख्याकानि सूत्राणि च विद्यन्ते । प्रथमे पटले सप्त खण्डाः द्वितीये पटले षट् खण्डाः च सन्ति । प्रथमे पटले मरणपूर्वोत्तरकाले जप्यमानानां मन्त्राणां निर्देशनमारभ्य दशमदिनकृत्यान्तकर्माणि विहितानि । द्वितीये पटले तु मुख्यशरीराभावे अस्थीन्यादायेत्यारभ्य सपिण्डीकरण-श्राद्धविधिपर्यन्तं विहितमस्ति ।

प्रथमः पटलः

प्रथमे खण्डे – मरणकाले जप्यमानानां साम्नां निर्देशः, मरणोत्तरगानमन्त्रः, ततः शरीरस्य क्रियारम्भः, अग्निनिर्णयः, अग्नि-सिद्धिः, स्त्रीणामग्निनिर्णयः, मृतस्यौपासनसिद्धिः आहिताग्नीनां मन्त्रविशेषाश्च दर्श्यन्ते ।

द्वितीये खण्डे – श्मशानदेशं प्रत्याहर्तव्यसम्भाराः, सम्भाराणाम् आहरणक्रमः, श्मशानलक्षणम्, श्मशानदेशशोधनम्, दहनसङ्कल्पः,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्मशानायतननिरीक्षणम्, दहनस्थानशुद्धिः, चितिनिर्माणम्, आहिताग्नि-वपनम्, शवस्नानम्, चितौ समारोपणम्, आस्यादिसप्तस्थानेषु आज्यादिद्रव्यनिक्षेपणम्, आहिताग्नेः पात्रासादनं, वातप्रदानं च खण्डेऽस्मिन् विधीयते ।

तृतीये खण्डे – उदकुम्भधाराक्रमः, शिरसि दर्भेण्वनिधानम्, पवित्रवस्तूनां दर्शनम्, अग्निसंयोजनम्, उपस्थानमन्त्राणां निर्देशः, आज्याहुतयः, शान्तिमन्त्रस्य उपांशुजपः तथा अस्मिन् समये आचार्याय गोदानं च विहितमस्ति ।

चतुर्थे खण्डे – कर्तृसहितैः सर्वैः शोकत्यागः, उदकं प्रति गमनम्, तत्र स्नानम्, वासोदकदानम्, तिलोदकदानम्, प्रतिदिनं वासोदकतिलोदकयोः सङ्ख्या, अनुपेतानां कुमारीणां च व्यवस्था, ज्ञातिभिः कर्तव्यानि, ग्रामगमनम्, गृहद्वारपार्श्वे शिलास्थापनम्, तत्र वासोदकदानं पिण्डदानं च दत्त्वा ब्राह्मणेभ्यः आशीर्ग्रहणमुक्तम् ।

पञ्चमे खण्डे – सञ्चयनकालः, ज्ञातीनां भोजनादिव्यवस्था, दहनाग्नेरेकदेशमानीय प्रतिष्ठापनम्, तत्राग्न्यभावे व्यवस्था, सञ्चयनहोमे वर्ज्यानि होमाङ्गानि, सञ्चयनहोमः, अस्थिप्रक्षालनम्, क्रमेण अस्थि-सङ्ग्रहः, अस्थ्नां कुम्भे प्रक्षेपणम्, पुनः कुम्भे दध्यादीनि निक्षिप्य पञ्चानां नदीनां ध्यानं कृत्वा वृक्षमूले अस्थिकुम्भस्थापनमुक्तम् ।

षष्ठे खण्डे – तत्र श्मशानदेशे अवशिष्टभस्मसमूहनम्, एकत्र करणम्, अवकैराच्छादनम्, तस्योपरि वीरणस्तम्बस्थापनं तस्य फलं च, मृतप्रतिकृतिकरणम्, तस्य पुरतः प्रेताय पिण्डबलिप्रदानं ततः स्नात्वा तस्मिन्दिने पुनः श्मशानगमनं निषिध्यते ।

सप्तमे खण्डे – दशमदिनकृत्यम्, केशादीनां वपनम्, स्नानम्, आदित्योपस्थानम्, मन्त्रजपः, श्मशानग्रामयोर्मध्ये चर्माधिरोहणहोमः,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततः गा अनुगमनम्, सपिण्डीकरणानन्तरं क्रियमाणानि प्रायश्चित्तानि, समुद्रस्नानम्, दशसहस्रगायत्रीजपः, अनश्नता संहिताध्ययनमुक्त्वा अथवा ब्राह्मणान् भोजयित्वा तेषाम् आशिषः ग्रहणं कर्तव्यं तेन शुद्धो भवति इत्यन्तमस्मिन् खण्डे विद्यते । सप्तमखण्डेन सह प्रथमपटलः समाप्तिम् एति ।

द्वितीयः पटलः

प्रथमे खण्डे – पुनर्दहनविधिः, अस्थिसंस्कारः, पलाशदहन–विधिः, पलाशवृन्तैः प्रतिकृतिनिर्माणावसरे अङ्गविशेषेण पलाशवृन्तानां सङ्ख्याविशेषोऽपि विधीयते ।

द्वितीये खण्डे – एकोद्दिष्टश्राद्धप्रकृतिभूतश्राद्धविधिः, अमावास्या–श्राद्धम्, अपरपक्षश्राद्धम्, ब्राह्मणानां निमन्त्रणकालः, निमन्त्रितब्रह्मणानां कर्तव्यानि, योग्यब्राह्मणानां लक्षणम्, अनर्हब्राह्मणानां लक्षणम्, दैवे पित्र्ये च ब्राह्मणानां सङ्ख्याविशेषः, मातामहश्राद्धे ब्राह्मणानां सङ्ख्या, पित्रर्थे उपयुज्यमानदर्भाणां लक्षणम्, क्षणदानम् तथा उपचारप्रश्नाश्च अस्मिन् खण्डे विधीयते ।

तृतीये खण्डे – श्राद्धे विश्वेदेवानां पितॄणां च वरणम्, वरण–मन्त्राः, अर्घ्यपात्रासादनम्, अर्घ्यदानम् ततः गन्धादिदानम्, गन्धादि–द्रव्यालाभे कर्तव्यानि, अग्नौ करणम्, करवै इत्यादि शब्दप्रयोगे कामनाविशेषः, हुतशेषनिदानं तथा अनग्निकानां पाणिहोमविधिरपि अस्मिन्नेव खण्डे विहितमस्ति ।

चतुर्थे खण्डे – भोजनार्थं पात्रासादनम्, पात्रालम्भनम्, अभिश्रवणसामानि, माधुच्छन्दसीसंहिता, पितृसंहिता, विकिरान्नदानम्, शेषान्नविनियोगार्थे प्रश्नः तथा पिण्डप्रदानान्तमस्मिन् खण्डे विद्यते ।

पञ्चमे खण्डे – अक्षय्यवाचनम्, स्वधावाचनम्, आशीर्गृहण–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्राः, पिण्डनिक्षेपणम्, पितृविसर्जनम्, विश्वेदेवविसर्जनम्, शान्तिपाठः तथा शेषान्नप्राशनप्रमाणं च अत्र निर्दिष्टम् ।

षष्ठे खण्डे – एकोद्दिष्टश्राद्धम्, तत्र वर्ज्यानि, दानवस्तुविवरणम्, मासिकश्राद्धम्, सपिण्डीकरणकालः, सपिण्डीकरणम्, तत्र पात्राणां सङ्ख्या, प्रेतपात्रोदकसंयोजनं मन्त्रश्च, प्रेतपिण्डसंयोजनं मन्त्रश्च तथा उपस्थानमन्त्रमुक्त्वा खण्डं पटलं ग्रन्थञ्च समापयति आचार्यगौतमः ।

निदानसूत्रम्

गौतमीयापरसूत्रस्य प्रथमपटलस्य द्वितीयखण्डे सप्तत्रिंशत्तमे सूत्रे "आहिताग्निश्चेदेतस्मिन्काले पात्राण्यासाद्य" इत्यत्र स्थानविशेषं पात्रविशेषं च न दृश्यते । तस्य विषयं पतञ्जलिमहर्षिः स्वनिदान-सूत्रस्य द्वितीये प्रपाठके षष्ठे खण्डे विवृणोति ।

अस्मिन् खण्डे मृतस्य दर्शपूर्णमासादीनां पूर्णत्वप्राप्तौ क्रियमाणानि कर्माणि, त्रेताग्निहरणक्रमः, अग्नीनां मध्ये शवनिदानम्, शवस्य चितारोपणानन्तरं तत्तत्स्थानेषु यज्ञपात्राणामासादनम्, त्रेताग्नीनां युगपच्छरीरे स्थापनम्, यज्ञपात्रैः सह दहनस्य फलविशेषं तथा वामदेव्यशान्तिमन्त्रनिर्देशपर्यन्तं विवरणं विद्यते ॥

हस्तप्रतौ तथा मुद्रितप्रतौ च स्थितानां दोषाणां परिशुद्धिं कृत्वा परिष्कृतस्वरूपमत्र सङ्गृहीतं विद्यते । तत्र तत्र सूचितं च अस्ति । हस्तप्रतिसूचनार्थं सङ्ख्या १ दत्ता विद्यते, तथा मुद्रितप्रतिसूचनार्थं सङ्ख्या २ दत्ता अस्ति, तथैव निदानसूत्रं सूचयितुं सङ्ख्य ३ दत्तास्ति। निदानसूत्रभागं मूलवत् संस्थापितम् । एतेषां सह **सूत्रपाठः, सूत्रोक्तमन्त्राणां सङ्ग्रहः** तथा **सूत्रानुक्रमणिकापि** सँयोजितमस्ति सामशाखिनाम्, अध्येतृणां च उपयोगाय भवेदिति धिया ।

–: ॐ शम् ॐ :–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आदृतग्रन्थाः

१. हस्तप्रतिकृतिः: – वेदमूर्ति श्री सुब्राय सत्यनारायण भट्टः, हारूरि, गोकर्ण एतेषां समीपे विद्यमाना हस्तप्रतिकृतिः।

२. अक्षपादीयं गौतमीयापरसूत्रम् – द्रविडप्रान्ते वरहूरु श्रीकृष्णस्वामि श्रौतिभिः १९१५ तमे (वत्सरे) मुद्रापितं ग्रन्थाक्षरे (तमिळु) विद्यमाना प्राचीनप्रतिकृतिः।

३. निदानसूत्रम् – आचार्यपतञ्जलिप्रोक्तं निदानसूत्रम् –(के.एन्.भट्नागर् महोदयेन संगृहीतम्) मेहर्चंद लख्मणदास, दरियागंज देहलि द्वारा १९३३ तमे क्रिस्ताब्दे मुद्रापितप्रतिकृतिः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

APARASUTRA – AN OVERVIEW

Kalpasutra is one of the six Vedangas. Grahyasutra is incorporated in the Kalpasutra. Aparasutra is part of the Grahyasutra. As Grahya sutra is the basis for the household duties, Aparasutra forms the basis for the funeral rites. It enjoins on the people the formalities and procedures to be observed in respect of funeral obsequies after when the spirit (*jiva*) has left the body.

Samaveda is one among the four Vedas. Goutamacharya in his '**Goutamiyaparasutram**' has dealt with the rules and rites of funeral ceremonies for the followers of the Samaveda. Though sage Goutama had written these sutras in Sanskrit language, it had not been printed and published in the popular Sanskrit script. A long time ago, these sutras were got printed in *Grintha* script by Varahuru Krishna Swamy Shrouti of the then Madras State. This treatise/book contains commentaries by the erudite scholar Allala Bhatta. It has many print mistakes – but it is not presently available.

'Goutamiyaparasutram' serves as the basis for the funeral rites of the Samashakhis i.e. the followers of Samaveda. This highly useful and essential book/treatise has been prescribed as a text for Samasmartha Vidwat Course. As it is not available, an attempt has been made here towards the compilation of the sutras.

My Guru Vedamurthi Haruri Subray Bhat of Gokarna had a hand-written copy of it in his possession. I

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

had collected it from him during the period of my discipleship under him. There after I got a copy of the book / treatise from Mayuram M. Ramanatha Dixit of the then Madras State. He was very generous to give me the book/treatise. This copy was printed in the *Grintha* script. After studying both the copies it was noticed that there had been many discrepancies in the handwritten and the printed copies. It was also noticed that in several areas many sentences of the hand-written copy were differently framed in the printed copy. However, while studying the hand-written copy itself, I had revised it with the help of my teacher.

Though it has been mentioned in the Second Chapter (*Khanda*) of the First Division (*Patala*) of the Sutra that the sacrificial vessels of the *Ahitagni* should be properly arranged, the methods and procedures of their arrangement are not dealt with in detail. But this fact has been well dealt with by Maharshi Patanjali in the Sixth Chapter of the Fifth Division of his Nidanasutra. As this sixth Chapter has a special relation with the 'Goutamiyaparasutram', the erudite scholar Allala Bhatta (who has written commentaries to 'Goutamiyaparasutram' has given his expositions to this chapter also. This particular chapter of the *Grintha* script book/treatise is printed along with these expositions. As the Sixth Chapter of the Nidanasutra gives clarity and entirety to **Goutamiyaparasutram**, this too has been compiled here.

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

The Aparasutra consists of two divisions made up of thirteen chapters. In the first division there are seven chapters. In the second division there are six chapters. The first division deals with the duties starting from the observances prior to death to the rites of the tenth day. In the second division the duties to be performed specifically in the absence/ non-availability of the main body are dealt with. It ends with 'Sapindikarana Shraddha Vidhi' (procedures of performing Shraddha to the deceased relatives called Sapindas). With this the book comes to its end.

The First Division

1. **The First Chapter**: This chapter contains directions in respect of the *japas* to be performed during the period before and after death. It also deals with certain *samsakars* (purificatory rites and other rituals) to be performed to the body, *Agnirnaya, Agnisiddhi, Streeagni nirnaya* and *the oupasanasiddhi* of the deceased person. This chapter ends with the procedures for changing mantras in respect of the *Ahitagni.*

2. **The Second Chapter**: This chapter deals with the things to be taken to the cremation ground, the procedures of carrying the dead body, preparation of the cremation ground, the rites to be performed on the way, building of the funeral pile, shearing and shaving of the *Ahitagni* and placing of clarified butter and other things at the seven places including the face. This chapter ends with *'Vatapradana Vidhi'* (procedures of making the air blow by fanning).

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

3. **The Third Chapter**: This Chapter deals with *Udakumbhadharakrama, Inva Sthapana* (placing of an object called *Inva* which is made of *Darbha* grass) at the head, *Shavachchadana* (covering of the dead body), *Dahana* (cremation), *Agnupasthana,* and *Shantimantra* (pacificatory mantras). This chapter ends with instructions regarding *Acharya dakshina.* (gifts and money to be given to the Acharyas).

4. **The Fourth Chapter**: In this chapter the following rites are enumerated: the rites to be performed after cremation, getting rid of sorrow and taking a bath, offering *Tilodaka* and *Vasodaka* to the *Preta* and their number, fixing time for the rites to be performed, *Jnati Kartavya* (duties of the kinsmen), duties of the *Kartu* in the house, and the daily offerings of *Pinda* and *Tilodaka.*

5. **The Fifth Chapter**: In this chapter instructions are given about the following: the time of *Sanchayana* (collection of ashes and bones), *Brahmana Bhojana* (meals for Brahmanas), *Dayadi Kartavya* (duties of descendants), *Sanchayana Homa, Asthi Shuddhi (purification of bones),* and *Asthi Sangraha Krama (*the procedures of collecting bones), keeping the bones in a pot (kumbha), placing five objects in the pot and mentally reciting *(smarana)* the names of five rivers and placing the pot under the foot of a tree.

6. **Sixth Chapter**: This chapter deals with the following rites and rituals to be observed in the cremation ground

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

where the dead body is burnt. Heaping up of the ashes, covering it with wet soil, installing an image of the dead person and returning home after offering *pinda* and *bali* to it. It is also ordained here that after having returned to one's home, one should not go back to the cremation ground on that day.

7. **The Seventh Chapter**: In this chapter the following rites and rituals are ordained. The rites to be performed on the tenth day, *Vapana* (shearing and shaving), *Anjalidana,* the *Homa* to be performed in the middle of the *Smashana Gramas, Shuddhi Vidhana* (purifying procedures after these rites), *Samudra Snana* (sea bath), *Dasha Sahasra Gayatri Japa, Anashnat Samhita Patha and Brahmana Bhojana.*

Second Division

1. **The First Chapter**: In this chapter the following rites/rituals are dealt with. The funeral rites to be performed in the absence/ non-availability of the main body, the rites in respect *Punardahana* (cremating once again), Asthi Sanskara (purification of the bones), preparing the image of the deceased person using the bark of the *Palasha* tree and specification of the *Palasha* barks to the respective organs of the body.

2. **The Second Chapter**: In this chapter the following rites/rituals are given in detail: the procedures of *Ekoddishtashraddha* (the *Shraddha* performed for one particular individual deceased), *Amavasya Shraddha, Panchami Prabriti Aparapaksha Shraddha, Brahmana*

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

Nimantrana (invitation to Brahmanas), the duties of the invited Brahmanas, the features of the Brahmanas, the rites to be performed in the absence of Brahmanas, the features of the unqualified Brahmanas, the number of Brahmanas in *Vishve Devasthana* and *Pitra Sthana, Matamaha Shraddha Vichara,* the *Darbha* grass to be used in the *Shraddha, Padarthadana* to *Veshvedeva and pitru* and *Upachara Prashnas* (curtsey enquiries).

3. **The Third Chapter:** In this chapter the following rites and rituals are dealt with: *Varanakrama* in respect of *Vishvedeva* and *Pitri* (Supplicating procedures in respect of Vishvedeva and the spirits of the departed and deified ancestors), *Varana mantras* (supplicatory mantras), *Arghyapatrasadanakrama, Arghyadana, Kamanapara Arghyodaka Viniyoga, Gandhadidana,* the procedures to be followed if the required things are not available, *Agnoukarana, Karavai, Kamanabheda* in the use of diction, *Hutasheshanidana* and *Panihomavidhana* to the *Anougnika.*

4. **The Fourth Chapter**: In this chapter the following are dealt with: Arrangement of vessels *(Bhojana Patrasadana),* Purification of the vessels, *Dravyashuddhi,* directions in respect of *Abhishravana* mantras to be chanted at the time of meals, directions in respect of *Madhuchchandasi Samhita and Pitri Samhita* mantras, *Triptiprashna,* the methods of disbursing the scattered rice pertaining to *Vishvedeva* and *Pitri and* the remnants of the rice *(Sheshanna)* and *Pindapradana* (offering of pindas).

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

5. **Fifth Chapter**: In this chapter instructions have been given in respect of the following rites and rituals. Giving gifts and money to Brahmanas *(Dakshinadana to Brahmanas)*, Mantras for seeking and receiving blessings from Brahmanas, *Pindavisarjana, Pindaprakshepana, Pitri* and *Veshvedeva Visarjana, Anugamana of Brahmanas, Shantivachana and the quantity* of *Prasadabhakshana.*

6. **Sixth Chapter**: In this chapter the following rites and rituals are dealt with: *Ekoddishtashraddha*, the dos and don'ts of Ekoddishtashraddha, *Danavastu* (the objects to be given as gifts), *Masika Shraddha, Sapindikarana, Patrasankhya* (the number of vessels and utensils), *Pretapatra (Udaka) Samyojana* and *Upasthanamantrapatha.* With this the sixth chapter concludes. Here ends the second division. The treatise also ends here. Totally there are three hundred and twenty four (324) sutras in this treatise.

NIDANASUTRA

Yajnapatrasadana of the *Ahitagni* (the arrangement of sacrificial vessels) mentioned in the 37th Sutra of the second chapter of the first division of the Aparasutra is dealt with in detail in the sixth chapter of the fifth division of Patanjali's Nidanasutra. In this chapter *Dashapurna Masa Sampurnatva Praptividana* of the deceased person, *Tretagniharanakrama, Shavanidana* in midst of fires, the instructions in detail regarding the arrangement of vessels after the dead body is placed on the pyre, making the three

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

fires *(agni)* touch the dead body at the same time and the special benefits of cremation along with the sacrificial vessels. The sixth chapter ends with *Shantimantras.* There are totally thirty seven (37) sutras in this chapter.

This compilation is prepared in an easily understandable manner, setting right the discrepancies found during the course of codification. Separate markings have been made for the hand-written copy and the *Grintha* script copy. For identification purposes, the number (1) is marked for the hand-written copy and the number (2) is marked for the copy printed in *Grintha* script. (3) is marked for the copy printed in Nidanasutra. The Nidanasutra is compiled as in the original with a proper approach. Besides these, *Sutrapatha,* a collection of *Sutroktamantras* and an index of Sutras *(Sutranukramanika)* are also given.

SOURCES

1) Hand-written copy: The copy written in hand which was in possession of Vedamurthi Shri Subraya Bhat, Haruri Smaveda Professor, Sanskrit College, Gokarna

2) Akshapadiyam Goutamiyaparasutram: The treatise printed in *Grintha* script in Dravida Desha.(1915- Varahuru Shree Krishnasvami Shrouti)

3) Nidanasutra: The copy printed in 1933 by Meharchand Lakshmandas, Daryaganj, Delhi. (Adited by; Kailash.Nath.Bhatnagar, Ph.D)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विषयसूची

अपरसूत्रभाष्यम् ।

प्रथमःपटलः ००१–०८०

प्रथमः खण्डः	००१–०१९
द्वितीयः खण्डः	०१९–०३८
तृतीयः खण्डः	०३८–०४४
चतुर्थः खण्डः	०४५–०६०
पञ्चमः खण्डः	०६१–०७२
षष्ठः खंडः	०७३–०७५
सप्तमः खण्डः	०७५–०८०
द्वितीयः पटलः	०८१–१५१
प्रथमः खण्डः	०८१–०८४
द्वितीयः खण्डः	०८४–०९९
तृतीयः खण्डः	०९९–१११
चतुर्थः खण्डः	१११–१२४
पञ्चमः खण्डः	१२४–१२९
षष्ठः खण्डः	१२९–१५०
०२) निदानसूत्रम्	१५१–१६२
०३) अपरसूत्रपाठः	१६३–१७७
०४) सूत्रोक्तमन्त्राः	१७८–१८३
०५) सूत्रानुक्रमणिका	१८४–१९९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ अक्षपादीयं गौतमीयापरसूत्रम् ॥

{ अल्लालभट्टीयव्याख्योपेतम् }

प्रथमपटलः

प्रथमः खण्डः

००१.प्रायणकाले ॥ (०१.०१.०१)

इति प्रायणं मरणं; तस्मिन् काले ।

००२.प्राक्स्मृतिवियोगात् ॥ (०१.०१.०२)

इति स्मृतिर्ज्ञानं, वियोगो नाशः । एतदुक्तं भवति–मरण काले स्मृतिभ्रेषात्प्रागेव वक्ष्यमाणानि सामानि श्रावयेत् । प्राक् स्मृतिवियोगादिति वदता स्मृतिवियोगात्परं न श्रावणं भवति इत्युक्तम् । स्मृतिवियोगात्परं न भवतीत्युक्ते मरणोत्तरकालं न भवतीत्येतत् दण्डापूपन्यायसिद्धम् ॥ अथ विशेषेण सर्वान् श्रावयेन्नेत्याह –

००३.पितरं मातरं भ्रातरं गुरुमन्यं वा सुहृदं ब्राह्मणम् ॥ (०१.०१.०३)

इति पित्रादिशब्दाः प्रसिद्धाः। गुरुशब्दोऽत्र[क] पितृव्यादि वाचकः न तु निषेकादिकर्तृसमः[का]। स तु पितृशब्देनैवोपात्तः। अत्रापि तस्योपादाने पौनरुक्त्यं प्रसज्येत । अन्यं वा सुहृदं ब्राह्मणमिति; यस्य सखा ब्राह्मणः तस्य श्रावणं विकल्प्यते। अन्यं वेति वाशब्दाभिधानात् । ब्राह्मणग्रहणं सुहृद्भूतस्यापि

क–१ शब्देन २. शब्दोऽत्र । का– १.कर्ता २.कर्तृसमः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षत्रियादेर्नास्तीति दर्शयितुम् । न चात्र ब्राह्मणशब्दः पित्रादि शब्दानां विशेषणमिति वाच्यम् । ब्राह्मणशब्देन सन्निहित सुहृच्छब्द एव परामृश्यते न तु दूरस्थपित्रादिशब्दः। सन्निहित सुहृच्छब्दपरामर्शेन चरितार्थः सन् दूरस्थपित्रादि-विशेषण मयुक्तमेव पित्रादि-शब्देन नाकांक्षितत्वात् । किञ्च मातृ-शब्दविशेषत्वे अश्रुतस्त्रीप्रत्ययोऽध्याह्रियते । विनाप्यध्याहारेण अर्थसिद्धे सा कल्पना न युक्ता । ननु गुरुशब्दस्य पुल्लिङ्ग-त्वात् पितृव्यभार्यादीनां तेन ग्रहणं न स्यात्; पुरुषपरत्वेन चरितार्थत्वात् स्त्रीपरत्वे स्त्रीप्रत्ययस्य अध्याहारः प्रसज्येत । उच्यते- अन्तरेणाध्याहारं गुरुशब्देनैव स्त्रीणामपि प्रतीतिः सिद्ध्यति । "वोतो गुणवचनात्" इति स्त्रीप्रत्ययस्य वैकल्पिकत्वात् । अतो गुरुशब्दः पितृव्यभार्यादीन्[कि] पितृस्वसृ प्रभृति स्त्रियश्चाभिधत्ते । ब्राह्मणशब्दस्तु सन्निहितसुहृन्मात्रं विशिनष्टि नत्वन्यदिति विवेकः ॥

किमर्थं तेषां श्रवणम्? तत आह-

००४.तत्स्वर्गार्थेन निमित्तेन ॥ (०१.०१.०४)

इति तच्छब्देन पित्रादयः परामृश्यन्ते । स्वर्गशब्दोऽपवर्ग वचनः। अर्थशब्दो निमित्तवचनः। ततश्चायमर्थः स्वर्ग निमित्ते नेदं श्रावणमिति । "उक्तार्थानामप्रयोगः" इति न्यायेन निमित्तशब्दोऽपार्थकः स्यात् । नैष दोषः;अपूपौ द्वावानयेतिवत्

कि-१.भ्रात्रादीन् २.भार्यादीन्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्पष्टार्थत्वात् ॥ अथ कस्तर्हि श्रावयेत्याह-

००५.इमानि छन्दांसि संस्कर्ता श्रावयेत् ॥ (०१.०१.०५)

इति छन्दःशब्दः सामवाचकः। उपरितने सूत्रे वक्ष्यमाणानि सामानि संस्कर्ता पित्रादीन् श्रावयेत् । संस्कर्तृशब्द श्रवणात् तद्व्यतिरिक्तानां न श्रावणकर्तृत्वमिति गम्यते । स्त्रीकर्तृकत्वे [की]अनुपनीतकर्तृत्वे च चाधीतसकाशात् किञ्चित् किञ्चित् पठित्वा अनधीतादिकर्ता मरिष्यमाणं श्रावयेत् ॥ कानि सामानीत्यत आह -

००६.वेदादि वेदान्तानि त्रीण्याज्यदोहान्यादित्प्रत्नस्य रेतस उद्वयन्तमस उन्नयामीति ॥ (०१.०१.०६)

इति वेदशब्देन वेदसामोच्यते । भीमादिशब्दवन्नामैकदेशप्रयोगः। वेदस्यादीनि वेदादीनि, वेदस्यान्तानि वेदान्तानि । वेदादीनि च वेदान्तानि चेति तत्पुरुषगर्भो द्वन्द्वः। अत्र बहुवचनस्य त्रिष्वेव चरितार्थत्वात् वेदान्तानि त्रीण्येव भवन्ति । सन्तनिगायत्रपार्श्वयोस्तु गाने प्रमाणमन्वेषणीयम् । केचित्तु सन्तनिगायत्रपार्श्वाभ्यां सह पञ्चापि वेदान्तानि सामानि गेयान्येव । त्रिशब्दग्रहणं स्पष्टार्थम् । आज्यदोहानीत्येतावतैव त्रित्वसिद्धेः॥ अथ अधिकारीविशेषेण सामविशेषं दर्शयति -

००७.श्रुतपूर्विणाञ्चेत्तवश्यावीयानि सामानि (०१.०१.०७)

इति श्रुतशब्दोऽधीतवचनः। श्रुताश्च ते पूर्वाश्च श्रुतपूर्वाः

की-१.नास्ति, २.अधिकपाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते येषां सन्ति ते श्रुतपूर्विणः। तेषां तवश्यावीयानि श्रावयेत् । एतदुक्तं भवति – मरिष्यमाणस्य पितृपितामह–प्रपितामहैः तवश्यावीयान्यधीतानि चेत्तान्यपि श्रावयेत् नान्यथा श्रुत– पूर्विणामिति वाक्ये समासगतबहुवचनादेकस्य द्वयोर्वा अनध्ययनेऽपि तवश्यावीयानि न भवन्ति । तवश्यावीय अध्ययनरहितानां तवश्यावीयन्नास्तीति वक्तुमयुक्तम् । श्रुतपूर्विणामिति सामान्येन अभिधानादिति चेत् श्रुतपूर्विणाम् इति श्रुतसामान्येन कु अभिहितेऽपि तवश्यावीयमेवाभिधत्ते इतरथा इतरस्यापि तवश्यावीयानि न भवेयुः कार्स्न्येन सर्ववेदानुपपत्तेः। ततः श्रुतपूर्विणामित्येतत् तवश्यावीयाध्ययन–मेवाब्रवीदिति नान्येषां मरिष्यमाणेषु नाधीतेषु तवश्यावीयानि श्राव्यानि भवन्ति श्रुतपूर्विणामिति पूर्वाध्ययनस्य प्रयोजकत्वा–भिधानात् । मात्रादीनान्तु स्वस्वपतिद्वारा तवश्यावीय सद्भावा–सद्भावौ निश्चेतव्यौ । तवश्यावीयानि सामानि क–उ खा–उ अग्निरस्मि, क–पात्यग्निरिया, इन्द्रन्नरो, भ्राजा औहो इति पञ्चानुगानरूपमिलान्दमेव निदानसूत्रे **तवश्यावीयानि** इत्यभिधानात् । केचित् वेदान्तानां साम्नां पञ्चसङ्ख्या–विशिष्टत्वेन निश्चितत्वात्, अतोऽत्र कपिञ्जलाधिकरणस्य अप्रसक्तिः इत्याहुः। त्रीणीति । ओग्नाईत्यादीनि तु श्रुताश्रुत–विशेषमनादृत्य सर्वेषां भवन्ति व्यवस्थापकशास्त्राभावात् ॥

कु–१.आहिते २.अभिहिते

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

००८.मरणकालेऽभिप्रघ्नाप्सुदक्षासेतुषाम च दक्षिणकर्णे जपेत् ॥ (०१.०१.०८)

इति स्मृतिभ्रंशे एतानि सामानि दक्षिणे कर्णे जपेत् । ओग्नाइ इत्यादीनामेषां च सन्नियोगशिष्टत्वमस्तीति प्रकटयितुं चकारः क्रियते । इतरथा चकारो निरर्थकः स्यात् । स्मृति भ्रंशात् प्रागोग्नाइ इत्यादीनि यदि प्रमादान्नोक्तानि तदा भ्रेषात् परमेषामपि लोपः अनुपक्रान्तत्वात् । स्मृतिभ्रंशात्प्रागोग्नाई त्यादीन्युक्तानि । न च समाप्तिशास्त्रार्थ इति न्यायेन उपक्रान्तस्य समाप्तिरावश्यकीति वक्तव्यम् [कू]मरणोत्तरकालं अशुचित्वेनानधिकारात् । ननु सन्नियोगशिष्टत्वं व्याहन्येत । उच्यते उपक्रान्तस्य समाप्त्यभावे वैफल्यं भवति । तस्मात् ओग्नाईत्यादि सेतुषामान्तानां प्रयोगे स्वर्गो भवति नान्यथा । [कृ]तस्मात् तदुपक्रान्तस्य यथा समाप्तिर्भवति तथा भवितव्यम् । यदि असमापने उपक्रान्तमपि विफलं भवति । अकाले कृतमपि विफलं भवति ॥

००९.उत्क्रान्ते प्रजापतेर्हृदयं मनसा ध्यायेत् ॥ (०१.०१.०९)

इति । जीवे निर्गते सति एतत्साम मनसा ध्यायेत् । एतत्तु नित्यमेव स्वकालसम्भवात् । ततः प्रतिकृत्यादि दाहेऽ प्येतद्भवति । सेतुषामान्तानां तु निवृत्तिः ॥

०१०.अत ऊर्ध्वं स्नापयित्वा शवम् ॥ (०१.०१.१०)

कू–१.मरणकाले २. मरणोत्तरकालं । कृ–२.तस्मात् इति अधिकः पाठः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति स्पष्टम् ॥

०११.देशजातिकुलधर्मेणापचितिमलङ्कारेणालङ्कृत्य ॥ (०१.०१.११)

इति । अपचितिः पूजा । शवं पूजयेदलङ्कुर्यादित्यर्थः। कथमलङ्कुर्यात्? इत्यपेक्षायां देशानुसारेण, वंशानुसारेण, जात्यनुसारेणालङ्कारेणालङ्कृत्य अलङ्कुर्यात्॥

०१२.बध्वा दशेनाङ्गुष्ठौ पादयोः पाण्योश्च ॥ (०१.०१,१२)

इति । शवमुत्तानास्यं कृत्वा पादाङ्गुष्ठौ मिलित्वा वस्त्र-दशेन बध्नीयात्, पाण्यङ्गुष्ठावपि ॥

०१३.औदुम्बर्यामासन्द्यां दक्षिणाशिरसमुत्तानं संवेश्य ॥ (०१.०१.१३)

इति औदुम्बरकाष्ठैर्निर्मितायामासन्द्यां दक्षिणाशिरसमुत्तानं संवेशयेयुः॥

०१४.उदग्दशेनाहतेन वाससा प्रच्छाद्य॥ (०१.०१.१४)

इति । पादयोरुपरि यथा दशा भवति तथा प्रच्छादयेयुः । स्नानप्रभृति प्रच्छादनान्तं संस्कर्तृव्यतिरिक्तैरपि कार्यम् ॥

इतःपरमाखण्डसमाप्तेरग्नयो निर्णीयन्ते ।

०१५.निर्हरन्त्यग्नींश्चाहिताञ्छालाग्नयः ॥ (०१.०१.१५)

इति । आहिताग्नींश्च शवेन सह निर्हरन्तीत्यर्थः। शालाग्नय इत्याधानेन संस्कृतानग्नीञ्छालाग्नय इत्याहुः सोम एव शालानिर्माणविधानात्तत्रैव पत्नीशाला इत्यादि व्यवहारश्च ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्योतिष्टोमिकाग्नयः शालाग्नयः त्रेताग्नय इत्यन्ये । केचित् औपासनाग्निः शालाग्निरिति व्यवहरन्ति । आचार्यास्तु त्रेताग्नीनेव शालाग्नय इति व्याजहार[क] ॥

०१६.दहनकर्मणि युज्यन्ते ॥ (०१.०१.१६)

इति दहनकर्मणि शालाग्निशब्दवाच्यास्त्रेताग्नयो युज्यन्ते सम्बध्यन्ते ॥

०१७.सभ्यावसथ्यौ च यथाक्रमम् ॥ (०१.०१.१७)

इति । दहनकर्मणि सभ्यावसथ्यावपि युज्येते । उत्पत्तिकाले यस्याग्नेः पूर्वमुत्पत्तिस्तस्य पूर्वं सम्बन्धः।[के] यस्तु द्वितीयमुत्पत्तिस्तस्य द्वितीय सम्बन्धः एवमन्येष्वपि दृष्टव्यम्[के] । चशब्दः औपासनाग्नेरपि सम्बन्धो भवतीति दर्शयितुं प्रयुक्तः। तस्य तावन्त एव सम्बन्धः सर्वान्ते चकारस्य प्रयोगात्, चकारेण ह्यौपासनाग्निः समुच्चितः। सर्वाधानिनां त्रेताग्निभिर्वा पञ्चाग्निभिर्वा दाहः। अर्धाधानिनो मृतस्य त्रेताग्निभिर्वा षडग्निभिर्वा दाहः। पश्चान्मृतायाः पत्न्याः औपासनेन दाहः। तयोर्यः पूर्वं पत्नी म्रियेत तस्याग्नित्रितयं पितृमेधे सम्बध्यते यः पश्चात्तस्यौपासनेनेति वचनात् अत्रैव पूर्वं पत्नीमरणे तत्र अग्नित्रितयमौपासनं चोत्सृज्यान्यां परिणीय तया सहादध्यात्। तत्रान्यस्याः परिणयनानिश्चये आत्मार्थमौपासनाग्निं निदध्यात्। विवाहनिश्चये त्वौपासनाग्निं न निदध्यात् । ननु अनिश्चयात्

क्र–१.व्यवहारात् २.व्याजहार । के–२.विशेषं वाक्यम्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आत्मार्थमौपासनाग्निर्निहितः पश्चात् विवाहेच्छया अनाश्रम-वासभिया विवाहोऽपि कृतः तदा द्वयोरग्न्योकैस्संसर्गो न कर्तव्यः, अशास्त्रीयत्वात् इत्याशङ्क्य शालाग्नयो दहन-कर्मणि युज्यन्त इत्यस्यापरव्याख्या शालाग्निरौपासनाग्नि र्गृह्याग्निरेकाग्निरित्यनर्थान्तरम् । यस्य यावन्तो गृह्याग्नयस्ते सर्वे दहने सम्बध्यन्ते । ननु एकस्य कथं गृह्याग्नेः बहुत्वम्? उच्यते-अनेकभार्योऽग्नि संसर्गात् प्राङ्मृतश्चेत्तस्यानेकगृह्याग्नि सद्भावः। आधानादूर्ध्वं विवाहं कृतवतः औपासनानेकत्वं भवति । सर्वाधानिनोऽप्याधानात्परं विवाहेऽप्यौपासनसम्भवः । एवं अनेकगृह्याग्निसद्भावे सति सर्वे दहने सम्बध्यन्ते । एतदुक्तं भवति - सर्वाधानात्परं विवाहं कृतवत अर्धाधानिनोऽपि वैतानिकाग्निभिरेव दाहः न त्वौपासनेन । पश्चान्मृतायाः औपासनाग्निना दाहः। गृह्याग्निस्तु पूर्वोक्तरीत्या विकल्प्यते । अनेकभार्यस्य पूर्वमरणे वैतानिकैर्दाहः। पश्चात् मृतानां पत्नीनां गृह्याग्निं विभज्य स्व स्वांशैर्दाहः। सर्वाधानात् परं परिणीतायाः गृह्याग्निरेव वैतानिकैः सम्बन्धाभावात् ।

एतद् व्याख्यानमाचार्यायात्यन्तन्न रोचत इति प्रकारान्तरेण व्याख्यायते-निर्हरन्त्यग्नींश्चाहितानिति । आहितान् आधानेन संस्कृतानग्नीनपि श्मशानं प्रति प्रेतबान्धवाः हरेयुः। शालाग्नयः इति तेषामग्नीनां संज्ञा । केचित् गृह्याग्नेः

कै-१.उत्सर्गः २.संसर्गः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शालाग्निरिति संज्ञामाहुः। तेषामयं सूत्रार्थः- आधानेन संस्कृतान् गृह्याग्नींश्च निर्हरेयुः। न चैकस्य गृह्याग्निबहुत्वं नास्तीति वाच्यम् । अनेकभार्यस्य अग्निसंसर्गात् प्राङ्मृतस्य गृह्याग्न्यनेकत्वसम्भवात् । अत्र द्वितीयार्थे प्रथमा । इदमेव व्याख्यानं साधु । आधानेन संस्कृतानामग्नीनां संज्ञाकरणे प्रयोजनाभावात् । ते दहनकर्मणि युज्यन्त इति । त्रेताग्नयो गृह्याग्नयश्च दहनकर्मणि सम्बध्यन्ते । तेन पूर्वमृतस्य यजमानस्य पूर्वमृतायाः पत्न्या वा त्रेताग्निभिरौपासनेन च दाह इत्युक्तं भवति । ननु विधुराग्नीनां प्रेताधानं वदति तस्य वैय्यर्थ्यमापद्यते अनेन सूत्रेण विरुद्धत्वात् । सत्यम्, तथाप्याचार्यस्य गृह्याग्निनिधानमप्यङ्गीकृतमेव । इतरथा विधुराग्निनाशे प्रेताधानमनुपपन्नमेव । ततश्च निधानपक्षो मुख्यः स्ववाचाभिधानात्, अनिधानपक्षो गौणः ज्ञापितत्वात्। सभ्यावसथ्यौ च तथा भवतः। ननु निर्हरन्त्यग्नीन् इत्यनेनैव गतार्थत्वादिदं सूत्रं निरर्थकम् । उच्यते, बहुवचनस्य त्रित्वे पर्यवसितत्वान्न तेन गतार्थत्वम्। तेनायमर्थः सभ्यावसथ्यावपि दहनेषु सम्बध्येते । येन क्रमेणाभिहितास्तेनैव सर्वेऽग्नयः संयुज्यन्ते। ततश्च पूर्वस्माद् व्याख्यानादिदं व्याख्यानं न्याय्यम्। कोपूर्वव्याख्यातृभिः एवमेव व्याख्यातत्वात् । एष पक्षो ह्याचार्येण अभिधीयते पूर्वोक्तपक्षः आचार्येणानभिहितः किन्तु ज्ञाप्यते । ततश्चापरव्याख्यानमेव श्रेयः। न चाचार्येण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अनुक्तपक्षव्याख्यानं निरर्थकमिति वाच्यम्, चिरन्तनैराचार्यैः ज्ञापितस्यापि व्याख्यानात् ।

०१८.[कौ]आहिताग्निमग्निभिर्दहन्ति (०१.०१.१८) इति स्पष्टम् ।

०१९.गृहस्थमौपासनेन ॥ (०१.०१.१९)

इति अत्र गृहस्थशब्दोऽनाहिताग्निवचनः । अनाहिताग्निमेवौपासनाग्निना दहेत् । स चानाहिताग्निर्विधुरभिन्न इत्येके ॥

०२०.ब्रह्मचारिणं कपालसन्तपनीयेन ॥ (०१.०१.२०)

इति । सम्यक् तपनं सन्तपनं; कपालस्य सन्तपनं कपाल सन्तपनं; कपालसन्तपने भवः कपालसन्तपनीयः, तेन ब्रह्मचारिणं दहेत् ॥ कपालाग्नेरुत्पत्तिप्रकारं वसिष्ठ आह– "कपालमग्निवर्णं तप्त्वा अन्तः करीषादीनि निक्षिप्य यो जातोऽग्निः स कपालाग्नि"रिति ॥

०२१.उत्तपनीयेनेतरान् ॥ (०१.०१.२१)

इति । अनुपनीतविधुरयतीनुत्तपनाग्निना दहेत् । उत्तपनीय प्रकारस्तु स्मृत्यन्तरे दर्शितः॥ "कपालेषु तुषं क्षिप्त्वा जनयेत्तत्र पावकम् । तद्दर्भेषु समारोप्य पुनर्दभान्तरा स्थितिः॥ दर्भेष्वग्निं समारोप्य पुनर्दर्भेषु संस्थितिः। पुनस्तद्द्विस्त्रिरेवं तु दृढमुत्तपनीयकम् ॥ [कं]"तेनैव दहनं कुर्याद्विधवां विधुरं शिशुम्" इति । अत्रत्य शिशुशब्दो अनुपनीतपर इत्यभियुक्तव्याख्यानम् ।

को–१.पूर्वं व्याख्या त्रिभिरेवमेव व्याख्यानात् । कौ–२.अधिकं सूत्रम् । कं–१.नास्ति २.अधिकः पाठः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

०२२.अनेन स्त्रियः ॥ (०१.०१.२२)

इति । उत्तपनीयेन स्त्रियः पश्चान्मृतायाः सर्वाधानिनः पत्न्याः, पश्चान्मृतायाः अनाहिताग्निपत्न्याश्च कन्यायाश्च उत्तपनीयेन दाहः। यासां वैतानिकाग्निप्राप्तिः यासां त्वौपासनाग्निप्राप्तिः ताभ्योऽन्यासामुत्तपनीयेनेत्यर्थः। केचित् निर्मन्थ्येन पत्नीमित्याहिताग्निपत्न्या निर्मन्थ्येन दहनमिच्छन्ति । अपरे कन्यायास्तुषाग्निं कपालसन्तपनीयाख्यमिच्छन्ति । तत्राचार्यो न मृष्यति ।"अनेन स्त्रिय" इत्याचार्येण कण्ठोक्त्याभिधानात् । पश्चान्मृतायाः आहिताग्निपत्न्याः उत्तपनीयमुत्पाद्य तत्र वैतानिकाग्निं कल्पयित्वा तैर्दहेत् । तत्राप्यवशिष्टाग्निविचारस्तूत्तरत्र वक्ष्यते ॥

०२३.यद्युत्सृष्टाग्निर्विच्छिन्नाग्निर्विधुराग्निर्वा प्रमीयेत ॥ (०१.०१.२३)

इति । उत्सृष्टोऽग्निर्यस्य स उत्सृष्टाग्निः। उत्सर्गेष्ट्या योऽग्नीन् परित्यजति स एवोत्सृष्टाग्निर्नान्य इति । ननु अनाहिताग्नेरुत्सृष्टाग्नित्वं न भवति उत्सृष्टेरसम्भवात् । सत्यम्, इष्ट्यसम्भवेऽपि "तद्देवत्यै स्थालीपाकैर्यजेरन्नि"ति न्यायेन स्थालीपाकं कृत्वा वह्निरुत्सृष्टव्यः। विच्छिन्नाग्निरविधानेन प्रमादादालस्यादिना वा यस्याग्निर्विच्छिद्यते स विच्छिन्नाग्निः। "यः पश्चात्तस्यौपासनेने"ति न्यायेनेत्यौपासनाग्निर्निहितः स विधुराग्निः। अनेनैतज्ज्ञायते- पश्चान्मृतस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दहनार्थमौपासनाग्निः निधातव्य इति । तत विधुराग्निरिति वदतः सूत्रकारस्याप्येषः पक्षः सम्मतः इति ज्ञायते । प्रमीयेत म्रियेतेति यावत् तस्य प्रत्येकं सम्बन्धः। एतदुक्तं भवति- उत्सृष्टाग्निर्म्रियेत, यदि विच्छिन्नाग्निर्म्रियेत, यदि विधुराग्निः म्रियेतेति ॥ तेषामग्निसन्धानप्रकारमाह-

०२४.प्रेताधानं कुर्वन्ननूचादागारादग्निमानयेत्॥ (०१.०१.२४)

इति । मृतस्याग्निसन्धानं कुर्वन् संस्कर्ता साङ्गवेदा- ध्यायिनो गृहाल्लौकिकाग्निमाहरेत् ॥

०२५.तेनाग्निना व्रीहिकणैरुत्तपनीयमुत्पाद्य ॥ (०१.०१.२५)

इति । अनूचानगृहादाहृतेनाग्निनोत्तपनीयाग्न्युत्पत्ति- प्रकारेणोत्तपनीयमग्निमुत्पाद्य उत्पादयेत् सम्पादयेत् । अत्र दर्भाणां स्थाने व्रीहिकणाः। ततश्चायमर्थः-अनूचानगृहादाहृतेऽ ग्नौ व्रीहिकणान्निक्षिप्तेषु प्रज्वलितेषु पुनरपि व्रीहिकणान् निक्षिपेत् । तेषु प्रज्वलितेषु सर्वं वक्ष्यमाणं कुर्यात् ॥

०२६.विच्छिन्नोत्सृष्टाग्नीनामेवं प्रयोगः ॥ (०१.०१.२६)

इति व्रीहिकणैरुत्तपनीयोत्पत्तिः। विच्छिन्नाग्नीनामुत्सृष्टा- ग्निनामेव न तु विधुराग्नीनाम् । तेषां तु स्मृत्युक्तप्रकारेण दर्भैरेवोत्पत्तिरिति गम्यते । विधुराग्निस्तु प्रमादादिना यदि विच्छिन्नस्तदापि स्मृत्युक्तप्रकारेणैवोत्तपनीयोऽग्निः कार्यः न तु सूत्रोक्तप्रकारेण ॥

०२७.दक्षिणेन हस्तेन प्रेतमन्वालभ्य सव्येनाग्निञ्जपे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्योस्याग्नि रजुह्वतो मांसकामः सङ्कल्पयते यजमानमांसं जानातु ते हविषे सादिताय स्वर्गं लोकं प्रेतमिमं नयत्विति ॥ (०१.०१.२७)

इति संस्कर्ता स्वीयदक्षिणेन हस्तेन शवमालभमानः सव्यहस्तेनाग्निं स्पृशेत् । योस्याग्निरिति जपेत् । (अत्र ल्यप् प्रत्ययो वर्तमानार्थे भवति) ॥

०२८.आज्येन द्वादशगृहीतेन सृचं पूरयित्वा प्रेतमग्निं सव्येनान्वालभ्य प्रजापतिं मनसा स्मृत्वा दक्षिणेनाग्नौ जुहुयादाज्यतन्त्रेण परिचरणतन्त्रेण वा ॥ (०१.०१.२८)

इति । स्रुवेणाज्यं द्वादशकृत्वः स्रुचि [क] गृहीत्वा सव्येन हस्तेन प्रेतमग्निं स्पृशन् दक्षिणेन हस्तेन जुहुयान्मनसा प्रजापतये स्वाहेति ।"स्वाहान्ता मन्त्रा होमेष्वि"ति न्यायेनात्र स्वाहाशब्दानुपादानेऽपि स्वाहाशब्दो वक्तव्यः। ततश्च स्वाहा शब्दयोगात् प्रजापतिशब्दश्चतुर्थ्यन्तो भवति। "नमःस्वस्ति स्वाहास्वधालं वषड्योगाच्च" इति पाणिनि स्मरणात् । एष प्रधानहोमः। स त्वाज्यतन्त्रेण परिचरणतन्त्रेण वा कर्तव्यः। उत्पवनाज्यसंस्कारो यस्मिन्प्रयोगे भवति तदाज्यतन्त्रम् । आज्योत्पवनयोगात् तत्पूर्वोत्तरभाविनोऽपि पदार्था आज्यतन्त्र-मिति गम्यते । किञ्च सूत्रकारेण आज्यतन्त्रेत्यस्मिन् सूत्रेऽ नुपात्तेऽपि "सर्वत्रैतद्धोमेषु कुर्यादि"ति वचनेनोपलेपनादि

कः–१.पूरयित्वा २.गृहीत्वा ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रपदान्तपदार्थजातमस्त्येव। नत्वनेनैव सिद्धे किमर्थं सूत्रकार एतं शब्दं प्रयुक्तवान्? उच्यते, परिचरणतन्त्रेण सहाज्यतन्त्रस्य विकल्प इति वक्तुमाज्यतन्त्रेण इत्युक्तम् । सायं होमस्य यो धर्मः स परिचरणतन्त्रशब्दवाच्यः। "सायमाहुत्युपक्रमं परिचरणमि"ति खादिराचार्येणाभिधानात् । न च परिचरण-तन्त्रपक्षे गौषूक्तादिश्च प्रवर्तत इति वाच्यम् । खादिराचार्येण अनभिधानात् पर्युक्षणमात्रमेव प्रवर्तते । यदा द्वादशरात्रि-र्विच्छिन्नः तदा परिचरणतन्त्रं प्रवर्तते । यदा द्वादशरात्रादूर्ध्वं विच्छिन्नस्तस्याज्यतन्त्रमिति व्यवस्था, इतरथानर्थक्यप्रसङ्गात् । आज्यतन्त्रे सर्वत्रोपरिष्टात् इत्येतद्भवति । यज्ञवास्त्वपि प्रवर्तते "सर्वत्र कुर्यादि"ति वचनात् । विच्छेददिनमारभ्य प्राग्द्वादश-रात्रान्मृतानां परिचरणतन्त्रमेव । द्वादशदिनादूर्ध्वमाज्यतन्त्रमेव । आज्यतन्त्रे ब्रह्मा भवत्येव तस्मिन्नेवाग्नौ औपासनहोमस्य करिष्यमाणत्वात् ॥

०२९.यावदग्निर्विच्छेदस्तावद्धोमार्थं विप्राय द्रव्यं प्रदाय ॥ (०१.०१.२९) इति । निगदव्याख्यानमेतत् ॥

०३०.यथाविध्यौपासनं कृत्वा ॥ (०१.०१.३०)

इति । यथाविधिशब्देन सूत्रान्तरोक्तप्राचीनावीतत्वा-प्रदक्षिणत्वे बाध्येते इतरथा "अनुक्तमन्यतो ग्राह्य"मिति न्यायेन ते प्राप्नुतः। तेन प्राचीनावीतत्वाप्रदक्षिणत्वयोर्निवृत्तिः भवतीति सिद्धम् । ततश्च यज्ञोपवीती भूत्वा औपासनहोमः कर्तव्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सायङ्काले मरिष्यमाणस्य सायंप्रातराहुती कार्ये । प्रातःकाले प्रातराहुतिरेव । न च सायङ्काले प्रातराहुतिर्न कर्तव्येति शङ्कनीयः, प्रातरपवर्गस्य आवश्यकत्वात् । न चापरपक्षे मृतस्यातिशिष्टानां दिवसानां सायं प्रातराहुतीः प्रतिसङ्ख्याय कार्येति वाच्यम् । तच्चेदपरपक्षे प्रायणं शक्येतेति जीवत एव अपकर्षविधानात् । अपरपक्षे मरिष्यमाणस्यानाहिताग्नेरपि अतिशिष्ट रात्रीणां सायमाहुतीः विगणय्य पक्षहोमन्यायेन हुत्वा तदानीमेव तावतीः प्रातराहुतीरपि प्रतिसङ्ख्याय पक्षहोमवत् कार्यः। ततो दर्शस्थालीपाकश्च कार्यः। असम्भवे पूर्णाहुतिं कुर्यात् । पूर्वपक्षस्य रात्रौ यदा मरणशङ्का भवेत् तदा श्वः प्रातराहुतिरपकृष्टव्या, "पूर्वपक्षे चेद्रात्रौ प्रातराहुतिमेवे"ति वचनात् । प्रकृतमनुसरामः। [ख]विच्छिन्नोत्सृष्टाग्नीनामेवं प्रयोगः। एवं होमं कृत्वा–

०३१. तेनाग्निना दहेत् ॥ (०१.०१.३१)

इति । यस्मिन्नग्नौ प्रेताधानं कृत्वा औपासनहोमः कृतः तेनाग्निना मृतं संस्कुर्यात् ॥

०३२.आहिताग्निश्चेन्मन्त्रस्योहः कर्तव्यः॥ (०१.०१.३२)

इति । प्रेतो यः आहिताग्निः स्यात्तदा मन्त्रस्योहः कार्यः। "येऽस्याग्नयो जुह्वतो मांसकामाः सङ्कल्पयन्ते यजमान मांसं जानन्तु ते हविषे सादिताय स्वर्गं लोकं प्रेतमिमं नयन्तु" इति

ख–१.नास्ति २.अधिकयोजना ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्नामः कार्यः।आहिताग्निग्रहणं प्रेताधानाग्नीनामुपलक्षणार्थम्। तेन संसर्गात् प्राङ्मृतस्य द्विभार्यस्य अग्निवाचिनां पदानां द्विवचनेन ऊहः कर्तव्यः। एतदुक्तं भवति–यस्य यावतामग्नीनां प्रेताधानप्राप्तिस्तावतां तथैवोहः कार्य इति ॥

०३३. स्त्रीणां विधुराणां च द्वादशगृहीतं प्रजापतिं मनसा ध्यायन् जुहोत्येव ॥ (०१.०१.३३)

इति । स्त्रीणामनूढानामूढानां विधवानां विधुराणा–मौपासनाग्निरहितानाञ्च द्वादशगृहीतं गृहीत्वा मनसा "प्रजापतये स्वाहा" इत्युक्त्वा जुहुयात् । एव शब्दोऽवधार–णार्थः। यासां स्त्रीणां येषां विधुराणां च प्रेताधानप्राप्तिः तेषामुभयेषामपि योऽस्याग्निरिति मन्त्रः सहस्तालम्भनादिश्च निवर्तते । इतरथा एवकारस्य आनर्थक्यापत्तेः। न चैवकारेण औपासनस्यापि निवृत्तिरिति शङ्कनीयः। औपासनाग्नीना–मौपासनहोमाभावे प्रेताधानकरणेऽप्यग्नीनां लौकिकत्वं स्यात् तदनिष्टम् । ततश्च मन्त्रश्च हस्ताद्यालम्भनं च पर्युक्षणतन्त्रञ्च त्रयमपि निवर्तते नत्वौपासनहोमः ॥

॥ इति प्रथमपटलस्य प्रथमः खण्डः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ प्रथमपटलस्य द्वितीयः खण्डः ॥

अथ श्मशानदेशं प्रत्याहर्तव्यसम्भारान् प्रदर्शयति –

०३४.अग्निं क्षीरं दधि घृत मधु तिलतण्डुलान् दर्भानुदकुम्भं परशुं [खा]हिरण्यशकलं यज्ञपात्राणि चादाय ॥ (०१.०२.०१)

इति । अग्निशब्दस्य उद्देशात्वात्तद्गतैकत्वमविवक्षितं गृहं सम्मार्ष्टीतिवत् । ततश्च यस्य प्रेतस्य यावन्तोऽग्नयस्ते सर्वे पृथक् पृथगाहर्तव्याः। शिष्टं स्पष्टम् । आदायाददीत आहरेदित्यर्थः ॥ अथ को वा किमाहरेदित्यत आह –

०३५.प्राचीनावीती पूर्वमग्निं संस्कर्ता मुक्तशिखः ॥ (०१.०२.०२)

इति मुक्ताः शिखा यस्य स मुक्तशिखः; संस्कर्ता मुक्तशिखः, प्राचीनावीती भूत्वा प्रथमं श्मशानं प्रत्यग्निमाहरेत् । नन्वेकस्य पुंसः एकैव शिखा अतः कथं तद्बाहुल्योपपत्तिः? न च पञ्चशिखानिधानवदभिप्रायेण तदिति वाच्यम् । तदितर पुरुषाणां बहुशिखाभावेन तन्मोचनाभावप्रसङ्गात् । न च कृतचौलानामनुपनीतानां छन्दोगानां प्रायेण चूडाभावात् मुक्तशिखत्वप्रसक्तिरेव नास्तीति वाच्यम् । तेषामग्निधारणाशक्ततया तन्नियुक्ताः आसन्नज्ञातिपुरुषतात्पर्यकत्वादिति चेन्न, अवयवबहुत्वापेक्षत्वात् तस्य यद्वा मुक्ताः शिखा यस्येति वा । अत्र प्राचीनावीतग्रहणमेतत् पूर्वभाविनां

खा–१.नास्ति २.अधिकःपाठः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थानां यज्ञोपवीतत्वं द्योतयितुम् । तेन प्रेताधानौपासन होमवेदादिजपादिप्राजापत्यहोमानां यज्ञोपवीतत्वं सिद्धम् ॥

इत ऊर्ध्वमस्मिन्सूत्रे यानि कर्माणि विहितानि तानि सर्वाणि प्राचीनावीतिना कर्तव्यानि । तेन सञ्चयनचर्माधि रोहणयोः होमावपि प्राचीनावीती कुर्यात् । ततश्चर्माधिरोहणस्य यज्ञोपवीतत्वं वदन्तो निरस्ताः। नन्वेवं सपिण्डीकरणे विहितवैश्वदेविकस्य होमस्य च प्राचीनावीतत्वं प्रसज्येत । यज्ञोपवीतशब्दस्य अनुपादानान्नैष दोषः। अस्मिन् सूत्रे वैश्वदेविकं होमश्च अतिदेशेनैव प्राप्तौ नोपदिष्टौ, तौ येन विशेषेण सह प्रकृतावुभौ ते सहैवातिदेष्टव्यौ । प्रकृतौ तु यज्ञोपवीतिनौ विकृत्यात्मकसपिण्डीकरणेऽपि यज्ञोपवीतिना-मिति सिद्धम् । एवं सति सञ्चयनहोमचर्माधिरोहणहोमयो-र्यानि प्राच्योदीच्याङ्गानि तेषामपि यज्ञोपवीतत्वं प्रसज्येत, अस्मिन् सूत्रेऽनुपदिष्टत्वात् । सत्यम्, प्राच्योदीच्याङ्गानि यज्ञोपवीतिनैव कार्याणि । अतिदेशतः प्राप्तत्वादेतदुक्तं भवति सञ्चयनचर्माधिरोहणयोर्ये प्रधानहोमास्तेषामेव प्राचीनावीतत्वं न प्राच्योदीच्याङ्गानाम् । सपिण्डीकरणे तु प्रधानहोमस्यापि खियज्ञोपवीतत्वमतिदेशप्राप्तत्वात् । प्राच्योदीच्याङ्गानान्तु यज्ञोपवीतत्वं दण्डापूपन्यायसिद्धम् । मुक्तशिखन्तु प्रथमदिवस एवावशिष्यते,यत्र मुक्तशिखत्वमपेक्ष्यते तत्र सूत्रकृता स्वयमेव

खि–१.नास्ति २.अस्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यत्नस्य कृतत्वात् तेन सञ्चयनार्थगमनतद्धोमादौ मुक्त शिखत्वस्य प्रसक्तिर्न भवतीति सिद्धम् । केचित्तु मुक्तशिख इत्यत्र मुक्ताः शिखाः येषामिति बहुवचनविग्रहं कृत्वा संस्कर्तृ शववाहकसम्भारवाहकानां बहुत्वात्तदपेक्षया शिखाबाहुल्य मस्तीत्याहुः। तदयुक्तम् । संस्कर्ता मुक्तशिखः इति एकवच- नानुपपत्तेः । तदात्वे संस्कर्तृशवादिवाहका मुक्तशिखा इत्येव वक्तव्यत्वात् । न च तथैवतात्पर्यमिति वाच्यम् । संस्कर्तेति तन्मात्रेण सामानाधिकरण्यानुपपत्तेः, तदात्वे उत्तर सूत्रे "पश्चात् सम्भारानितर" इतीतरग्रहणानुपपत्तेः संस्कर्तृशववाहकभिन्न परत्वादितरशब्दस्य, तस्मात् पूर्वोक्तव्याख्यैव श्रेयसी ॥

०३६.मध्यतः शवम् ॥ (०१.०२.०३)

इति मध्ये शवं वहन्ति सपिण्डाः। तेऽपि मुक्तशिखाः। मध्यशब्दस्याद्यन्त सापेक्षत्वादग्निसम्भारयोर्मध्ये शव ऊह्यते। प्राचीनावीतिभिः सपिण्डैरपि तेन तत्पूर्वाणां प्रेताधानौपासन- होमवेदजपादिप्राजापत्यहोमानां यज्ञोपवीतत्वं बद्धशिखत्वं च सिद्धम् । नन्वत्र सूत्रे सपिण्डशब्दो नोपादीयते ततः कथं तैः शव ऊह्यते? नैष दोषः। अग्न्याहरणं संस्कर्तुरेवाभिधत्ते । सम्भाराहरणमसपिण्डानामभिधास्यते । तस्मादत्र पारिशेष्यात् सपिण्डा एव शवं वहेयुर्नान्ये, तेषां त्वसपिण्डशववहने प्रायश्चित्तविधानात् ॥

०३७.अनुपृष्ठं सम्भारानितरे ॥ (०१.०२.०४)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । पश्चाच्छवस्यानुक्षीरादिसम्भारानसपिण्डा वहेयुः। कथमितरशब्देन असपिण्डवचनमुच्यते? उत्तरसूत्रे इतरशब्द-मुपदिश्योत्सर्गो विधीयते । तत्र यदीतरशब्दः सपिण्डवचनः स्यात्तदा तेषामुत्सर्गवचनात् प्रदक्षिणादावनुवृत्तिर्न स्यात् वचनादिति चेन्न; अत्रोत्सर्गविधानमदृष्टार्थं स्यात् असपिण्ड-वचने दृष्टार्थं स्यात् । "दृष्टे सम्भवत्यदृष्टकल्पना न न्याये"ति न्यायात् अत्रायमनुष्ठेयार्थः- संस्कर्ता मुक्तशिखः सन् प्राचीनावीती भूत्वाग्नीन् गृहीत्वा पुरतो गच्छेत्। सपिण्डास्तु प्राचीनावीतिस्सन्तः सस्कर्तुरनुशवं वहेयुः। शवमनुसम्भारा-नसपिण्डा वहेयुः। ननु शववोढृणामिव सम्भारवोढृणां किमिति प्राचीनावीतत्वमुक्तशिखत्वे न भवतः? उच्यते- प्राचीनावीति-शब्दस्य मुक्तशिखशब्दस्य च संस्कर्तृसपिण्डविशेषणत्वेन उपादानादनुपादेयगतस्य योग्यतया एकत्वस्य विवक्षितत्वात् संस्कर्तृसपिण्ड्यतिरिक्तविषये तयोः प्रसक्तिर्न भवति । केचित्तु संस्कर्तुरेव प्राचीनावीतत्वं मुक्तशिखत्वं च शववाहक सपिण्डानां सम्भारवाहकज्ञातिव्यतिरिक्तानां च प्राचीनावीतत्व-मुक्तशिखत्वे न स्तः सूत्रेऽनुक्तत्वादित्याहुः ॥

०३८.श्मशाने निहितेतरानुत्सृज्य दहनदेशं जोषयेत् ॥ (०१.०२.०५)

इति । इतरानसपिण्डान् श्मशाने निहिते प्राप्ते सति उत्सृज्य निर्गमय्य दहनदेशं दहनभूमिं जोषयेच्छोधयेत् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाक्यार्थस्तु संस्कर्ता दहनभूमिं प्राप्य असपिण्डान्निर्गमय्य दहनदेशं सम्यक् शोधयेत् ॥ अथ दहनभूमेर्लक्षणमाह –

०३९.दक्षिणाप्रत्यक्प्रवणमभङ्गुरमनिरिणमसुषिरं समं वा ॥ (०१.०२.०६)

इति । दक्षिणाप्रत्यक् निर्ऋतिदेशः, प्रवणं निम्नम्, अभङ्गुरं–विदारणावर्जितम्, अनिरिणम्–अनूषरम्, असुषिरं–बिलवर्जितम् एभिः विशेषणैः युक्तं दहनदेशं कल्पयेत् । दक्षिणा प्रत्यक्प्रवणत्वं प्रागुदग्देशस्य उन्नतत्वमन्तरेण न सम्भवतीत्यर्थात् प्रागुदग्देशस्योन्नतिं कल्पयति निर्ऋतिदेशस्य निम्नत्वमावश्यकमिति ब्राह्मणमाह– "पश्चाद्दक्षिणाप्रवणं श्मशानकरण"मित्युक्त्वा "यथा सव्यस्तथा श्मशानकरण" मिति । अस्यार्थः– यथा प्राङ्मुखस्य पुरुषस्य सव्यपाणिः दक्षिणाप्रत्यग्देशो निम्नो भवति तथा श्मशानं करणीयम् । तदसम्भवे समप्रदेशं वा दहनस्थानं कल्पयेत् ॥ अथ प्रयोगमाह –

०४०.प्राणायामं कृत्वास्य गोत्रेण द्वितीयान्तं प्रेतस्य नामोक्त्वा दहनकर्मणा संस्करिष्य इति सङ्कल्प्य ॥ (०१.०२.०७)

इति । शवस्य गोत्रेण सहितं नाम द्वितीयान्तमुक्त्वा ब्रूयान्न केवलं द्वितीयान्तं नाममात्रं ब्रूयात् किन्तु गोत्रसहितं काश्यपगोत्रं यज्ञशर्माणं प्रेतं दहनकर्मणा संस्करिष्ये इतिवत् सङ्कल्पं कुर्यात् । सङ्कल्पकाले औपासनाग्निनेत्यग्निविशेषं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पैतृमेधिकविधिनेत्यादि सङ्कल्पविशेषं च वदन्ति ये ते सूत्रकारवृत्तिकाराभ्यां विरुद्धत्वात् उपेक्षणीयाः॥

०४१.शमीशाखया पालाशशाखया वा दक्षिणाप्रत्यक्प्रवण चितादेशात् प्रागुदीच्यां दिश्युपक्रम्य पञ्चदशप्रक्रमान् प्रक्रम्योत्सृज्यान्ते ॥ (०१.०२.०८)

इति । चिते चित्या चिति श्मशानदेशमित्यनर्थान्तरम् । देशः स्थानं चितायाः देशश्चितादेशः दक्षिणाप्रत्यक्प्रवणश्चासौ चितादेशश्च दक्षिणाप्रत्यक्प्रवणचितादेशः, तस्माद्दक्षिणाप्रत्यक् प्रवणचितादेशात् । अत्राऽभिविधौ वर्तते । आदक्षिणाप्रत्यक् प्रवणचितादेशादिति प्रक्रम्य शमीशाखया पालाशशाखया वा प्रागुदीच्यान्दिश्यारभ्य दक्षिणाप्रत्यग्देशपर्यन्तं पञ्चदश-प्रक्रमान् प्रक्रम्य मिनुयात् । पञ्चदशप्रक्रमे गते यत्रकुत्रचित् समीपे तां शाखामुत्सृजेत् अन्तःशब्दोऽत्र समीपवचनः॥

०४२.अप उपस्पृश्य ॥ (०१.०२.०९) इति स्पष्टम् ॥

०४३.गच्छाग्रमध्वनः पूर्वमेष वः सुहृदो दिवं परं व्योम नयध्वं गच्छन्तं स्थानमुत्तममिति श्मशानायतनं निरीक्ष्य ॥ (०१.०२.१०)

इति एतन्मन्त्रमुक्त्वा श्मशानस्थानं पश्येत् । अयं मन्त्रो निरीक्षणे एव विनियुज्यते । अनुमानपरत्वे सूत्रविरोधः स्यात् । ये अनुमानसाधन एष मन्त्र इति वदन्ति ते सूत्रविरुद्धत्वात् निरस्ताः॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

०४४.शमीशाखया पालाशशाखया वारणशाखया वा श्मशानायतनं सम्मृज्यापसर्पत प्रेता ये केचिदिह पूर्वजा इति ॥ (०१.०२.११)

इति । अनेन मन्त्रेण तिसृणामन्यतमया शाखया श्मशानदेशं सम्यक् शोधयेत् ॥

०४५.दक्षिणतः शाखामुत्सृज्य ॥ (०१.०२.१२)

इति । दक्षिणस्यां दिशि सम्मार्जनशाखामुत्सृजेत् ॥

०४६.अप उपस्पृश्य ॥ (०१.०२.१३) इति स्पष्टम् ॥

०४७.अद्भिरवोक्ष्य ॥ (०१.०२.१४)

इति । श्मशानस्थानमिति शेषः॥

०४८.तिस्रः कर्षूः दक्षिणापवर्गाःखात्वा॥ (०१.०२.१५)

इति । अपवर्गो समाप्तिवचनः। दक्षिणस्यान्दिशि यथा समाप्यते तथा तिस्रः कर्षूः खन्यात् । कर्षूरिति बहुवचनेनैव त्रित्वे सिद्धे तिस्रः इति ग्रहणं स्पष्टार्थम् ॥

०४९.उद्धृत्य मृत्तिकां पलाशपत्रपुटे कृत्वा ॥ (०१.०२.१६)

इति । कर्षूस्थमृत्तिकामादाय, पलाशपत्रपुटे (पलाशस्य पत्रं पलाशपत्रं तस्य पुटं पलाशपत्रपुटं तस्मिन् पलाश पत्रस्यान्तःप्रदेशः पत्रपुटशब्देनोच्यते) कृत्वा प्रक्षिप्य प्रक्षिपेदित्यर्थः। एतदुक्तं भवति–कर्षूषु स्थितां मृत्तिकामादाय पलाशपत्रस्य अन्तः प्रदेशे निदध्यात् ॥

०५०.याम्यां दिशि निरस्यति ॥ (०१.०२.१७)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति मृत्तिकासहितं पलाशपर्णं दक्षिणस्यां दिशि निदध्यात् ॥

०५१.अप उपस्पृश्य ॥ (०१.०२.१८) इति स्पष्टम् ॥

०५२.तिलतण्डुलानां मुष्टिं पूरयित्वा यमाय दहनाधिपतये पितृभ्यः स्वधा नम इत्यवटे प्रथमायां निवपेत् ॥ (०१.०२.१९)

इति । तिलांश्च तण्डुलांश्च तिलतण्डुलास्तेषां मुष्टिं गृहीत्वेति अध्याहियते । प्रथम इत्यभिधातव्ये स्त्रीलिङ्ग-निर्देशश्छान्दसः। एवमुत्तरयोरपि सूत्रयोः स्त्रीलिङ्गनिर्देश-श्छान्दस इति दृष्टव्यम् । वाक्यार्थस्तु तिलतण्डुलान् मुष्टिं पूरयित्वा गृहीत्वा यमायेति मन्त्रेण उत्तरस्मिन्नवटे निदध्यात् ॥

०५३.कालाय दहनाधिपतये पितृभ्यः स्वधा नम इति द्वितीयायाम्, मृत्यवे दहनाधिपतये पितृभ्यः स्वधा नम इति तृतीयायाम् ॥ (०१.०२.२०)

इति । इदं स्पष्टम् ॥

०५४.अवशिष्टांस्तिलतण्डुलांश्च सर्वतः प्रसव्यं प्रकीर्य ॥ (०१.०२.२१)

इति । कर्ष्वर्थमाहृतेषु तिलतण्डुलेषु येऽवशिष्टास्तिल-तण्डुलाः तान् सर्वत्र श्मशाने दहनदेशे (सप्तम्यर्थे तसिल् प्रत्ययः) प्रसव्यमप्रदक्षिणं प्रकिरेत् ॥

०५५.मध्यमे हिरण्यशकलमवधाय ॥ (०१.०२.२२)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । मध्यमे द्वितीये अवट इत्यर्थः। तस्मिन् हिरण्यशकलं निदध्यात् ॥

०५६.आज्यबिन्दून्वा । दक्षिणाग्रान्दर्भानास्तीर्य तेषु याज्ञिकैः काष्ठैर्दक्षिणाग्रैर्दारुचितिं चित्वा ॥ (०१.०२.२३)

इति । तेष्ववटेषु याज्ञिकैः काष्ठैरश्वत्थादिभिर्दारुचितिं चित्वा चिनुयात्। दारुचितिशब्दोऽत्र करीषादेर्निवर्तको भवति । याज्ञिककाष्ठानां तृतीयान्तत्वे न [खी]गुणभूतत्वात्तदभावे यैः कैर्दारुभिः कर्तव्या तुषोपवापन्यायेन । ततश्च याज्ञिकाभावेऽपि अन्यैरपि काष्ठैश्चितिं कुर्यात् ॥

०५७.प्रेतस्य केशश्मश्रुलोमनखानि गृहीत्वा दक्षिणतो वितस्तिमात्रमवटं खनित्वा तस्मिन्निधायाप उपस्पृश्य ॥ (०१.०२.२४)

इति । चितेर्दक्षिणतः, वितस्तिर्द्वादशाङ्गुलम् ॥

०५८.आहिताग्निश्चेद्वपनं कारयित्वा ॥ (०१.०२.२५)

इति । प्रेतो यद्याहिताग्निः स्यात्तदा वपनं कारयेत् । अत्राहिताग्नेर्विशिष्टवपनविधानात्तद्गतं पुंस्त्वं विवक्षितं भवति । तेनाहिताग्निपत्नीनां वपनं नास्तीति सिद्धम् । आहिताग्नेः केशानवटे निधाय पश्चाद्वपनं कारयेत् । अनाहिताग्नेस्तु केशादिकमेवावटे निधेयम् अत्र द्वितीयार्थे प्रथमा। आहिताग्नेः प्रेतस्य वपनं कारयेत् । आहिताग्नेर्वपनविधानात् अनाहिताग्नेः

खी–१.तच्छ्रवण २.न गुणभूतत्वात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

केशादीनामेकदेशमात्रं गृहीतव्यमिति साधितं भवति॥

०५९.स्नापयित्वा शवम् ॥ (०१.०२.२६.) इति । स्पष्टम् ॥

०६०.चितिञ्चाद्भिरवोक्ष्य ॥ (०१.०२.२७)

इति । च शब्दाच्छवमभ्युक्ष्येत् ॥

०६१.शवमुत्तानं दक्षिणाशिरसं समारोप्य ॥ (०१.०२.२८)

इति । चितेरुपरीति शेषः ॥

०६२.तं परिस्तीर्य ॥ (०१.०२.२९)

इति । तं शवं परिस्तृणुयात् । परिस्तरणप्रकारस्तु पश्चाद्दर्भान् आस्तीर्येत्यादिना गृह्ये ये पक्षा उक्तास्तेषामन्यतमप्रकारेण परिस्तरणं कार्यम् । तेन दक्षिणाग्रत्वमप्रदक्षिणं च वदन्तो निरस्ताः ॥

०६३.पश्चाद्दक्षिणाग्रेषु दर्भेषु पात्राण्यासाद्य ॥ (०१.०२.३०)

इति । चितेः पश्चाद्दक्षिणाग्रान् दर्भानास्तीर्य तेषु पात्राणि कपालचमसप्राशित्रहरणादीनि सादयेत् । एतदुक्तं भवति दधिक्षीरमधुघृततिलतण्डुलपात्राणि च स्रुवं जुहूमपि पृथक् सादयेत् ।

०६४.आस्ये चक्षुषोर्नासिकयोः श्रोत्रयोश्च सप्तहिरण्यशकलानाज्यबिन्दून्वा सप्तव्याहृतीर्मनसा ध्यायन्निरस्यति ॥ (०१.०२.३१)

इति ।आज्यहिरण्यशकलयोर्व्रीहियववद्विकल्पः। एकैकया व्याहृत्यैकैकस्मिन् स्थाने हिरण्यशकलमाज्यबिन्दून् वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निरस्यति प्रक्षिपति । चक्षुश्रोत्रनासिकानां मध्ये दक्षिणाङ्ग-प्राथम्यं न्यायसिद्धम् । तच्च स्त्रीपुरुषयोरवशिष्टमत्रैवं प्रयोगः- भूरित्यास्ये, भुवरिति दक्षिणचक्षुषि, स्वरिति सव्ये, मह इति दक्षिण[खु]नासिकायां, जनरितीतरस्यां, तप इति दक्षिणश्रोत्रे, सत्यमितीतरस्मिन् । कथं प्राणायामप्रभृत्येतदन्तं संस्कर्ता एव कुर्यात्? कृत्वा सङ्कल्प्य इत्यादौ त्वा प्रत्ययपूर्वकविधि-निचयानामन्ते निरस्यतीत्येकवचनदर्शनात्, संस्कर्तृशब्दस्य प्रत्यक्षपठितत्वेन सन्निहितत्वाच्च ॥

०६५.एवमाज्यम् ॥ (०१.०२.३२)

इति । यथा व्याहृतिसप्तकैः सप्तसु प्राणस्थानेष्वाज्य-हिरण्याभ्यामन्यतरं निहितं तथाज्यमपि सप्तसु प्राणस्थानेषु निधेयम् ॥

०६६.आहिताग्नेस्तु यावन्ति सम्भवन्ति तावन्ति सादयेत् । (१.२.३३)[खू] इति स्पष्टम् ॥

०६७.मुखे प्रथमं निनीय पादप्रभृत्यामुखान्ताच्च सन्ततं शेषम् ॥ (०१.०२.३४)

इति । प्राणस्थानेषु निरसनार्थं गृहीतस्याज्यस्य यच्छिष्टं तदादाय मुखे किञ्चिन्निनीय ततः पादावारभ्य मुखपर्यन्तं सन्ततमविच्छिन्नं यथा तथा धारया निनयेत् । अत्राऽभिविधौ

खु-१.नसि २.नासिकायाम् । खू-१.त्रिंशत्तमे सूत्रे व्याख्यानान्तर्भूतम् २.एतत्सूत्रत्वेन परिगणितम्।

वर्तते । अन्तःशब्दः पर्यन्तवचनः । च शब्दस्तु शब्दार्थे । तेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होमपात्राद्भिन्नं निरसनपात्रमिति गम्यते । ततश्चाज्यपात्रद्वयं हिरण्यशकलपक्षेऽप्यस्तीत्युक्तं भवति । हिरण्यशकलपक्षानभ्युपगमेऽपि पात्रद्वयमासादनीयम् । यदा वैकल्पिकाज्यपक्षस्वीकारस्तदा मुखे प्रथमं निनीयेत्येतद्भवतीति न भ्रमितव्यम्। एवमाज्यमित्यनन्तरं तस्य पठितत्वात् ॥

०६८.शिरस्तः पात्रं प्रक्षिपति ॥ (०१.०२.३५)

इति । शिरःप्रदेशे तत्पात्रं प्रक्षिपेत् ॥

०६९.एवं दधिमधुतिलतण्डुलांश्च प्रत्यस्यति ॥ (०१.०२.३६)

इति। यथाज्यमास्यादि सप्तस्थानेषु निनीय पादावारभ्यामुखान्तं चानुनीय शिरःप्रदेशे पात्रं प्रक्षिपति तथा दधिमधुतिलतण्डुलान् प्रत्यस्येत् । तिलांस्तण्डुलानपि सादनकाले पृथक् पात्रयोरासादयेत् । यवीयाः कृष्णतिलास्त्वेतस्मात्पात्रात् पात्रान्तरे आसाद्याः॥

०७०.आहिताग्निश्चेदेतस्मिन्काले पात्राण्यासाद्य ॥ (०१.०२.३७)[खे]

इति । प्रेतो यद्याहिताग्निः स्यात् यज्ञपात्राण्येतस्मिन्काले आसाद्यानीत्यर्थः। [छन्दसि बहुलमिति शेर्लुक्] आसादयेत् इत्युक्तं भवति । आसादनप्रकारस्तूत्तरत्र विस्तरेण वक्ष्यामः ॥

०७१.अथ सपिण्डाः स्त्रीप्रथमाः कनिष्ठपूर्वाः सिग्वातेन वातं प्रयच्छन्ति ॥ (०१.०२.३८)

खे–अस्मिन्नेव सूत्रे निदानसूत्रस्यापेक्षा वर्तते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । अथ शब्दोऽधिकारार्थः। इतः परं सपिण्डाना-मधिकारो न पूर्ववत्; क्तप्रत्ययनिचयानामन्ते एकवचनदर्शनात् सपिण्डशब्दस्य प्रत्यक्षतः पाठाभावाच्च । स्त्रियः प्रथमाः येषां ते स्त्रीप्रथमाः, कनिष्ठाः पूर्वाः येषां ते कनिष्ठपूर्वाः ते वक्ष्यमाणं कुर्युः। स्त्रीषु कनिष्ठपूर्वत्वमत्रानादरणीयं पुरुषेषु तु सर्वकनिष्ठस्य पूर्वभावित्वमत्रोच्यते नान्येषाम्, तेन सर्वकनिष्ठ व्यतिरिक्तानां पूर्वापरभावोऽनादरणीय एव । न च सपिण्डानां सिग्वातप्रदानविधानात् संस्कर्तुः वात प्रदानविधिः नास्तीति शङ्कनीयम् । संस्कर्तुरपि सापिण्ड्यसद्भावात् । नन्वसपिण्डस्य संस्कर्तृत्वेऽपि सिग्वातप्रदानादिर्न भवति सपिण्डानामेव विधानात् । उच्यते, यदि सिग्वातप्रदानादि कर्मणां सपिण्ड-शेषत्वेन विधानं स्यात् तर्हि भवेदेतदेवम् । अत्र भूतभव्य न्यायेन कर्मणः प्राधान्यात् सपिण्डानां तच्छेषत्वेन गुणभूत-त्वम् । तेन गुणभूतसपिण्डाभावेऽप्यसपिण्डेनापि संस्कर्त्रा प्रधानभूतसिग्वातादिकं कर्तव्यं गुणलोपेन प्रधानलोपस्या-न्यायत्वात् । सिग्वातेन, वातमित्येकवचनद्वयमविवक्षितम् । स्वस्ववाससा सिग्वातैः वातान् प्रयच्छन्ति । परवासोभ्यः स्व खै स्ववाससां स्वात्मानं प्रति सन्निधानत्वात् शुद्धत्वाच्च । "आसनं शयनं वस्त्रं जायापत्यं कमण्डलुम् । शुचीन्यात्मन

खै–१.उपरितनवाक्यं नास्ति २.वाक्यमस्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतानि परेषामशुचीनि तु" ॥ इति स्वीयवस्त्रस्य स्वात्मानं प्रति शुचित्वम्; परं प्रति अशुचित्वमभिदधाति । स्वीयैरेव वासोभिः सिग्वातं प्रयच्छेयुरिति सिद्धम् ॥

०७२.ग्रामे पथि चितायान्तु ॥ (०१.०२.३९)

इति । सिग्वातप्रदानादि त्रिषु स्थानेषु कुर्युः। तु समुच्चयार्थः॥

०७३.सर्वं चितायां वा ॥ (०१.०२.४०)

इति । सिग्वातप्रदानादिसर्वं चितायां वा कुर्युः । यदा प्रथमपक्षः आश्रियते तदा सङ्कल्पात्प्रागेव द्वयोः स्थानयोः सिग्वातप्रदानादि कुर्युः। चितायामित्येतस्मिन् काले यदा द्वितीयपक्षः तदा अस्मिन्नेव काले कुर्युः॥ वातं प्रयच्छन्ती-त्युक्तं तत्प्रकारस्तूच्यते-

०७४.आयङ्गौरिति यामतृचस्य स्तोत्रीयाया स्तोत्रीयायान्ते अगन्मज्योतिरित्यभ्यस्येयुर्मृतं परियन्तः त्रिः प्रसव्यं सव्यतः केशान् प्रकीर्य दक्षिणानूरूनाघ्नानास्सिग्भिरवधून्वन्तः ॥ (०१.०२.४१)

इति । आयङ्गौरिति यामस्यैकां स्तोत्रियामुक्त्वा अगन्मज्योतिरिति ब्रूयुःस्तोत्रीयाया इति वीप्सया स्तोत्रीया त्रयमप्यस्तीति गम्यते । स्तोत्रीयाया इति वीप्सां वदतां अगन्मज्योतिरिति अस्य त्रिरावृत्तिरिति गम्यते । ननु सर्वस्वारक्रतौ यामसत्रस्यद्ध्यादिगानस्य विहितत्वात्तत्र

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

"तृचापत्तीति तृचाषु त्रिरितराणी"ति सामान्यसूत्रेणैव यामादीनां त्रिर्गानं प्रत्यक्षसिद्धमिति चेत् मैवम्; तत्र ऋतौ त्रिर्गानस्य सिद्धत्वेऽपि स्मार्तकर्मणि तन्न्यायस्यानुपपत्तेः। अत एव सायं प्रातर्होमादौ गौषूक्ताश्वसूक्तग्रहयज्ञसामादेस्सकृदेव गानम् । न च गौषूक्ताश्वसूक्तयोः श्रौतत्वेन गृह्यविहितत्वाभावात् त्रिर्गानमेव स्यादिति वाच्यम् । तथात्वेऽपि तयोः साम्नोः ऋतुप्रकरण-विधानाभावेन सामान्यसूत्रगोचरत्वात् । अन्यथा षड्विंशोक्ता-द्भुतशान्त्यादौ व्याहृतिभिर्हुत्वाथ सामगायेत् इत्यत्रापि त्रिर्गानापत्तेः।

न च अत एव सामविधौ "प्रतिभयेऽध्वनि देवव्रतमाद्यं गीत्वा मध्यममावर्तयेद्ततेऽध्वन्युत्तमं समापयित्वा विरमेत् । "नक्येनाकि इत्येतत् त्रिस्सप्तकृत्वो गायेदि" त्यादि विशेष-वचनमिति वाच्यम् । तथा सति रुद्रसंहिता, विष्णु-संहितादौ त्रिर्गानापत्तेः। पुत्रादेः "एतेषामेकमनेकं वा सर्वाणि वा प्रयु-ञ्जान" इति पर्यालोचनया सकृद्गानस्यैव प्रतीयमानत्वात् । तस्मात् ऋतुप्रकरणे सामगानविधौ तृचे त्रिर्वा गानमन्यत्र यथाविधि । द्विवारादि गणनाभावे सकृदेव सर्वत्र श्रौतविषये गानमिति । प्रकृते तु स्मार्ते कर्मणि यथासूत्रमेव गानं तथा च वीप्साबलात् सत्रस्यर्द्धिसाम्नस्त्रिर्गानं सिद्धम् । प्रेतं मृतं परियन्तस्त्रिः प्रसव्यमप्रदक्षिणं परियन्तः कुर्वन्तः प्रेतं त्रिरप्रदक्षिणं कुर्वन्त इत्यर्थः। सव्यतः केशान् प्रकीर्याप्रदक्षिणं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुर्वाणः सव्यपार्श्वस्थितान् केशान् विसृस्येति यावत् । सव्यतः केशान् प्रकीर्येति ब्रुवतो दक्षिणपार्श्वस्थानामुद्-ग्रथनमभिप्रेतं भवति । इतरथा [खो]सव्यत इत्यनुक्त्वा केशानित्येवावक्ष्यत् । सिग्भिरवधून्वन्तः सिग्वातं प्रयच्छन्तः एतदुक्तं भवति- स्त्रीप्रथमाः कनिष्ठपूर्वाः पुरुषाश्च[खो] सव्यपार्श्वस्थान् केशान् प्रकीर्य दक्षिणानुद्धृत्य दक्षिणानूरून् हस्तैस्ताडयन्तस्सव्यहस्तैस्सिग्वातं प्रयच्छन्तो गायेयुः। ततो यामस्य द्वितीयां स्तोत्रीयामुक्त्वा सत्रस्यर्द्धिं पठेयुः। अगन्मज्योतिरिति ब्रूयुः। तथा तृतीयां स्तोत्रीयामुक्त्वा सत्रस्यर्द्धिमपि गायेयुः। अप्रदक्षिण त्रयं च कुर्युः ॥

०७५.एवं स्तोत्रीयां समाप्यैवाप्रदक्षिणत्रयं प्रदक्षिणत्रयं च कुर्युर्वातास्ते वान्तु पथि पुण्यगन्धा मनश्शुभा गात्रशुभा अनुलोमास्त्वचःसुखा मांससुखा अस्थिसौख्या वहन्तु त्वा मरुतः सुकृतां यत्र लोका इत्यनेनानुमन्त्रयेरन्॥(०१.०२.४२)

इति । एवमप्रदक्षिणानि कृत्वा प्रदक्षिणत्रयं कुर्युः। प्रदक्षिणं कुर्वन्तो वातास्त इति मन्त्रेण प्रेतमनुमन्त्रयेरन् । केचिदगन्मज्योतिरित्यभ्यस्येत । वातास्त इत्यनेन अनुमन्त्रयेत इत्येकवचनान्ततया पठन्ति । तेषां मते संस्कर्तुरेव सामगान-मनुमन्त्रणञ्च । सपिण्डानान्तु तूष्णीमप्रदक्षिणप्रदक्षिणे केश-विस्रंसनग्रथनादि पक्षद्वयेऽपि समानम् । बहुवचनपाठे तु

खो-१.नास्ति २.एतद्वाक्यमस्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सर्वेषां सामगानानुमन्त्रणे भवतः। ननु बहुवचनपाठे बहुवचनस्य त्रित्वे पर्यवसानात् त्रयाणामेव अप्रदक्षिणप्रदक्षिणवातप्रदानानुमन्त्रणयामसत्रस्यद्ध्यादिगानं स्यात् । न च स्त्रियः प्रथमाः येषां, कनिष्ठाः पूर्वाः येषामिति विग्रहान्नवानां स्यादिति वाच्यम्, तर्हि तदधिकसपिण्डानामप्रदक्षिणाद्यभावप्रसङ्गात् । नवन्यूनसपिण्डानां च तानि न स्युरिति चेन्न, अत्रत्य बहुवचनजातस्य सम्भाविताशेषपरत्वात् सम्भावित जनपरत्वम् । नवन्यूनत्वे तदाधिक्ये च सम्भवतीति न दोषः। त्रिषु स्थानेष्विति ग्रामादिस्थानत्रयेषु वातप्रदानादि कुर्युरेकैकस्मिन् स्थाने अप्रदक्षिणत्रयं प्रदक्षिणत्रयं च कार्यम् । "सर्वं चितायां वे"त्यस्मिन् पक्षेऽपि पूर्वोक्तं सर्वमप्रदक्षिणनवकं प्रदक्षिणनवकं च यामतृचे सत्रस्यर्द्धेः त्रिरावृत्तिर्वातास्त इत्यस्याप्यावृत्तिः। केशविस्रंसनग्रथानाद्यावृत्तिश्च भवति । ग्राममार्गयोरेव निवृत्तिर्नान्येषाम् । केचित् प्रदक्षिणवेलायां दक्षिणकेशविस्रंसनं सव्योद्ग्रथनमभिधूननञ्च वदन्ति । एतत्सूत्रविरुद्धत्वात् उपेक्षणीयम् ।

॥ इति प्रथमपटलस्य द्वितीयः खण्डः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ प्रथमपटलस्य तृतीयः खण्डः ॥

०७६.अथ संस्कर्तोदकुम्भमादाय पत्नी वा ॥ (०१.०३.०१)

इत्यथ शब्दोऽधिकारार्थः।सपिण्डाधिकारो निवृत्तः। कर्तुरेवाधिकारःआखण्डसमाप्तेः। कर्तृपत्न्यो व्रीहियववद्विविकल्पः॥

०७७.दर्भेण्वं शिरसि निधाय मृतं पर्येति ॥ (०१.०३.०२)

इति । दर्भैः कृतमिण्वं दर्भेण्वं तच्छिरसि निधाय प्रेतं पर्येति प्रदक्षिणत्रयं कुर्यात् । येनोदकुम्भो धृतः तेनैव प्रदक्षिणं कार्यम् । कर्त्रा पत्न्या वेति । अत्र शिरसि दर्भेण्वनिधानमदृष्टार्थं न तु कुम्भधारणार्थम् । तदर्थत्वे दर्भेण्वं शिरसि निधाय तदुपरि कुम्भं निधाय इत्यध्याहारः क्रियेत, न चाध्याहारकल्पनया दृष्टार्थे सम्भवत्यदृष्टार्थत्वकल्पना न न्यायेति वाच्यम् । यत्र यत्र दृष्टार्थाभावेन अदृष्टार्थत्वकल्पना तत्र तत्र वाक्यान्तराध्याहारेण दृष्टार्थत्वे सम्भवत्यदृष्टार्थत्वकल्पनामुच्छिद्येत । अत्रायमभिप्रायः – उदकुम्भं हस्तेन धारयन् शिरसि दर्भेण्वं निधाय प्रदक्षिणं कुर्यात् ॥ प्रदक्षिणं कुर्वतः किञ्चिदितिकर्तव्यतां दर्शयति –

०७८.तमश्मना परशुना वाधस्तात्किञ्चित्प्रहरति ॥ (०१.०३.०३)

इति । तं कुम्भमश्मपरश्वोरन्यतरेण प्रहरेत् । प्रहरणं कुत्रेत्यपेक्षायामधस्तादित्युक्तम् । एतदुक्तं भवति–बुध्नसमीपे उदकं यथा धारया स्रवति तथा छिद्रं कुर्यात् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

०७९.तां धारामनुमन्त्रयेतेमा आपो मधुमत्योऽस्मिँस्ते लोक उपदुह्यन्तामक्षीयमाणास्स्वधा नम इति ॥(०१.०३.०४)

इति स्पष्टम् ॥

०८०.द्वितीयायां परिगतायामुपरिष्टात्किञ्चित्प्रहरति । तां धारामनुमन्त्रयेतेमा आपो मधुमत्योऽन्तरिक्षे ते लोक उपदुह्यन्तामक्षीयमाणास्स्वधा नम इति ॥ (०१.०३.०५)

इति परिगतं प्रदक्षिणमपसव्यमित्यनर्थान्तरम् । द्वितीयप्रदक्षिणे प्रथमछिद्रस्य उपरिष्टाच्छिद्रं कुर्यात् । शेषं गतार्थम् ॥

०८१.तृतीयायां परिगतायामुपरिष्टात्किञ्चित्प्रहरति । तां धारामनुमन्त्रयेतेमा आपो मधुमत्यः स्वर्गे ते लोक उपदुह्यन्तामक्षीयमाणास्स्वधा नम इति ॥ (०१.०३.०६)

इति तृतीयप्रदक्षिणे द्वितीयछिद्रस्योपरिष्टाच्छिद्रं कुर्यात् ॥

०८२.तिष्ठन्नेवोदकुम्भं पृष्ठतो विसृजेत् ॥ (०१.०३.०७)

इति । तृतीयप्रदक्षिणानन्तरमुदकुम्भमनवेक्षन् पृष्ठतो विसृजेत् येनोदकुम्भो गृहीतस्तेनैवेदं कार्यम् । एष उदकुम्भो यथा पृष्ठदेशे पतति तथा यत्नः कार्यः [खौ] इत्याह ॥

०८३.यदि पुरस्तात्पतति पापीयान् भवति यदि पार्श्वतः पुनः प्रेतकर्माश्नुते यदि पश्चाद्वसीयान् भवति ॥ (०१.०३.०८)

इति । कुम्भो यदि पुरस्तात्पतेत् दैवात्पृष्ठतो न पतेत्

खौ–१.नास्ति २.अधिकः पाठः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तदा कर्ता पापीयान् भविष्यति । यदि सव्यतो दक्षिणतश्च वा पार्श्वयोः पतति तदा अव्यवधानेनैव पुनरपि प्रेतकर्म प्राप्नोति कर्ता। यदि पृष्ठदेशे पतति वसीयान् कर्ता भविष्यतीति विद्यात्॥

अथ कर्तुः कृत्यमाह –

०८४.[खं]कपालस्थमुदकं प्रेतस्य प्राणस्थानेष्वाप्यायस्वेति निनयति ॥ (०१.०३.०९)

इति । यदि कुम्भो बहुविधाभग्नः स्यात्तदा तत्कपालस्थ मुदकं निनयेत् "आप्यायस्वसमेतु त" इत्यृचमुक्त्वा पृष्ठतो विसृष्टकुम्भस्य यस्मिन्कस्मिंश्चिदपि कपाले उदकं तिष्ठति तदुदकं गृहीत्वा आस्ये चक्षुषोरिति क्रमेण निनयेत् । एतत् प्रतिपत्तिकर्म । यदि तत्रोदकं तिष्ठति तदा निनयेत् । यदि न तिष्ठति तदा न निनयनं कार्यम्। निनयनस्य अप्रयोजकत्वात् ॥

०८५.कृष्णातिलैरवकीर्याङ्गुष्ठपाशौ छित्वाज्येन पराङ्मुखो हस्ताभ्यां सुरभिर्नाकपृष्ठं स्वधा नम इति मृतस्य पादावभ्यज्यार्द्रानोषधिवनस्पतीनालभ्योत्तिष्ठति ॥ (०१.०३.१०)

इति । तिलैरिति तृतीया द्वितीयार्थे भवति । कृष्णातिलान् मृतस्य उपर्यवकीर्य अङ्गुष्ठबन्धसूत्रे आच्छिद्यात् । शवमनवेक्षन्नेव हस्ताभ्यामाज्यमादाय सुरभिरिति मन्त्रेण शवस्य पादावभ्यज्यात् । तत आर्द्रानोषधिवनस्पतीनशुष्कौषधिवनस्पतीनालभ्य उत्तिष्ठति कर्ता ॥

खं–१कपालस्थ २.कुम्भमध्यगत ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

०८६.पयसा हस्तौ प्रक्षाल्यादित्यं पश्यति गां पश्यति ब्राह्मणान् पश्यति ॥ (०१.०३.११) इति स्पष्टम् ।

०८७.सुवर्णमालभ्य प्रेतं कुशैश्छादयित्वा दहेत्तस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनरसौ स्वर्गाय लोकाय स्वाहेत्यसौ शब्दे प्रेतस्यनाम सम्बुध्यन्तेन गृहीत्वा शरीरेऽग्निं संयोजयेत्॥ (०१.०३.१२) इति । सुवर्णं स्पृष्ट्वा शवं कुशैराच्छाद्य तस्मात्त्व-मिति मन्त्रेण दहेत् । कथं दहेदित्यत आह- शरीरेऽग्निं संयोजयेदिति दहेदित्यस्य विवरणम् इतरथा पौनरुक्त्यं स्यात्। अग्निमित्येकवचनमविवक्षितम् । यस्य यावन्तोऽग्नयस्तान् सर्वान् युगपच्छरीरे प्रक्षिपेत् । अथवा एकत्वं विवक्षितमेव । सर्वेषामग्नीनां संसर्गे कृते पृथग्भावो नोपपद्यते । एतदुक्तं भवति-सर्वानग्नीनेकीकृत्य शरीरे प्रक्षिपेत् । एकीकरणार्थमेव अग्निमित्येकवचनं प्रयुक्तम्॥

०८८.अथोपस्थानम् ॥ (०१.०३.१३)

इति । अग्निसंयोजनानन्तरमुपस्थानमेव कर्तव्यं नान्यत् इति वक्तुमथशब्दः प्रयुक्तः। केचिदग्निसंयोजनानन्तरमाज्या-हुतीः कर्तव्येति वदन्ति, ते सूत्रविरुद्धत्वादुपेक्षणीयाः॥

उपस्थानप्रकारमाह -

०८९.नाकेसुपर्णमिति ग्रामेगेयं गायेत् ॥ (०१.०३.१४)

इति । वेदसामनि[ख] पठितं साम गायेदित्यर्थः ॥

ख:-१.वेदसाम्नि २.वेदसामनि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

०९०.धूम उदिते त्वेषस्ते धूम ऋण्वतीति॥ (०१.०३.१५)

इति । धूमे जाते त्वेषस्त इति धूमं पश्यन् गायेत् ॥

०९१.प्रज्वलितेऽग्ने मृडमहाँअसीति द्वाभ्याम् ॥ (०१.०३.१६)

इति । अग्नौ प्रकर्षेण ज्वलिते सति अग्ने मृडेति द्वाभ्यामुपतिष्ठेत इत्यर्थः॥

०९२.अगन्मज्योतिरिति च ॥ (०१.०३.१७)

इति । एतदपि ज्वलिते गायेदिति वक्तुं चशब्दः प्रयुक्तः। नाकेसुपर्णमित्यादीनां त्रिरावृत्तिं केचिदिच्छन्ति । तेषां किं मूलमित्यन्वेषणीयम् ॥

०९३.दहनमन्त्रेणाज्याहुतिं हुत्वा ॥ (०१.०३.१८)

इति । तस्मात्त्वमिति मन्त्रेणाज्याहुतिं जुहुयात् । जुहोतीति वक्तव्ये हुत्वेति वचनं "व्यत्ययो बहुल"मिति बहुलग्रहणाद्भवति ॥

०९४.यथोक्तं सामगानामनुगीतो ब्रह्मलोकमवाप्नोति ॥ (०१.०३.१९)

इति । [ग]यथोक्तमिति यथासाध्यमिति समासः[ग]। अत्र गेयानां साम्नां नाके सुपर्णमित्यादीनां गानमनुगानानन्तरं गीतः प्रेतो ब्रह्मलोकं प्रपद्येत । अत्रायमभिप्रायः- सामानि कर्त्रा सम्यगुक्तानि चेत् प्रेतस्य ब्रह्मलोकप्राप्तिर्नान्यथेति ॥

०९५.वामदेव्यं तृचे गीत्वा नमो वःपितर इत्युपांशु जपित्वा ॥

ग-एतद्वाक्यन्नास्ति । २.विशेषं वाक्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(०१.०३.२०)

इति । आज्याहुत्यनन्तरं वामदेव्यं तृचे गीत्वा नमो वः पितर इत्युपांशु जपेच्छूषायेति मन्त्रान्तो गृह्यते । तथैव प्रतिपादितत्वात् । अत्र तृचग्रहणं कुर्वतः सूत्रकारस्य नाके सुपर्णमित्यादीनां सकृद्ग्रानमभिप्रेतं भवति ॥

०९६.तूष्णीं प्रदक्षिणं कृत्वा ॥ (०१.०३.२१)

इति । दह्यमानं शवमिति शेषः। तूष्णीं वाचं यच्छन्नित्यर्थः॥

०९७.आचार्याय वरं ददाति ॥ (०१.०३.२२)

इति । आचार्योऽत्र श्रेष्ठस्तस्मै वरं दद्यात् । वरशब्देन गौरुच्यते । "गौर्वैवरः" इति श्रुतेः। तत्र पूज्यब्राह्मणमाहूय तस्मै गां दद्यात् कर्तेत्यर्थः॥

०९८.चितान्नावलोकयन्ति जनान्नावलोकयन्ति॥ (०१.०३.२३)

इति । वरदानानन्तरं श्मशानं न पश्येयुः। तत्र स्थितान् जनानपि न पश्येयुः॥

॥ इति प्रथमपटलस्य तृतीयः खण्डः ॥

॥ अथ प्रथमपटलस्य चतुर्थः खण्डः ॥

अवलोकनं कैर्न कर्तव्यमित्यत्राह–

०९९.भ्रातृपुत्रा अस्यवंशे ये जीवन्ति ॥ (०१.०४.०१)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । भ्रातरश्च पुत्राश्च भ्रातृपुत्राः सपिण्डा इति यावत् । अस्य प्रेतस्य कुले ये सपिण्डा जीवन्ति ते सर्वेऽपि श्मशानस्थमनुष्यानपि न पश्येयुः॥ इतः परं बहुवचनं यत्र यत्र श्रुतं तत्र तत्र सर्वैः सपिण्डैः कर्तृसहितैः कार्यम् ॥

१००.शोकमुत्सृज्य कल्याणीभिर्वाग्भिः सात्विकाभिः कथाभिः पुराणैः सुकृतिभिः श्रुत्वाधोमुखा व्रजन्ति ॥ (०१.०४.०२)

इति। पुण्यरूपाभिर्वाग्भिः सात्विकाभिर्न्यायैरञ्जिताभिः कथाभिः पुराणैर्व्यासादिभिः प्रकीर्तितैर्महाभारतान्तर्गतेतिहासैः क्लेशानुत्सृज्य प्रह्वीभूता गच्छेयुः इत्यर्थः॥ किं स्थानं व्रजन्तीत्यत्राह –

१०१.अपः प्रतिपद्यन्ते ॥ (०१.०४.०३)

इति । उदकं प्रतिगच्छेयुः ॥

१०२.अत्र राजपुरुषस्सगोत्रमैथुनो वा कण्टकिनीं शाखामादाय ॥ (०१.०४.०४)

इति अत्र सगोत्रमैथुनः सगोत्रद्वन्द्वः कण्टकिनीं शाखां हस्तेन गृहीत्वा ॥

१०३.मावतरतेति तान्निवारयेत् ॥ (०१.०४.०५)

इति। न्यूनत्वात्सगोत्रद्वन्द्वे तु द्वाभ्यां मावतरतेति वक्तव्यम्। राज्ञः पुरुषो राजपुरुषः, सगोत्रमैथुनः प्रेतस्य सगोत्रद्वन्द्वः समानगोत्रौ द्वौ राजपुरुषो वा ब्रूयात् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०४.न पुनरवतरिष्याम इति प्रतिब्रूयुः ॥ (०१.०४.०६)

इति । सपिण्डा इति शेषः ॥

१०५.केशान् प्रकीर्य तेषु पांसुनोऽप्येकवाससो दक्षिणामुखाः सकृदुपमज्योत्तीर्याचम्य सव्यं जानुमवधाय वासः पीडयित्वा द्वितीयान्तं प्रेतस्य [गा]नाम गृहीत्वाऽमुं वास उदकं प्राप्नोत्विति [गि]एवं त्रिः, तथा प्रत्यहम् ॥ (०१.०४.०७)

इति । अत्र केशान् प्रकीर्येत्यादि वदतोऽयमभिप्रायः- सङ्कल्पप्रभृत्यथ सपिण्डा इत्येतदन्तं मुक्तशिखेन कार्यम् । अथ सपिण्डा इत्येतदारभ्य अथ संस्कर्तोदकुम्भमित्येतदन्तं सव्यकेशविस्रंसनदक्षिणकेशग्रथनञ्च कार्यम्[गी] । उदकुम्भ-दानादि प्रतिब्रूयुरित्येतदन्तं बद्धशिखैः कार्यम् । केशान् प्रकीर्य तेषु पांसुनोऽप्येत्याद्येतत् तिलोदकान्तं मुक्तशिखैः कार्यमिति ॥

सपिण्डा एकवाससो दक्षिणामुखाः जलं प्रविश्य सकृदवगाह्य तीरं प्रत्यागत्य आचम्य सकृदुदकं पीत्वा सव्यं जानुशिरसं भूमौ निधाय द्वितीयाविभक्त्या प्रेतस्य नाम गृहीत्वा प्राप्नोत्विति वासः पीडयेयुः। नन्वमुमित्यनेनैव प्रेतनाम्नो द्वितीयाविभक्तिसिद्धेर्द्वितीयान्तं"प्रेतस्य नाम गृहीत्वा" इति वाक्यस्य अपार्थकत्वं प्रसज्येत । उच्यते, यद्येतावद्वाक्यं क्रियेत तर्हि अदश्शब्दस्य स्थाने कस्य नाम गृहीतव्यमिति संशयः स्यात्; तन्निराकरणार्थमेतद्वाक्यम्। किञ्चैतद् वाक्या-

---

गा-१.नामोक्त्वा । गि-१.नास्ति २.अधिकं वाक्यम् । गी-२.वाक्यसँयोजनम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

करणे प्रेतस्य गोत्रमपि वक्तव्यं स्यात् अत्र गोत्रमपि केचिद्व-दन्ति, तैस्तु वेदोऽपि वक्तव्यं स्यात्, अनुक्तत्वाविशेषात् ॥

सव्यञ्जानुमवधाय वासः इत्यत्रैकत्वं विवक्षितमेव । पीडनार्थ मेकवस्त्रान्तरोपादानासम्भवात् । सत्यम्, यदि पीडनार्थं वस्त्रान्तरमुत्तरीयार्थं स्यात्तर्हि सूत्रकारो अन्यद्वास इत्येवावक्षत्, न चोक्तं तत्र । स्व स्व वासांस्येव पीडयेयुः । अत्र नामधेयान्ते कर्तृभिरेतद्वास उदकमित्येतच्छब्दो [गु]अध्या-हर्तव्यः। एतच्छब्दस्य अध्याहारे पूर्वाचारस्य प्रमाणत्वम् । आचम्येत्यत्र सकृदुदकं पीत्वा पुनः स्मृत्युक्तमाचमनं कार्यम्। न च वस्त्रोदकदानस्य विध्यभाव इति वाच्यम् । ऐकादशाहा दित्यस्योभयशेषत्वेन व्याख्यास्यमानत्वात् दशस्वहस्सु वस्त्रोदकं कर्तव्यम् ॥

१०६.एवं तिलमिश्रमुदकमुत्सृजन्तीति॥ (०१.०४.०८)

यथा वस्त्रोदकस्य त्रिरावृत्तिरेवं तिलोदकस्यापि त्रिरा-वृत्तिरस्तीति वक्तुमेवंशब्दः प्रयुक्तः। तिलैर्मिश्रं तिलमिश्रं, तिलानां विशेषणत्वाद्विशेषणीभूततिलाभावे विशिष्टोदकदानं न कार्यम् । तत्र तिलोदकविधिपरे वाक्ये बहुवचनदर्शनात् । केशान् प्रकीर्येति त्वाप्रत्ययनिचयैः प्रतिपादितपदार्थस्य सर्वसपिण्डानां कर्तव्यत्वं सिद्धं भवति ॥ नन्वेवंशब्देन वस्त्रोदकधर्मस्य सर्वस्यातिदिष्टत्वात् मन्त्रोऽपि तथैव भवति

गु–उदाहर्तव्यः २.अध्याहर्तव्यः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्याशङ्क्याह–

१०७.अस्य गोत्रेणामुष्मै प्रेतायैतत्तिलोदकं ददामीति ॥ (०१.०४.०९)

इति । अत्र गोत्रग्रहणं कुर्वतः सूत्रकारस्य वस्त्रोदक पीडने गोत्रग्रहणं न कर्तव्यमित्यभिप्रायः। ननु षष्ठ्यन्तस्येदं शब्दस्य प्रयोगाभावेऽपि प्रकृतत्वात् प्रेतस्यैव गोत्रनामनी वक्तव्ये । सत्यम्, स्पष्टार्थमुक्तम् । तथापि शाखान्तराध्यायिनां मातामहादीनां श्राद्धादिकं कर्ता स्वशाखोक्तविधिना ददाति । एवमत्रापि इदंशब्दाभावे कर्तृगोत्रग्रहणं कर्तव्यमिति भ्रान्तिः स्यात् । तन्निराकरणार्थमिदं शब्दस्य षष्ठ्यन्तस्य ग्रहणं कृतम्। न च गोत्रेणेति तृतीयाविभक्तिग्रहणात् प्रदानकालेऽपि तथैव कर्तव्यमिति[गू] शङ्कनीयम् । तिलोदकप्रदानकाले न केवलं नामगृहीतव्यं किन्तु गोत्रेण सहैव नामगृहीतव्यमिति वक्तुं तृतीया निर्देशः। ननु तर्हि तत्र प्रातिपदिकादुपरि का विभक्तिर्वक्तव्येति न विद्मः। उच्यते, "चतुर्थी वरणे दाने" इति स्मृतिवचनात् चतुर्थीविभक्तिः वक्तव्या नान्येति सिद्धम् । चतुर्थ्यन्तस्यादरशब्दस्य स्थाने प्रेतस्य नाम तथैव विभक्त्या वक्तव्यम् । अतः पुल्लिङ्गवचनमविवक्षितम् । तेन स्त्रीणां स्त्रीलिङ्गतया विपरिणामः कर्तव्यः उदकपीडने तिलोदकेऽपि । वस्त्रोदकपीडनन्तु त्रिगुणीकृतेन सदर्भेणाधो वस्त्राञ्चलेन

गू–१.नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्युपदेशः॥

१०८.एवमहरहरञ्जलिनैकोत्तरवृद्धिः ॥ (०१.०४.१०)

इति । यथा प्रथमेऽहनि तिलोदकदानं [गृ]कृतं तथा प्रतिदिनं कार्यम् । एवमहरहरिति द्विर्वचनेन तिलोदकदानस्य नित्यत्वं प्रतीयते ।"दक्षिणेन पाणिना कृत्यमनादेशे" इति वचनात् दक्षिणहस्तेन तिलोदकदाने प्राप्ते तदपवादार्थ-मञ्जलिग्रहणं कृतम् । अञ्जलिभिरिति वक्तव्ये अञ्जलिना इत्येकवचनपाठस्तु छान्दसः । चोदकत्वात् सामान्याभिप्रायो वा । अञ्जलिनेति सिद्धवादः। अन्यथानुपपत्योत्पत्तिवाक्येऽपि अञ्जलिग्रहणमस्तीति कल्प्यते । तेन कर्ता प्रथमेऽहनि अञ्जलिभिरुदकदानं त्रिभिः। तत उत्तरेष्वेकैकाधिक्येन तर्पणे वृद्धिः कार्या इति प्रतीयते । उत्तरशब्दोऽधिकवचनः एकेनोत्तरा एकोत्तरा, एकोत्तरा वृद्धिः एकोत्तरवृद्धिः। एतदुक्तं भवति-प्रथमेऽहनि त्रयोऽञ्जलयः, द्वितीयेऽहनि चत्वारि, तृतीयेऽहनि पञ्च, चतुर्थे षट्, पञ्चमे सप्त, षष्ठेऽष्टौ, सप्तमे नव, अष्टमे दश, नवमे एकादश, दशमे द्वादश इत्येवं प्रकारेणाञ्जलि-वृद्धिः कार्या । केचित् सपिण्डैः प्रतिदिवसमञ्जलित्रयमेव कार्यमिति वदन्ति । ते केशान् प्रकीर्येति सूत्रकारेण निरस्ताः॥

ननु अहरहरिति द्विर्वचनेन वीप्सया जलाञ्जलीनां नित्यत्वं प्रतिपादितम्। अग्निहोत्रादिवत्तथा च यावज्जीवमनुष्ठेयं

गृ-१.नास्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्यादित्यत्राह –

१०९.ऐकादशाहात् ॥ (०१.०४.११)

इति । आङ् अत्र मर्यादायां वर्तते । तेन दशसु दिनेषु जलाञ्जलिः कार्या न त्वेकादशेऽहनि । नन्वेवं यावदाशौच-मिति वक्तव्यं न तु ऐकादशाहादिति । सत्यम्, तथापि ऐकादशाहादित्यनभिधाने द्वादशरात्राद्याशौचेषु जलाञ्जलीनां तावत्पर्यन्तमनुवृत्तिः स्यात् तन्निवृत्यर्थमैकादशाहादित्युक्तम् ।

ननु त्रिरात्राद्याशौचेषु आशौचादूर्ध्वमप्युदकदानं कर्तव्यं भवेत् अवधिभूतस्य एकादशाहस्य अनागतत्वात् । उच्यते, ऐकादशाहादित्येतत् पञ्चसप्तत्यञ्जलीनामुपलक्षणम् । तेन दशाहादर्वाचीनेषु आशौचेष्वपि पञ्चसप्तत्यञ्जलयः प्रदेयाः इत्युक्तं भवति । अत्रायमनुष्ठेयार्थः–प्रथमेऽहनि चतुर्विंशत्य-ञ्जलयो, द्वितीये पञ्चविंशतिः, तृतीये षड्विंशतिः। अथैवं प्रकारः केनावगम्यते? इति चेत्; उच्यते, भानुस्त्रिंशत्त्रय-स्त्रिंशदित्यादि स्मृतिषु विस्पष्टत्वात् । किञ्च ऐकादशाहा-दित्येतत् सर्वेष्वाशौचेषु मर्यादां प्रतिपादयति । दशरात्रादि गुर्वाशौचेषु दशमेऽहनि समापयितव्यम् । त्रिरात्रादि लघ्वा-शौचेषु तत्तदन्त्येऽहनि । तेन सर्वाशौचेषु एकादशाहात् प्रागेव तिलोदकानि समापयितव्यानीति वक्तुमैकादशाहादित्युक्तम् ॥

ननु दर्शो यद्याशौचमध्ये आपतति तदा सर्वाञ्जलीन् विगणय्य यथैकोत्तरवृद्धिर्भवति तथा कुर्युः। एतदुक्तं भवति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थेऽहनि यदि दर्श आपतेत्तदा पञ्चाधिकसप्तत्यञ्जलीन् एकोत्तरवृद्धिर्यथा भवति तथा विभज्य दद्युः। एवं पञ्चमादिषु अहस्वपि योज्यम् । दर्शादूर्ध्वभाविनामञ्जलीनां दर्श एवापकर्षो विधीयते नान्यासु तिथिषु । "दशाहमध्ये दर्शश्चेत् पिण्डदानं तिलोदकम् । विना पितृभ्यामन्येषां दर्श एव समापयेत् ॥ दशाहमध्ये विधुसंक्षयश्चेद्दद्युर्दशाहं तिलवारि मिश्रम् । पुत्रीसुतो दत्तकमौरसश्च शेषाः सुतास्तत्र समापयेयुः॥ दशाहमध्ये संक्रान्तिर्दर्शो वाथ भवेद्यदि । तोयं पिण्डं समाप्येत तद्दिने त्वौरसेतरैः॥ सपिण्डैः कृतचूडस्य कार्याः पिण्डोदकक्रियाः। मध्ये दर्शे च सङ्क्रान्तौ तत्र तासां समापनम्" ॥ इति वचनात् दर्श एवेत्यवधारणात् दर्श एव तदूर्ध्वभाविनामप्यपकर्ष नान्यत्र इति सिद्धं भवति । ननु तत्रैव प्रथमे वचने "विना पितृभ्यामि"ति पर्युदासः कृतः। तेन जनकजननीव्यतिरिक्तानामाशौचान्तदर्शे तदुत्तरभाविनां तिलोदकपिण्डदानमपकृष्य कुर्युः। न सत्यां जनकजनन्योः। त्रिरात्रमध्ये यदि दर्श आपतेत् तदा विना पितृभ्यामिति वचनात् नापकर्षणम् । त्रिरात्रादूर्ध्वदर्शे तयोरप्यपकर्षः। "पित्रोराशौचमध्ये तु यदि दर्शः समापयेत् । तावतैवोत्तरं तन्त्रं पर्यवस्येत् त्र्यहात्परम्"॥ इति कालादर्शवचनात् । केचिदौरसादन्यदत्तककर्तृके तदिति वदन्ति ते सम्बन्धिशब्दनिर्दिष्टस्य पितृशब्दस्यार्थमजानन्तो निरस्ताः। पितृशब्दस्त्वौरसमपेक्ष्यैव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नान्यान्। एवं मातृपितृव्यादिशब्दा अपि । पित्रोरिति द्विर्वचनेन जनकजनन्यौ गृह्येते । तयोरपि त्रिरात्रादूर्ध्वभाविनि दर्शे समापयेयुः, न तु त्रिरात्रमध्ये । यदि दर्शसमागमे जनक-जनन्योर्यावदाशौचमुदकदानानुवृत्तिरस्तीत्युक्तं तदा औरसाति-रिक्तैः सपिण्डैः समापनीयं स्यात् । उच्यते,-तैरपि यावदाशौचमुदकदानमौरसैः सार्धं कार्यं न दर्शे समापनीयम् शिष्टाचारविरोधात् । न च शिष्टाचारप्रामाण्यं नास्तीति वाच्यम्। **वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥** इति । अलौकिकाविगीत-शिष्टाचारस्य प्रामाण्यात् ॥

ननु पिण्डदानं तिलोदकमिति वचनात् तिलोदक-पिण्डदानसमापनेऽपि वस्त्रोदकं यावदाशौचं कर्तव्यं स्यात् अपकर्षविध्यभावात् । सत्यम्, वस्त्रोदकस्य अपकर्षकविधि-र्नास्ति तथापि तदन्तन्यायेन पिण्डदानस्यापकर्षे तेन वस्त्रोदकदानस्यापकर्षः सिद्धो भवति ॥

एतेन सञ्चयनमपि व्याख्यातम् । तदूर्ध्वभाविना-मुदकादीनामपकर्षे सञ्चयनमपि दर्शे एव कर्तव्यम् । ननु सञ्चयनस्यापि पिण्डपितृयज्ञन्यायेन स्वकालस्य विद्य-मानत्वात् दर्शव्यतिरिक्तदिने कर्तव्यत्वं भवेदुच्यते । उत्पत्ति-वाक्ये कालादिनिरपेक्षं कर्ममात्रमुपपन्नम् । तत उत्पन्नस्य कर्मणः कालाकाङ्क्षायां व्युष्ट इत्यादिना कालः प्रतिपादितः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते च कालाः दर्शोत्तरभाविनश्चेत् बाधितव्याः। तदन्तन्यायेन दर्शे पिण्डान्तस्यापकर्षे सञ्चयनस्य तन्मध्यपातिनोऽपि अपकर्षः सिद्धो भवति । यदा दर्शे सञ्चयनमपि अपकृष्यते तदा संशयः। अपकृष्यमाणान् तिलोदकादीन् सर्वान् कृत्वा सञ्चयनं कर्तव्यम्। सप्तानामह्नां यावन्ति वस्त्रोदकानि तावन्ति विगणय्य कृत्वा सञ्चयनं कृत्वा अवशिष्टस्याह्नो वस्त्रोदकादीन्यपकृष्टव्यानि इति किन्तावत् प्राप्तम्? सञ्चयनं कृत्वा अवशिष्टस्याहः तिलोदकानि समापयेयुः। प्रकृतौ सञ्चयनोत्तरकालेऽपि तिलोदकादेः दर्शनात् ततः सप्ताहावधिकस्य तिलोदकानि कृत्वा सञ्चयनमपि कृत्वा अवशिष्ट तिलोदकानि कुर्यादिति प्राप्ते विधीयते, सर्वाणि पिण्डतिलोदकादीनि समाप्यैव सञ्चयनं कार्यम्, सञ्चयनोत्तरकालमुदकस्थानं प्रति गमनस्य निषिद्धत्वात् । किञ्च स्वस्थानविवृद्ध्या वस्त्रोदकादौ क्रियमाणे सति सञ्चयनस्य मध्यपतितत्वं दुरापास्तम् । न च "दण्डकलितवदावृत्यैव" सञ्चयनस्य मध्यपातित्वमिति वाच्यम् । "उदकक्रियास्थानं तदहर्वर्जयेयु"रिति पूर्वोक्तप्रतिषेधस्य तदवस्थत्वात् तस्मात् दण्डकलितवदावृत्तिपक्षे स्वस्थानविवृद्धिपक्षेऽपि सञ्चयनस्य पश्चाद्भावित्वं सिद्धम् ॥ अथ वेदादिप्रभृतीनां पदार्थानामविशेषेण सर्वत्र प्रसक्तावाह–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

११०.अनुपेतानां कुमारीणां च सम्मार्जनदहनोदकक्रिया एव समन्त्रकास्तूष्णीमितरत् ॥ (०१.०४.१२)

इति धर्मशास्त्रे येषां दहनं चोदितं तेषां पूर्वोक्तं सर्वं प्रवर्तते न तु खननादि संस्कारवताम् । कुमारीशब्देन अनूढा एवोच्यते । तेन मासादावूढानामेतन्न भवति। किन्तु वेदादि पदार्थजातं सर्वं गृहस्थवद्भवति । एतदुक्तं भवति ऊढानां वयोऽवस्थाप्युदकं सम्मार्जनमन्त्रः अपसर्पतेति, तस्मात्त्वमधि जातोऽसीति दहनमन्त्रः,उदकक्रियामन्त्रः प्रसिद्धः। उदकक्रिया शब्देन वस्त्रोदकतिलोदके अभिहिते, विशेषेणानुपादानात् । तेन वास उदकतिलोदके समन्त्रके स्याताम् ॥

इतरदिति शब्दस्य निर्दिष्टप्रतिनिर्देशकत्वात् एतस्मात् सूत्रात् पूर्वोक्तमेवामन्त्रकं प्रतीयते नान्यत् । गृतेन वक्ष्यमाण "स्त्रीप्रथमा" इत्यादिना विहिताः सर्वे अनुपनीतानामकृत-विवाहानां स्त्रीणां च न भवति । ततः पिण्डदाननवश्राद्ध-सञ्चयनादयोऽपि न भवन्ति । अस्मत्सूत्रकारस्यायमभिप्रायः-कश्चित् आज्याहुतौ तस्मात्त्वमिति मन्त्रमिच्छति तस्मै तूष्णीमितरदित्येतत्सूत्रकार आचक्षीत ॥

१११.ज्ञातयः सर्वे वास उदकमुत्सृजन्ति तिलोदकं च ॥ (०१.०४.१३)

इति उत्सृजन्तीत्यध्याह्रियते । च शब्दस्तु शब्दार्थे ।

गृ-१.अत्र विद्यमान २.तेन वक्ष्यमाण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्ञातीनां मध्ये [गे]यस्य यस्य यावन्त्यहानि शुचित्वं न भवति तस्य तस्य तावान्येवाहानि वस्त्रोदकतिलोदकानि स्युः न तु कर्तृशुचित्वपर्यन्तमित्यर्थः। ननु चोदकादेव ज्ञातीनां वस्त्रोदकादिदानस्य प्राप्तेः एतत्सूत्रमनारम्भणीयं स्यादुक्तार्थ-त्वात् । उच्यते, –परिसङ्ख्यातमेतत् सूत्रम् । अयमर्थः- [गै]ज्ञातीनां वस्त्रोदकतिलोदकान्येव भवेयुः नान्यत्सिग्वात-प्रदानादि । नन्वेवं "केशान् प्रकीर्ये"त्याद्यपि परिसङ्ख्यातमेव भविष्यति अज्ञातिकर्तृकत्वात् सिग्वातप्रदानादिवत् इति चेन्न । केशान् प्रकीर्येत्येवमादीनां वस्त्रोदकस्याङ्गत्वात्प्रधानेन सहाङ्गान्यपि प्रवर्तन्त इत्यदोषः॥

११२.स्त्रीप्रथमा कनिष्ठपूर्वा अप्रतीक्षा ग्राममायान्ति ॥ (०१.०४.१४)

इति । स्त्रियः प्रथमाः येषां ते स्त्रीप्रथमाः, कनिष्ठपूर्वो येषां ते कनिष्ठपूर्वा अप्रतीक्षाः पृष्ठभागमनीक्षन्तो ग्रामं गच्छेयुः ॥

११३.प्रतिपदं ग्राममनुगच्छेयुः ॥ (०१.०४.१५)

इति । पदशब्दः पादवचनः । पादं पादं प्रतिपदं ग्राममनुसृत्य गच्छेयुः॥

११४.गृहं प्रविश्याश्मानं गोमयं गौरसर्षपमित्युपस्पृशन्ति ॥ (०१.०४.१६)

गे–२.यस्य यस्य । गै–१.सपिण्डानां २.ज्ञातीनां ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । इति शब्दश्च शब्दार्थः । तेनायमर्थः अश्मानं च गोमयं च गौरसर्षपं च उपस्पृशेयुः॥

११५.गृहद्वारपार्श्वे गोमयेनोपलिप्ते गन्धपुष्पधूपदीपैर्नालिकेरैर्माल्यैश्चालङ्कृत्य ॥ (०१.०४.१७)

इति । इतः परं खण्डशेषपर्यन्तस्य प्रयोगस्य संस्कर्तुरेवाधिकारः न सपिण्डानाम् । अलङ्कृत्येत्यादीनां त्वा प्रत्ययानां ददातीत्येकवचनान्तेनाख्यातप्रत्ययेनाक्षिप्तकर्त्रा च सहान्वयः सुस्पष्टः। गृहस्य द्वारं गृहद्वारं, तस्य पार्श्वं गृहद्वार-पार्श्वं, तस्मिन्नित्यर्थः। उपलिप्ते इति भूतनिर्देशात् नावश्यकमेतस्मिन् काले उपलेपनं कार्यमिति प्रतीयते । ततश्च गृहप्रवेशनात् प्रागेव कर्तृव्यतिरिक्तैः कैश्चिदसपिण्डजनैरुपलेपनं कार्यमित्युक्तं भवति । गृहद्वारपार्श्वे गन्धादीनि निदध्यान्नालिकेरमाल्यैरिति बहुवचनात्त्रीणि माल्यानि त्रीणि नालिकेराणि च निधेयानि ॥

११६.शरावं तदुपर्यश्मानं च निधाय ॥ (०१.०४.१८)

इति स्पष्टम् ॥

११७.नवं पात्रमादाय गन्धोदकैः पूरयित्वावटसमीपे निधाय ॥ (०१.०४.१९)

इति। प्रकृत्यनुपादानाद्यस्मिन्कस्मिंश्चित्पात्रे गन्धोदकानि पूरयित्वा अवटस्योपरि शिक्यं कृत्वा तस्योपरि क्षीरपात्रं निधाय तदुपरि दधिपात्रं निदध्यात् । एतेषां पात्राणां निधान-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मदृष्टार्थम् । तेषामत्र [गो]प्रतिपत्तिविधानाभावेऽपि लोकाचारात् तत्र प्रतिपत्तिः कल्प्यते । तेनाशौचस्य चरमेऽहनि यत्रकुत्रचित् उत्सृष्टव्यानि ॥

११८.अत्र चोदकदानमन्त्रेण वासः पीडयित्वा ॥(०१.०४.२०)

इति । अत्र शब्देन शरावाश्मानावभिधीयेते मण्डूक-प्लुतिन्यायेन । इतरथा शिक्यमेव परामृश्येत इति स्यान्न चेष्टापत्तिः बहुविधस्मृतिविरोधप्रसङ्गात् । च शब्दस्तु शब्दार्थः तेन पूर्वोक्तवस्त्रोदकस्य भेदोऽस्तीति गम्यते । कस्तर्हि भेदः? उच्यते, तत्र त्रिवारमत्रैकवारं सङ्ख्या विशेषाश्रयणात् । ननु उदकदानमन्त्रेणेति सामान्येन मन्त्रातिदेशात् वस्त्रोदकदान-मन्त्रयोर्विकल्पः प्रसज्येत इति चेन्नैष दोषः। सम्भवन्त्यां गतावष्टदोषदुष्टविकल्पाश्रयणस्य अयुक्तत्वात् गत्यभावस्थल एवाष्टदोष दुष्टविकल्पाश्रयणात् तदुक्तं भट्टाचार्यैः- "एवमेवाष्टदोषा--यत् व्रीहियववाक्ययोर्विकल्प आश्रितः। तत्र गतिरन्या न विद्यत" इति । अत्र तूदकदानमन्त्रेणेति सामान्योक्तावपि तिलोदकदानमन्त्रातिदेशेनैतत्सूत्रमर्थवत् न वस्त्रोदकदानमन्त्रातिदेशेन तदतिदेशमन्त्रस्य वासःपीडने विनियोजिततया स्वतः प्राप्तत्वेन सूत्रस्य आनर्थक्यप्रसङ्गात् विकल्पपक्षेऽष्टदोषः तदवस्तः। अत्रायमनुष्ठेयार्थः-चतुर्थी-विभक्त्या गोत्रनामनी निर्दिश्य एतद्वासउदकं ददामीति वासः

गो-१.प्राप्तमिति प्राप्ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पीडयेत्, तिलोदकशब्दस्थाने वास उदकमिति मन्त्रसन्नामः कार्यः। मन्त्राणामनुष्ठेयार्थस्मारकत्वात् वस्त्रन्तु स्वेन धृतमेव । वस्त्रान्तरोपादाने प्रमाणाभावात् ॥

११९.पूर्ववदुदकक्रियामन्त्रेण पिण्डन्निधाय ॥ (०१.०४.२१)

इति । तिलोदकदानमन्त्रेणेत्यर्थः। पूर्ववदुदकक्रियावत् गृहे वस्त्रोदकं यथा पाषाणे दत्तमेवं गृहे पाषाणे देयः। तथा च शङ्खः-"पिण्डं गृहद्वारपार्श्वे पूर्ववदुपले ददाती"ति । पिण्डोऽपि लौकिकाग्निपक्वेन द्रव्येण कार्यः। अस्मिन् सूत्रे पिण्डद्वयमभिहितम् । याज्ञवल्क्यः पिण्डत्रयम् । विष्णुस्तु ब्राह्मणस्य दशपिण्डाः, क्षत्रियस्य द्वादश इत्याशौच दिन-सङ्ख्यया पिण्डसङ्ख्यामभिधत्ते। केचित्तु दशपिण्डाः दश-बलय इति वदन्ति । अत्र शिष्टाचारानुसारेण विष्णूक्तपक्ष एव गृहीतव्यः॥

१२०.ब्राह्मणान्भोजयित्वाऽऽशिषो वाचयित्वा यथाशक्ति दक्षिणां ददातीति कृशहारीत इति ॥ (०१.०४.२२)

इति । पिण्डदानं कृत्वा त्र्यवरान् ब्राह्मणान् भोजयित्वा तैराशीर्वादं कारयित्वा तेभ्यो यथाशक्ति हिरण्यादि दद्यादिति । कृशहारीत ग्रहणं पूजार्थं न तु विकल्पार्थम् । केचित्तु तिलोदकमिव ब्राह्मणभोजनेऽपि ऐकादशाहादेकोत्तरवृद्धिरिति वदन्ति तेषां मते हारीतग्रहणं विकल्पार्थम् । तत्तु ब्राह्मणान् भोजयित्वेति वदतः सूत्रकारस्यानभिमतम् । अतो हारीतग्रहणं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूजार्थं न तु विकल्पार्थमिति ॥

॥ इति प्रथमपटलस्य चतुर्थःखण्डः ॥

अथ प्रथमपटलस्य पञ्चमः खण्डः ॥

१२१.अथ सञ्चयनं व्युष्टे द्विरात्रं त्रिरात्रं चतुरात्रं पञ्चरात्रं [गौ]सप्तरात्रं वा ॥ (०१.०५.०१)

इति । अथ शब्दः आनन्तर्यार्थः। दैवान्मानुषाद्वा प्रतिबलाद्दहनोत्कर्षप्रेतपिण्डदाने यदा अकृते तदा ब्राह्मण-भोजनाशीर्वचनदक्षिणादानानि च कृत्वैव सञ्चयनं कार्यं नान्यथेति वक्तुमथ शब्दः प्रयुक्तः। व्युष्टे निर्गते अतीत इति यावत् । प्रथमेऽहन्यतीते द्वितीयेऽहन्यस्थिसञ्चयनं कार्यम्। द्विरात्रमिति कर्मनाम । एते कालाः दाहापेक्षया भवन्ति । अनग्निमत उत्क्रान्तेरस्याग्नेः संस्कारकर्मणः शुद्धिः सञ्चयनम् । दाहान्मृताहस्तु यथातिथिरित्याङ्गिरसस्मरणात् ॥

१२२.स्नात्वोदकं दत्वा ॥(०१.०५.०२) इति । स्पष्टम् ॥

१२३.शरावमश्मानं च स्वस्थानादुद्धृत्यावटं पूरयित्वा यत्रकुत्र चिच्छराव मश्मानं च त्यजेत् पिण्डान्निधाय ॥ (०१.०५.०३)

इति । पिण्डस्त्वत्र न पाषाणे देयः परित्यक्तत्वात् । ननु शरावमश्मानञ्चोद्धृत्य इति उद्धरणमेवोक्तं न तु परित्यागः। ततः पूर्वस्मात् स्थानान्तरे निधाय तत्र पिण्डो देयः। सत्यम्,

---

गौ–१.नास्ति २.अधिकःपाठः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थानान्तरनिधानमपि नाभिहितमुक्तत्वाविशेषत्याग एव कार्यः कृतकार्याणां द्रव्याणां तथा दृष्टत्वात् ॥

१२४.अत ऊर्ध्वं निष्पीडनं वर्जयेत् ॥ (०१.०५.०४)

इति । सञ्चयनोत्तरं वस्त्रनिष्पीडनं न कार्यम् । ननु सञ्चयनादूर्ध्वं वस्त्र निष्पीडनस्य प्राप्त्यभावात्तस्य प्रतिषेधो अपार्थकः स्यात् । न च सव्यं जानुमवधाय वासःपीडयित्वेति प्राप्तव्यप्रतिषेध इति शङ्कनीयम्। तथा"प्रत्यह"मिति तं प्रतिदिनं कर्तव्यत्वावगमात् । नन्वेवं वचनं प्राक्सञ्चयनात् चरितार्थं तत ऊर्ध्वं बाध्यते । मैवम्, यदि सञ्चयनात्परमेतत् बाध्यते त"र्ह्यमुं प्राप्नोत्वि"त्येवं पदं तथा सञ्चयनात् इत्येवावक्षत् । नतु तथा प्रत्यहमिति; तथा न कृतं तस्मात् तस्य प्रतिषेधोऽनर्थकः। नाप्युदकमन्त्रेण वासः पीडयित्वेति विहितस्य प्रथम-दिवस एव विहितत्वात् । उच्यते, अन्यथानुपपत्या प्राप्तिं प्रकल्प्य अत्र निषेधेन शास्त्रमर्थवद्भवति । एतदुक्तं भवति- एतद्वासउदकं सञ्चयनपर्यन्तमनुवर्तते । तदुक्तं वामनकारिकायाम्- "अस्थिसञ्चयनात् कुर्यात् द्वारि वस्त्रोपपीडनम्" । इति ॥

१२५.शोकमुत्सृज्य भयं तन्द्रीं पाप्मानमलक्ष्मीन्निर्णोदयतु ॥ (०१.०५.०५)

इति । एवं मन्त्रमुक्त्वा शोकमुत्सृजेत् ॥

१२६.ब्राह्मणान् भोजयित्वाऽयुग्मान्प्रेतस्य ॥ (०१.०५.०६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । तृप्त्यर्थमिति शेषः। त्र्यवरान् ब्राह्मणान् प्रेतस्य तृप्त्यर्थं भोजयेत् । एतत् नवश्राद्धं न भवति । किन्तु प्रीतिभोजनमेव ॥

१२७.आचमयेत्[गं] ॥ (०१.०५.०७)

इति । भुक्तवद्भिर्ब्राह्मणैराचमनं कारयितव्यम् । ततः शुद्ध्यर्थमा चमने कृतेऽपि पुनरदृष्टार्थं सकृदाचमनं कार्यम्। एतद्वचनार्थवत्वाय ॥

१२८.उपांशूपतिष्ठतामिति ब्रूयात् ॥ (०१.०५.०८)

इति । भोजनानन्तरमुपतिष्ठतामिति उपांशु ब्रूयात् ॥

१२९.भुक्त्वैव दायादाः ॥ (०१.०५.०९)

इति । विध्यर्थे त्वा प्रत्ययः। प्रेतस्य गृहे ज्ञातयो भुञ्जीरन् । एवकारेण प्रेतस्य गृहे भोक्तव्यमेवेत्ययोग-व्यवच्छेदः प्रतिपाद्यते । न तेषामसपिण्डानामिव भोजन-प्रतिषेधोऽस्ति ॥

१३०.एकरात्रं वा ॥ (०१.०५.१०)

इति । रात्रिशब्दोऽहर्वचनः। आशौचमध्ये एकस्मिन्नहनि तैर्भोक्तव्यमिति शेषः॥

१३१.तैर्यावदहानि वा विवत्स्यन्ति ॥ (०१.०५.११)

इति । अपि वेति सम्बन्धः। यावन्त्यहानि प्रेतस्य गृहे विवत्स्यन्ति वर्तनं कुर्वन्ति वासं कुर्वन्तस्तावन्त्यहानि तैस्तत्रैव

गं–१.आचामेत् २.आचमयेत्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भोक्तव्यमित्यर्थः। एतदुक्तं भवति-भुक्त्वैव इत्येतत् सूत्रे ज्ञातीनां प्रेतगृहभोजनमनुज्ञायते । उपरितनसूत्रेण एकस्मिन् एवाहनि भोजनं कार्यं नान्यत्रेति प्रतिपादितम् । तत उपरितनसूत्रेण सर्वेष्वाशौचदिनेषु वा भोक्तव्यमिति प्रत्यपादि । अनयोः कल्पयोः कञ्चित्कल्पमाश्रित्य दायादान् भोजयेत् । तेषां भोजनेनापि प्रेतस्योपकारातिशयो भविष्यतीति कल्पनीयम् । एवं प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरति ॥

१३२.भुक्तवत्सु चितां व्रजन्ति ॥ (०१.०५.१२)

इति । ब्राह्मणेषु भुक्तवत्सु चितां श्मशानं प्रति सर्वे सपिण्डाः गच्छेयुः। अत्रेदं विचार्यते वक्ष्यमाणो होमः किं सञ्चयनाङ्गभूतम् उत न? कथं तत्प्रकरणे पठितत्वात् तदङ्गम्? यद्यङ्गत्वं न स्यात् तर्हि प्रकरणपाठो निष्प्रयोजनम् । तस्मात् सञ्चयनाङ्गमिति प्राप्तेऽभिधीयते । यदि सञ्चयनस्य अफलवत्वे प्राधान्यं भवेत् ततः तत्प्रकरणपठितः तदङ्गं स्यात् प्रोक्षणादिवत् संस्कारत्वादफलस्य कथं भावाकाङ्क्षैव नास्ति? इति । प्रकरणाभावात् अङ्गाङ्गित्वविचारोऽनुपपन्नः। तस्मात् गुणानां च परार्थत्वादसम्बन्धः। समत्वात्स्यादिति न्यायेन परस्परमङ्गाङ्गित्वं न सम्भवति । न च काकदन्तपरीक्षावत् अयं विचार इति शङ्कनीयम् । प्रतिकृत्यादि दाहे, नदीप्रवाहादिना स्थाननिर्गमनेऽपि एषः होमः कार्य एवेति वक्तुमयं विचारः। तेन विचारस्य तत्र महत्प्रयोजनमस्ति ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकृतमनुसरामः।

१३३.दहनाग्नेरुल्कामादाय ॥ (०१.०५.१३)

इति । उल्काशब्दो उल्मुकवचनःदहनाग्नेरेकदेशं प्रणीय तस्मिन् वक्ष्यमाणं कर्म कुर्यात् । केचिच्छालाग्निधिष्ण्या-दुल्मुकमादायेति पठन्ति तस्याप्ययमेवार्थः-शालाग्निधिष्ण्य शब्देन चित्याग्निरेवोच्यते । तस्मादेकदेशं प्रणीयेति ॥

१३४.उल्काभावे भस्माङ्गारं वा समारोप्य ॥ (०१.०५.१४)

इति । दहनाग्निरनुगतस्तदा तद्भस्मन्ययन्त इति मन्त्रेण भस्मनि वा अङ्गारे वा समारोप्य तत्र होमं कुर्यात् । यत्र समारोपणं विहितं तत्रायन्त इति मन्त्रो भवति, यत्रायन्त इति मन्त्रः तत्र उपावरोहेत्याद्यपि भवति ॥

१३५.निर्मन्थ्येन वा ॥ (०१.०५.१५)

इति । मथनेनाग्निमुत्पाद्य तत्र कुर्यात् । एतस्मिन् पक्षे भस्म समारोपणं न भवत्यनुक्तत्वात् । अत्र पक्षद्वयेऽपि प्राजा-पत्यान्तपञ्चकं प्रायश्चित्तमिच्छन्ति तत्र मूलं गवेषणीयम् ॥

१३६.भूमिग्रहणप्रपदाज्यभागोपस्तरणाभिघारणस्विष्टकृद्वर्जम् ॥ (०१.०५.१६)

इति । प्रधानहोमार्थं हविरवदानकाले उपस्तरणाभिघारणे प्रकृतौ विहितेऽत्र चोदकप्राप्ते निषिध्येते। उपस्तरणसाहचर्यात् अवदानार्थहविरभिघारणं निषिध्यते, नतु शृतमभिघार्येत्येतत्, स्विष्टकृत् प्रसिद्धम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३७.याम्यं चरुम् ॥ (०१.०५.१७)

इति । [गः]अनवसादित अन्नरूपमपक्वतण्डुलप्रकृतिकं चरुः। यमो देवता तस्य स याम्यः तन्निर्वपेदिति विशेषः॥

१३८.जीवतण्डुलं श्रपयित्वा ॥ (०१.०५.१८)

इति । तण्डुलस्वरूपं यथा नापैति तथा श्रपयेत् । अयमर्थः- यत्किञ्चित् तण्डुलस्वरूपनिवृत्तिरेव कार्या न सर्वात्मना । तथा च तण्डुलानां त्रिभागविक्लृप्तिः कार्या न चतुर्थांशस्येति ॥

१३९.दक्षिणोद्वास्य ॥ (०१.०५.१९)

इति । चोदकप्राप्तमुदगुद्वासनमत्र बाध्यते । अत्र दक्षिणोद्वासनं तु चरोरेव नत्वाज्यस्य । याम्यं चरुं जीवतण्डुलं श्रपयित्वा दक्षिणोद्वास्येति चरोः सन्निधानात् । यदा दाहाग्न्यभावेन निर्मन्थ्यादिपक्ष आश्रियते तदापि ब्रह्मा भवत्येव । अन्वष्टक्यादिवदेकान्तेन निर्मन्थनादेरविधानात् । अत्रायमनुष्ठेयार्थः-उल्लेखनादि सर्वमाहत्य विधानात् अन्यत्कर्तव्यम् । प्राचीनावीतत्वं तु प्रधानहोमेष्वेव कार्यः न प्राच्योदीच्याङ्गकलापेष्विति प्रागेवोक्तमिति नेह प्रतन्यते ॥

१४०.नाभिघार्य ॥ (०१.०५.२०)

इत्युद्वासनानन्तरभाव्यभिघारणञ्चोदकप्राप्तमत्रनिषिध्यते॥

१४१.एतास्सप्ताहुतीर्जुहोति ॥ (०१.०५.२१)

गः-१.नास्ति २.अस्ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । वक्ष्यमाणैः सप्तभिर्मन्त्रैः जुहोति । ननु पाठक्रमादेव सप्ताहुतौ सिद्धायां सूत्रमनर्थकम् । उच्यते,- सोमाय पितृमत, अग्नये पितृमत इत्याद्येकादशचतुर्थ्यन्ताः पठिताः तेषां पृथक्पृथङ्मन्त्रत्वभ्रान्तिः स्यात् तदपनोदनार्थ-मेतत्सूत्रम् । एतेन एकमन्त्रत्वमपि निरस्तम् । पितृमच्छब्दस्य मन्त्रत्वादेव विशेषणत्वं सुस्पष्टम् । यद्वा चोदकप्राप्त-व्याहृतिहोमनिवृत्त्यर्थं सप्तग्रहणम् । चतुरवदानपञ्चावदाने उपस्तरणाभिघारणाभ्यां सहैव प्रकृतौ सम्पद्येते । तेऽत्र चोदकप्राप्ते प्रतिषिध्यते । अत उपस्तरणाभिघारणमुक्त्वा हविषो वद्येन्मेक्षणेन मध्यात्पुरस्तादिति पश्चाच्च पञ्चावत्ती इत्येतत्प्रवर्तते । प्रत्यञ्जनं चाप्रतिषिद्धत्वात् वैवस्वतहोमानन्तरं प्रत्यञ्जनं न कर्तव्यम् । स्विष्टकृत् तदभावात्, एतदुक्तं भवति चतुरावत्तिनो मध्यात्पुरस्तादवदाय प्रत्यञ्जनं कृत्वा जुहुयुः। पञ्चावत्तिनस्तु पश्चाच्चावद्येयुः। यमाय त्वा जुष्टं निर्वपामीति निर्वापः याम्यं चरुमिति विधानात् । प्रक्षालनं सकृदेव सोमादीनां पितृत्वात् । "स्वाहा सोमाय पितृमते, स्वाहाग्नये पितृमते, स्वाहाग्नये क्रव्यादे, स्वाहाग्नये कव्यवाहनाय, स्वाहा यमाय, स्वाहा यमीयमाभ्यां, स्वाहा विवस्वत" इति स्यादेतत् स्वाहान्ता भवेयुः। मैवं, वैवस्वतहोमे स्वाहा शब्दो वक्तव्यो भवेत् । स एव दोषः सम्भवन्त्यां गतौ "पुरस्तात्स्वाहा कृतोऽन्ये देवा" इति श्रुतेः। सूत्रेषु विहिता देवाः पुरस्तात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाहाकारवन्तः। एवं सति सप्तमन्त्रस्यापि स्वाहाकारः पुरतः पाठत एव सिद्धं नानुषङ्गेण । हविःप्रक्षेपणं तु मन्त्रान्त एव न तु स्वाहाशब्दे । मन्त्रान्तैः कर्मादीनि सन्निपातयेदित्यभियुक्तवचनात् ।

१४२.स्वाहा सोमाय पितृमते, स्वाहाग्नये पितृमते, स्वाहाग्नये क्रव्यादे, स्वाहाग्नये कव्यवाहनाय, स्वाहा यमाय, स्वाहा यमीयमाभ्यां, स्वाहा विवस्वते ॥ (०१.०५.२२)

इति स्पष्टम् ॥

१४३.हुत्वा होमं समाप्य ॥ (०१.०५.२३)

इति । प्रधानाहुतीर्हुत्वा सर्वत्रोपरिष्टादित्याद्युक्तं कार्यम् । हुत्वेत्यस्यानन्तरमेव होमसमाप्तिं वदन् स्विष्टकृद्धोमाभावं ज्ञापयति। तेनैव सिद्धे ततस्स्विष्टकृद्वर्जमिति स्पष्टार्थं वचनम् । अत्र हविरुच्छिष्टमुदगुद्वास्य ब्रह्मणे न दद्यात् । अन्नान्यप्रतिपत्तेर्विद्यमानत्वात् तस्माद्धविःशेषप्राशनस्याभावः। समाप्येति ल्यपैतत् ज्ञायते होम सञ्चयनयोरेकमेव दिनमिति । कालस्तु उभयसाधारणः तेन सञ्चयनाभावे एतेष्वन्यतमकालेषु होमः कार्यः ॥

१४४.क्षीरोदकेनास्थीनि संसिच्य ॥ (०१.०५.२४)

इति । क्षीरञ्चोदकञ्च क्षीरोदकं द्वन्द्वैकवद्भावः। क्षीरोदकेन अस्थीनि संसिच्य सम्यक् प्लावयेत् । उष्णं यथा निवर्तते तथा क्षीरोदकेऽस्थीनि प्रक्षिपेत् । यदा बहुदिनयापनात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्थिषूष्णत्वाभावस्तदापि क्षीरोदकसेचनं कार्यमेव विहितत्वात् । न चैवमदृष्टार्थता स्यादिति शङ्कनीयं विरोधाभावेन उभयार्थत्वात् ॥

१४५.औदुम्बरसन्दंशेनोद्धरेत्पलाशसन्दंशेन वा ॥ (०१.०५.२५)

इति । औदुम्बरकाष्ठेन कृतस्सन्दंशः औदुम्बरसन्दंशः, पलाशकाष्ठेन कृतः पलाशसन्दंशः तयोरन्यतरेण ॥

१४६.शिरस्युरसि पार्श्वयोः पाण्योः पादयोश्चाष्टाङ्गान्यप्रदक्षिणानि गृहीत्वा ॥ (०१.०५.२६)

इति । निगदव्याख्यानमेतत् । अप्रदक्षिणानीति पादपाणिपार्श्वेषु एवमप्रदक्षिणं भवति ॥

१४७.दक्षिणतः पलाशपत्रपुटे कृत्वा ॥ (०१.०५.२७)

इति । दक्षिणस्यां दिशि पलाशपर्णस्यान्तः प्रदेशेऽष्टाङ्गानि निदध्यात् । अत्रायमनुष्ठेयार्थः-एकस्मात् स्थानात् अस्थि गृहीत्वा पलाशपर्णे निधाय पुनरन्यस्मात् स्थानादित्येवमुत्तरत्रापि योजनीयम् । पलाशपत्रं चैकमेवाष्टाङ्गानामेकेनैव धारयितुमशक्यत्वात् ॥

१४८.कुम्भे निदध्यात्(धाति) अनेन मन्त्रेण वहेमं भग्नं प्रच्छाद्य धौति भाति भानुनेति ॥ (०१.०५.२८)

इति । अनेन मन्त्रेण इति अन्वयं वक्तुमितिशब्देनैव सिद्धेः॥

१४९.एवं दधिघृतमधूदकानि च पूरयित्वा ॥ (०१.०५.२९)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । यथा अस्थीनि मन्त्रेण कुम्भे निहितानि एवं दध्यादीनि मन्त्रेण कुम्भे निधेयानि । प्रतिद्रव्यं मन्त्रावृत्तिः॥

१५०.पञ्चकुल्यैरभितो नामभिः ॥ (०१.०५.३०)

इति । कुल्यशब्दो नदीवचनः। पञ्चनदीनामभितः उपरि प्रक्षिप्तानि दध्यादीनि भवेयुः। एतदुक्तं भवति–अमुक स्थाने पर्यवस्थितदधि गङ्गेति ध्यायेत् । घृतं तु गोदावरी, मधु तावद्यमुना, उदकं तु कावेरी, हिरण्यशकलं भीमरथीति । एतैर्नामभिस्तु द्रव्यं प्रक्षिपेत् । प्रथमं वहेममित्युक्त्वा पञ्चानां नदीनां ध्यानम् ॥

१५१.हिरण्यशकलमुपरिष्टात् कृत्वा ॥ (०१.०५.३१)

इति । वहेममित्युक्त्वा नदीनाम ध्यात्वा कुम्भे हिरण्यशकलं निदध्यात् ॥

१५२.यावदस्थि किञ्चिद्धियेत तावत्स्वर्गे लोके महीयते ॥ (०१.०५.३२)

इति । "गङ्गायां वा यमुनायां वा कावेर्यं वा शुतुद्रितौ । सरस्वत्यां विशेषेण ह्यस्थीनि विसृजेत्सुतः"॥ इति स्मरणात् । तत्र वा प्रक्षेप्तव्यम् । तत्रापि स्वर्गे लोके महीयते इत्येतत् समानम् । केचित् पुण्यक्षेत्रेषु प्रक्षिपन्ति ते स्थलदूषकत्वात् निरस्ताः। अस्थिष्विति वक्तव्ये एकवचनं छान्दसम् । अस्थिषु मध्ये किञ्चिदस्थि यावत्कालं भूमौ निधीयते तावत्कालं स्वर्गे लोके प्रेतः पूज्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१५३.प्राग्वाहिनीं सरस्वतीं सङ्कल्प्य [घ]प्राचीं रेखामिल्लिख्य ॥ (०१.०५.३३)

इति । यथा कुम्भो निमज्जति तथा प्राचीं दिशं प्रति रेखामुल्लिखेत् । तां रेखां प्राग्वाहिनीं सरस्वतीमिति ध्यायेत् स्मरेत् । खननेदित्यर्थः ॥

१५४.उदकेन प्लावयित्वा तस्मिन्नस्थिकुम्भं प्लावयित्वा (स्थापयित्वा)॥ (०१.०५.३४)

इति । तां रेखामुदकेनापूर्य तत्रास्थिकुम्भं प्लावयेत् क्लेदयेत् ॥

१५५.वृक्षमूलेऽस्थिकुम्भं निदधाति ॥ (०१.०५.३५)

इति स्पष्टम् ॥

॥ इति प्रथमपटलस्य पञ्चमः खण्डः ॥

अथ प्रथमपटलस्य षष्ठः खण्डः ॥

१५६.अथ भस्म समूह्य ॥ (०१.०६.०१)

इति । अथ शब्दः आनन्तर्यार्थः। सञ्चयनान्तरमेव भस्म समूहनादि कार्यम् । अथ शब्दाभावे यत्र कुत्रचिद्दिने कर्तव्यं स्यात्, तन्निवारणार्थमथशब्दः प्रयुक्तः। समूहनकार्यमिदं प्रतिपत्तिकर्म । वाजिनवत् समूहनस्याप्रयोजकत्वात् भस्मोत्पादकत्वं न सम्भवति । एतत्तु सञ्चयनाभावे अपि कार्यं

घ–१.नास्ति २.अधिकः पाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भस्मनस्सद्भावात् ॥

१५७.भस्मराशिं कर्दमेन प्रच्छाद्य ॥ (०१.०६.०२)

इति । कर्दमशब्दः पङ्कवचनः ॥

१५८.उपरि शैवलेन प्रच्छाद्य ॥ (०१.०६.०३)

इति । शैवलशब्देन अवकोच्यते । पङ्कस्योपरीत्यर्थः ॥

१५९.वीरणस्तम्बं समूलं सशिखं तत्र प्रतिष्ठाप्य ॥ (०१.०६.०४) इति । वीरणस्तम्बं मूलाग्रसहितमादाय भस्मराशौ स्थापयेत् ॥

१६०.वीरणं करौ पुष्पवदात्मा ॥ (०१.०६.०५)

इति । एवं कृतवत् कर्ता पुष्पवद्भवेत् । संस्कर्तुः शरीरं पुष्पवन्मृदुर्भवतीत्यर्थः॥

१६१.पुष्पमयीं मृतप्रतिकृतिं कृत्वा ॥ (०१.०६.०६)

इति । पुष्पैर्भस्मोपरि मृतप्रतिकृतिं कुर्यादित्यर्थः ॥

१६२.पुष्पफलभक्षान् प्रकीर्य ॥ (०१.०६.०७)

इति । पुष्पाणि च फलानि च भक्षांश्च पुष्पफलभक्षान् तान् प्रतिकृतिसमीपे प्रतिकृतेरुपरि प्रकिरेत् । फलभक्षसाहचर्यात् भक्षाणां पुष्पाणां ग्रहणम् । केचित् सुगन्धिकुसुमानीत्याहुः ॥

१६३.तं [घा]चरुशेषं प्रेतराजाय नमः प्रेतायेति दत्वा ॥ (०१.०६.०८)

घा–१.चरुं २.चरुशेषं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । हुतशिष्टस्य प्रतिपत्तिरियम् । तमिति द्वितीयायाः सिद्धस्य परामर्शकत्वात् प्रेतायेत्यादिना चरुशेषं प्रतिकृति-समीपे निदध्यात् ॥

१६४.उदपात्रं पिण्डमूले निदध्यात् ॥ (०१.०६.०९)

इति । पिण्डशब्दोऽत्र पुष्पप्रतिकृतिवचनः। तत्समीपे उदपात्रं निनयेत् स्थापयेत् ॥

१६५.पूर्ववद्व्रजन्ति ॥ (०१.०६.१०)

इति । स्त्रीप्रथमाः कनिष्ठ पूर्वाः अप्रतीक्षाः ग्राममा-यान्ति, प्रतिपदं ग्राममनुगच्छेयुरिति सूत्रद्वयेनोक्तं पूर्वव-च्छब्देनोच्यते । एवं ग्रामं प्रति गच्छेयुः ॥

१६६.सञ्चित्योदकक्रियास्थानं तदहर्न गच्छेयुः॥(०१.०६.११)

इति । स्पष्टम् ॥

॥ इति प्रथमपटलस्य षष्ठः खण्डः ॥

अथ प्रथमपटलस्य सप्तमः खण्डः ॥

१६७.अथ दशमेऽहनि ॥ (०१.०७.०१)

इति । अथ शब्दः आनन्तर्यार्थः। दैवान्मानुषाद्वा प्रति-बलात् सञ्चयनहोमौ उत्कृष्य दशममहः प्राप्तं यदा तदोत्कृष्टं पूर्वोक्तं पदार्थजातं समाप्यैव वक्ष्यमाणं कर्तव्यमिति वक्तुमथ शब्दः प्रयुक्तः। दशमेऽहनीति आशौचान्त्यदिनोपलक्षणार्थः। तेनाशौचान्त्यदिवसे वक्ष्यमाणं कर्म कर्तव्यमित्युक्तम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६८.केशश्मश्रुलोमकर्मभ्यः शुद्धाः ॥ (०१.०७.०२)

इति । तृतीयार्थे पञ्चमी । केशश्मश्रुलोमकर्मभिर्वपनैः शुद्धाःभवेयुः। कथं वपनस्य शुद्धिहेतुत्वम्? इत्यत उक्तं स्मृत्यन्तरे "यस्य केशाः शिरो जाता दशमेऽहन्यवापिताः। सूतकं तस्य केशेषु लीयते नात्र संशयः॥ सूतके मृतके चैव वपनं दशमेऽहनि। यो न कारयते मोहात् सोऽनर्हःसर्वकर्मसु" इति ॥

१६९.स्नात्वाञ्जलीनां द्वादश दत्वाग्न आयूँषीत्यादित्यमुपस्थाय ॥ (०१.०७.०३)

इति । आदित्योपस्थानमात्रं विधेयमितरत् क्रमार्थमुक्तम्; न तु विधानार्थमन्यत एव सिद्धेः। ऋचश्चादिग्रहणेति न्यायेन एकां ऋचं ब्रूयुः ॥

१७०.पश्येम शरदः शतञ्जीवेम शरदः शतन्नन्दाम शरदः शतम्मोदाम शरदः शतम्भवाम शरदः शतं शृणवाम शरदः शतम्प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं जोक्च सूर्यं दृशे। य उदगान्महतोर्णवाद्बिभ्राजमानः सरिरस्य मध्यात्समावृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनात्विति सर्व एतन्मन्त्रं जपेयुः॥ (०१.०७.०४)

इति । दर्शे उदकदानाद्यपकर्षे आशौचान्त्यदिने वपनोत्तरकालं स्नात्वादित्योपस्थानादि कार्यम् । तत्रोदकदान आदित्योपस्थानयोर्यः क्रम उक्तः स एव बाध्यते क्रमवतः पदार्थस्याभावात् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१७१.श्मशानग्रामयोर्मध्ये महापथे वृक्षमूले वा॥(०१.०७.०५)

इति । निगदव्याख्यानमेतत् ॥

१७२.गोचर्मोत्तरलोमदक्षिणाग्रीवमास्तीर्य ॥ (०१.०७.०६)

इति । गोचर्माभावे सादृश्यात् कृष्णाजिनं व्याघ्राजिनं वा प्रतिनिधातव्यम् ॥

१७३.तस्मिन्नश्मानन्निधायाश्मन्युपविश्य ॥ (०१.०७.०७)

इति । तस्मिन् चर्मणि आसनं निधाय तत्रोपविश्य वक्ष्यमाणं होमं कुर्यात्। होमस्तु कर्तुरेव न सर्वेषाम्। कथम्? शिष्टाचारात् । एवं सञ्चयनचरुहोमभस्मसमूहनाद्यपि ॥

१७४.लौकिकाग्नौ पूर्ववदाज्याहुतीर्हुत्वा ॥ (०१.०७.०८)

इति । सञ्चयनदेशे यो होम उक्तः तद्वत् । आज्य-शब्दोपादानात् चरुरत्र बाध्यते । पूर्वस्मिन् होमे ये मन्त्राः पठिताः यच्च द्रव्यं विहितं तदुभयं पूर्ववच्छब्देन प्रतिपाद्यते । तत्र द्रव्यं तावन्निवर्तकमसद्भावात् निवर्तते [घि]मन्त्रस्तु प्रवर्तते । प्रधानाहुतिसङ्ख्या स्वगुणभूतसङ्ख्यया सहैव प्रतिदिश्यते । तेन स्वाहेत्यादि सप्तमन्त्रैः सप्ताज्याहुतय इति सिद्धम् ॥

ननु सञ्चयनहोमवत् सर्वममन्त्रं कर्तव्यं पूर्ववत् इत्युक्तत्वात् । मैवम्, तद्धर्मातिदेशेऽपि चरुधर्मास्तु कृष्णल-चर्ववघातवन्निवर्तन्ते । "नाज्यभागौ न स्विष्टकृदाज्याहुतिष्व नादेशे" इति वचनादेव आज्य भागस्विष्टकृतौ न प्रवर्तेते ।

घि–१.नास्ति २.अधिकःपाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततश्च तन्निषेधार्थं तद्धर्मातिदेशत्वं नाभ्युपेतव्यम् । उपस्तरणाभिघारणयोः चरुधर्मत्वं स्पष्टमेव । पारिशेष्यात् तत्र प्रपदभूमिग्रहणे निवर्तेते इति वक्तव्यम् ।

अत्रातिदेशवाक्यात्तयोर्निवृत्तिः प्रतीयते मन्त्रलिङ्गकृतयोरुभयोर्विरोधे लिङ्गस्य बलवत्तरत्वं कथम्? "श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात्" इति न्यायात्तेन तद्धर्मातिदेशकत्वमजागलस्तनायमानं भवेत् । न च तत्रापि लिङ्गात् भूमिग्रहणप्रपदजपौ भवत इति वाच्यम् । प्रतिषेधानर्थक्यप्रसङ्गात् । तेनोपलेपनादि सर्वमत्र भवति "सर्वत्रैतद्धोमेषु कुर्या"दिति वचनात् । लौकिकाग्नौ क्रियमाणत्वात् ब्रह्मासनं न भवति ॥

१७५.होमं समाप्य ॥ (०१.०७.०९)

इति । ल्यप् प्रत्ययस्त्वविवक्षितः। होमं समापयेत् । सर्वत्रोपरिष्टादित्युक्तं कर्तव्यमित्यर्थः॥

१७६.गृहागताः सगोत्राः उदकदातारः पुत्राः पौत्राः प्रपौत्राश्च जीवन्तु शरदः शतमिति जपेयुः ॥ (०१.०७.१०)

इति । अत्र निष्ठाप्रत्ययो वर्तमानार्थे भवति । गृहं प्रत्यागच्छन्तः समानगोत्राः,उदकदातारः,कर्तृप्रभृतयः सपिण्डाः पुत्रा इत्यादि मन्त्रं जपेयुः ॥

१७७.कर्मान्ते संस्कर्ता गा अनुगच्छेत् ॥(०१.०७.११)

इति। सपिण्डीकरणानन्तरमित्यर्थः। तत्प्रायश्चित्तं पुत्रादि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भिरपि कर्तव्यम् । संस्कर्तृमात्रोद्देशेन विवक्षितत्वात् ।

१७८.पयोव्रतम् ॥ (०१.०७.१२)

इति । साधारणमेव तद्वक्ष्यमाणकल्पेष्वन्यतमानुष्ठाने एतद्भवति । भोजनप्रत्याम्नायमेतत् ॥

१७९.समुद्रं वावगाहेत् ॥ (०१.०७.१३)

इति । पयोव्रतं कृत्वेति शेषः ॥

१८०.दशसहस्रं गायत्रीं वा जपेत्॥(०१.०७.१४)

इति । पयोव्रतं कुर्वन् इत्यर्थः॥

१८१.तिस्रो वानश्नन् संहिता अधीत्य ॥ (०१.०७.१५)

इति । पयोव्रतं कुर्वंस्त्रिवारं वेदपारायणं कुर्यात् । आविकोष्ट्रैकशफपयसः अपेयत्वात् महिषाजापयसः पेयत्वेपि अव्रत्यत्वात् गो पयस एव पानम् । तत्रापि विवत्सा, यमसू, कपिलादि पयःपानस्य निषिद्धत्वात् ॥

१८२.आशिषः प्रतिगृह्य वा ॥ (०१.०७.१६)

इति त्रयाणामन्यतमानुष्ठानेनैव आयुर्वृद्धिर्भवति नान्यथा॥ पूर्वोक्तकल्पानामन्यतमानुष्ठानेऽप्यशक्तस्य कल्पान्तरमाह–

१८३.अथवा क्षीरेण पायसेन वा ब्राह्मणान् भोजयित्वा ॥ (०१.०७.१७)

इति । वा शब्दः समुच्चयार्थः। ब्राह्मणानिति बहुवचनस्य त्रित्वे पर्यवसानेऽपि ब्राह्मणाधिक्ये फलविशेषो भवति ॥

१८४.आशिषो वाचयित्वा ॥(०१.०७.१८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । सन्निधानाद्भुक्तवद्भिरिति ॥

१८५.यथाशक्ति दक्षिणां दत्वा ॥ (०१.०७.१९)

इति । भुक्तवद्भ्यो ब्राह्मणेभ्यो दद्यात् ॥

१८६.पूतो भवति पूतो भवति ॥ (०१.०७.२०)

इति । संस्कर्ता पूर्वोक्तकल्पानामन्यतमानुष्ठानेनैव पूतो भवति । द्विरुक्तिः पटलसमाप्तिं द्योतयति ॥

॥ प्रथमपटलस्य सप्तमः खण्डः ॥

प्रथमपटलःसमाप्तः

इति महोपाध्याय कृष्णभट्टसूनुना अनन्तयज्वनः यवीयसा
अल्लालभट्टेन विरचिते गौतमीयापरसूत्रे
पुत्रमेधसूत्रविवरणे प्रथमपटलः
समाप्तः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ अथ गौतमीयापरसूत्रे द्वितीयः पटलः ॥

अथ द्वितीयपटलस्य प्रथमः खण्डः ॥

१८७.अथातः पुनर्दहनविधिं व्याख्यास्यामः ॥ (०२.०१.०१)

इति । अथ शब्दः आनन्तर्यार्थः अतः शब्दः क्रमार्थः। क्रमस्तु स्वयमेव वक्ष्यति । मुख्यशरीराभावे दहनप्रकार आरभ्यते । प्रत्यक्षशवसंस्कारस्याकृततया अस्थ्यादिदाहस्य पुनर्दाह इति संज्ञा । तस्य विधानं विविच्य वक्ष्याम इत्यर्थः॥

१८८.यदि शरीरं नश्येदस्थीन्यादाय ॥ (०२.०१.०२)

इति । विधिवत् संस्कारमन्तरेण यदि शरीरं नश्येत्तदा अस्थीन्यादाय। स्मृत्युक्तप्रकारेणानयेत् ॥"अमन्त्रपूर्वदग्धानाम-ङ्गवैकल्यशेषिणाम्। अनुभावमृतानां तु पुनर्दहनमिष्यते॥ मन्त्र-वत् संस्कृतस्यापि त्वसमाप्तोदकस्य तु । अर्वाग्दशदिनादूर्ध्वं पुनर्दाहो विधीयते ॥ अग्नौ सति स्यादथदेहक्लृप्तिरनस्थि चेदग्निरपेक्षणीयः। अस्थ्नामभावे त्वशरीरकस्य विनष्टवह्नेरु-दकक्रियैव ॥ विनष्टाग्निशरीरस्य संस्कारस्तूदकादिकम् । एकस्मिन्विद्यमानेऽन्यमुत्पाद्य दहनादिकम्" ॥ इत्यादि स्मृतेः ॥

१८९.क्षीरोदकेनास्थीनि प्रक्षाल्य ॥ (०२.०१.०३)

इति । आहृत्य अस्थीनि क्षीरोदकेन प्रक्षालयेत् । प्रकर्षेण क्षालयेत् ॥

१९०.कृष्णाजिने पुरुषाकृतिं कृत्वा ॥ (०२.०१.०४)

इति । अधिकरणे सप्तमी । कृष्णाजिनमास्तीर्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तस्योपरि यथासम्भवमस्थिभिः पुरुषाकृतिं कुर्यात् ॥

१९१.पूर्ववद्दहेत् ॥ (०२.०१.०५)

इति । प्रत्यक्षसंस्कारो यादृग्विध उक्तस्तादृग्विधं सर्वमविकारेण कुर्यात् । सञ्चयनन्तु किञ्चिदवशिष्यापि कर्तव्यम् ॥

१९२.तेषामभावे ॥ (०२.०१.०६)

इति । अस्थिनाशाद्वा कर्तुरशक्यादिना तान्यानेतुमसामर्थ्याद्वा अस्थ्नामभाव इत्यर्थः॥

१९३.पलाशवृन्तैः कृष्णाजिने पुरुषाकृतिं कृत्वा ॥ (०२.०१.०७)

इति कृष्णाजिनमास्तीर्य तस्योपरि पलाशवल्कैः पुरुषाकृतिं कुर्यात् । कथम्? इत्यत आह –

१९४.चत्वारिंशता शिरो दशभिर्ग्रीवा विंशत्योरस्त्रिंशतोदरं पञ्चाशता पञ्चाशता बाहू तयारेव पञ्चभिः पञ्चभिरङ्गुलीः सप्तत्या सप्तत्या पादौ तथैवाङ्गुलीरष्टाभिः शिश्नं द्वादशभिर्वृषणम् ॥ (०२.०१.०८)

इति। स्त्रीणां त्वर्थाच्छिश्नवृषणयोर्निवृत्तिः। केचिद्दशभिः दशभिः स्त्रीणां स्तनौ कुर्यातामित्याहुः। तन्न उरःकरणेन सिद्धत्वात् । षण्ढस्य षण्मासान्ते वत्सरान्ते वा पुनर्दहनविधानात् तत्र प्रतिकृतिदाहे स्त्रीवच्छिश्नवृषणकरणनिवृत्तिः। केचित्तु पुरुषवदेव नपुंसकस्यापि दाहात्तद्वदेव शिश्नवृषण–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

करणमित्याहुः। यथाचारं व्यवस्था ॥

१९५.तां कुशैर्वेष्टयित्वा ॥(०२.०१.०९)

इति । तां प्रतिकृतिं कुशैश्छादयेत् ॥

१९६.तस्मिन्नेव पूर्ववद्दहेत् । (०२.०१.१०)

इति । प्रतिकृतिरूपे प्रेते प्रत्यक्षदाहवत्प्रतिकृतिदाहादिकं सर्वं कार्यम् । सञ्चयनं त्वर्थान्निवर्तते । होमस्त्वस्ति । अस्थिदाहे प्रतिकृतिदाहे चाशौचदिवससङ्ख्या स्मृत्या अन्वेषणीयम् ॥

"देशान्तरमृतानां तु राजभिर्वा विषादिभिः । तेषामङ्गं पलाशाद्यैःकृत्वा देहं दहेत्पुनः॥ शाववत्प्रतिपत्तिश्च आज्याग्नि-स्पर्शनं विदुः। आशौचान्तः कीकसादेः प्रदाहे शेषाच्छुद्धिः"॥ तद्बहिश्चेत्त्रिरात्रम् । पुत्रश्चापि प्रागाशौचग्रहश्चेत् । नो चेत्तस्यापि अत्र सम्पूर्णमाहुः॥ "पूर्वं गृहीताशौचानां न पुनर्दहने त्वघम् । तस्मिन्नुदकदातृणामाशौचम्मनुरब्रवीत् ॥ अनाहिताग्नेर्दाहस्तु कार्यो गृह्याग्निना द्विजैः। तदलाभे पलाशोत्थैः पर्णैः कार्यं शरीरकम्॥ नरं पर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत् । पर्णदाह-क्रियायान्तु मुखस्याच्छादनं न हि । चरुश्रपणसिग्वातौ पादयोर्बन्धनं न हि ॥ क्षीरोत्सेकोऽनुकर्तव्यः सञ्चयोऽपि न विद्यते ।अपि शब्दाद्घटोऽपि नास्ति ॥ दग्ध्वास्थि पित्रोः पुत्रस्तु दशाहमशुचिर्भवेत् । तयोः प्रतिकृतिं दग्ध्वा त्रिरात्रमशुचि-र्भवेत् ॥ नरं पर्णमयं दग्ध्वा त्रिरात्रमशुचिर्भवेत् । मातापित्रो-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

र्दशाहं स्यादस्थिदाहे तथैव च ॥ अस्थ्ना पलाशवृन्तैर्वा दग्ध्वा तु प्रतिरूपकम् । पित्रोर्दशाहमाशौचमन्येषां तु त्रिरात्रकम्"॥ इति ।अस्मच्छाखिनां प्रत्यक्षशरीराभावे अस्थि-दाहः कार्यः। तदसम्भवे प्रतिकृतिदाहः कार्यः नान्यत् । केचिदस्थ्नामभावे उदकदानमेवेच्छन्ति । एतत्सूत्रविरुद्धत्वा-दुपेक्षणीयम् ॥

इति द्वितीयपटलस्य प्रथमः खण्डः ॥

अथ द्वितीयपटलस्य द्वितीयः खण्डः ॥

एकोद्दिष्टश्राद्धस्य प्रकृत्यपेक्षत्वात् प्रकृतिभूतश्राद्धविधिः प्रसङ्गात् व्याख्यायते ।

१९७.अथ श्राद्धम् ॥ (०२.०२.०१)

इति । अथ शब्दः आनन्तर्यार्थः। श्रद्धया क्रियत इति श्राद्धम् । तत्कुर्यात् ॥ कदा कुर्यात्तत आह ।

१९८.अमावास्यायां पितृभ्यो दद्यात् ॥ (०२.०२.०२)

इति। अमा सह सूर्याचन्द्रमसौ वसतः इत्यमावास्या प्रसिद्धा । तस्यापराह्णे पित्रादीनुद्दिश्य श्राद्धं कुर्यात् । एतत् पर्वणिभवत्वात् पार्वणमित्युपचर्यते । "श्राद्धं द्विविधमुद्दिष्ट-मेकोद्दिष्टं च पार्वणम् । एकमुद्दिश्य यच्छ्राद्धमेकोद्दिष्टं प्रकीर्तितम् । त्रीनुद्दिश्य तु यच्छ्राद्धं पार्वणं मुनयो विदुः"इति॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रिपुरुषोद्देशेन क्रियमाणस्य पार्वणत्वेऽप्यस्य पर्वणि भवत्व-योगेनोभयरूपत्वम् । अमयामुपरागे च मन्वादिषु युगादिषु । तीर्थश्राद्धे गयाश्राद्धे सङ्क्रान्त्यां च महालये ॥ वर्गद्वयं समुद्दिश्य श्राद्धं कुर्याद्यथाविधि ॥

१९९.पञ्चमीप्रभृति वापरपक्षस्य ॥ (०२.०२.०३)

इति। कृष्णपक्षस्य पञ्चमीप्रभृति वा दर्शपर्यन्तं प्रतिदिनं श्राद्धं कुर्यात् । वा शब्दो व्यवस्थितविकल्पार्थः । प्रतिदिनं कर्तुमशक्तस्य पूर्वः पक्षः। समृद्धस्यापरः काल इतरथा आनर्थक्यप्रसङ्गात् ॥

२००.यदहरुपपद्यते तदहः ॥ (०२.०२.०४)

इति । अपरपक्षस्येति वर्तते । सप्तम्यर्थे षष्ठीनिर्दिष्टम् । स तु कथं सप्तम्यर्थतया विपरिणम्यते? नैष दोषः। "अणुदित्सवर्णस्य चाप्रत्ययः" इत्यत स्वं रूपमित्येतद्यथा षष्ट्यन्ततया विपरिणम्यते एवमत्राप्यपरपक्षे यस्मिन्नहनि श्राद्धं कर्तुमुपपद्यते तस्मिन्नहनि वा कार्यम् । एतदुक्तं भवति–अपरपक्षस्य पञ्चमीमारभ्य दर्शपर्यन्तं [घी]प्रतिदिवसमित्येकः पक्षः। तस्मिन्नेव पक्षे यस्मिन् कस्मिन् वाहनि कुर्यादित्यपरः पक्षः। दर्शे वा कार्यम् । तत्र दर्शे श्राद्धं नित्यं पञ्चमीप्रभृतिपक्षे दर्शे श्राद्धं बाध्यते प्रसङ्गादनुष्ठितत्वात्तस्य । यदहरिति पक्षे तु दर्शे यदा क्रियते तत्राप्येतद्बाध्यते । दर्शादन्यत्रकरणे न तत्

घी–१.नास्ति २.अधिकःपाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

बाध्यते । तस्य प्रयोगमाह–

२०१.ब्राह्मणानामन्य पूर्वेद्युः ॥ (०२.०२.०५)

इति । श्राद्धदिनात्पूर्वेद्युः। अथ श्राद्धाधिकारिणमाह –

२०२.अनिन्दितो नोपामन्त्रितो नोपक्रामेत् ॥ (०२.०२.०६)

इति । पातकयुक्तो निन्दितः न निन्दितोऽनिन्दितः स तथोक्तः। उपामन्त्रितः नोपामन्त्रित इति वक्तव्ये नोपामन्त्रित इति प्रगृह्यत्वेन प्रकृत्याभावश्छान्दसः। नोकारः प्रतिषेधवचनः। अ मा नो न प्रतिषेध इति नैघण्टुकाः। परगृहे भोक्तुमनभ्युपेत इत्यर्थः। एतदुक्तं भवति पतनीयकर्मकृत् न श्राद्धं कुर्यात् । तथान्यश्राद्धनिमन्त्रणमभ्युपेत्य स्वयं गृहे श्राद्धं न कुर्यात् । नन्वनुपनीतादिवत् अन्यकर्तृसम्पादनेन श्राद्धकरणं स्यादिति चेत्, न तद्वदन्येन कारयेदिति विधानाभावात् ॥ अथ भोक्तुर्नियममाह–

२०३.आमन्त्रितो वान्यदन्नं न प्रतिगृह्णीयात् ॥ (०२.०२.०७)

इति । वा शब्दोऽवधारणे। स तु भिन्नक्रमः। परश्राद्धे भोक्तुमङ्गीकृत्य ततोऽन्यत्रान्नं नैव प्रतिगृह्णीयात् । आमन्त्रण-कर्तृव्यतिरिक्तेऽन्येभ्योऽन्नं न प्रतिगृह्णीयात् । अन्नप्रतिषेधात्तद् व्यतिरिक्तं तण्डुलसुवर्णादिकं भोक्त्रा प्रतिगृह्यमिति गम्यते ॥ अथ भोक्तॄन् निरूपयति ।

२०४.स्नातान्वा ॥ (०२.०२.०८)

इति । कृतसमावर्तनः स्नात इत्युच्यते । प्रतिप्रसवार्थ–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिदं वचनम् । तस्यानाश्रमित्वेन प्रतिषेधे प्राप्तेऽनेन वचनेन प्रतिप्रसूयते ॥

२०५.एके यतीन् ॥ (०२.०२.०९)

इति । सन्यासिनो भोजयितव्या इति केचिन्मन्यन्ते । केचिदित्यु क्तत्वात् न वयमित्यर्थः।"श्रोत्रियं भोजयेच्छ्राद्धे यतीन्वाथ विशेषतः। अध्यात्मविद्यः सन्यासी छन्दोगश्च तथोत्तमः॥ यद्येकं भोजयेच्छ्राद्धे छन्दोगं तत्र भोजयेत् । पञ्च भक्तिमहानाम्नितवश्यावीयगायकम्"॥ इति ।

२०६.गृहस्थसाधून्वा ॥ (०२.०२.१०)

इति । गृहस्थश्चासौ साधुश्च गृहस्थसाधुः तान्वेत्यर्थः। अथ स्नातकादीनां गुणानाह–

२०७.श्रोत्रियान् वृद्धाननवद्यान् स्वकर्मस्थान् ॥ (०२.०२.११)

इति । एकां शाखामधीत्य श्रोत्रियः। विद्याधिकस्तु वृद्ध शब्दवाच्यः। अनवद्यः महापातकरहितः। स्वकर्मस्थः वर्णाश्रमधर्मयुक्तः। पूर्वोक्तस्नातकादीनां त्रयाणामेकैकस्य श्रोत्रियत्वादीनि चत्वारि विशेषणानि सन्ति चेदत्यन्तं मुख्यः। किञ्चिन्न्यूनस्तदपेक्षया हीनः। श्रोत्रियत्ववृद्धत्वानवद्यत्वस्वकर्मस्थत्वानां समुच्चयो येषु तानेव सर्वत्र भोजयेदिति विशेषो दृष्टव्यः। एतदुक्तं भवति [घु]श्रोत्रियत्वादिगुणयुक्तान् स्नातान्वा, तथाभूतान् यतीन्वा[घु], श्रोत्रियत्वादिगुणयुक्तान्

घु–१.नास्ति २.अधिकपाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गृहस्थसाधून् वेति स्नातकादीनां समुच्चयो वा कार्यः। समुच्चयो वा इति वाशब्दस्यार्थः कल्पनीयः॥

२०८.अभावे शिष्यान् स्वाचारान् ॥ (०२.०२.१२)

इति । शिष्योऽन्तेवासी । स्व आचारो यस्येति स्वाचारः। स्वाचार शब्दः शिष्यविशेषणम् । स्नातकादिर्यदि न लभ्यते तदा स्वीयाचार युक्तान् शिष्यान् वा भोजयेदित्युक्तं भवति। न च शिष्योऽपि स्नातकादित्रयाणामन्यतम एवेति शङ्क्यम् । एषामन्यतमश्चेत् । तत एवं सिद्धमिदं सूत्रं निरर्थकं स्यात्। ततश्च ब्रह्मचार्यपि शिष्यो भोजयितव्य इति सूचितं भवति ॥ अथ भोज्यब्रह्मचारिणविषये वर्ज्यानाह–

२०९.विन्नश्नशुक्लविक्लवश्यावदन्तदुश्चर्मवृद्धाप्रजननव्याधितव्यङ्गकुष्ठी कुनखी वर्जितम् ॥ (०२.०२.१३)

इति । विनश्न शब्दार्थस्त्वप्रसिद्धः। केचित् श्वित्रिं विन्नश्न इत्याहुः। तत्र प्रमाणं मृग्यम् । निघण्टुनिरुक्ताद्यदर्शनात् । शुक्लः शुक्लवर्णः, विक्लवोऽतिकृष्णः, श्यावदन्तः स्वभावतः कृष्णदन्तः, दुश्चर्मा कुत्सितत्वक्, वृद्धः व्याधितः, विद्ध इत्यत्र पाठान्तरम् । अप्रजननः पुंस्त्वशक्तिरहितः, व्यङ्गो अङ्गहीनः, एतदतिरिक्ताङ्गस्याप्युपलक्षणम् । कुष्ठी प्रसिद्धः, कुनखी कुत्सितनखः । एतान् वर्जयेत् ॥

अथ श्राद्धदिनकृत्यमाह–

२१०.स्नाताञ्छुचिनाचान्तान् प्राङ्मुखानुपवेश्य दैवे युग्मान–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

युग्मान् यथाशक्ति पित्र्ये एकैस्योदङ्मुखान् ॥ (०२.०२.१४)

इति। पित्रर्थे एकैकशोऽयुग्मान् ब्राह्मणान् शक्त्यनुसारेण आमन्त्रयेत् । एतदुक्तं भवति–विश्वेदेवार्थे द्वौ, चत्वारः, षडित्येवमादि सङ्ख्याकाः ब्राह्मणा भवेयुः। पित्रर्थे त्रयः, पञ्चेत्यादि सङ्ख्याकाः। एवं पितामहप्रपितामहार्थेऽपि पितामहप्रपितामहस्थाने चायुग्मं स्यादश्रुतत्वादशुभत्वादिति न्यायात् ॥ अथ कल्पान्तरमाह–

२११.द्वौ दैवे त्रीन् पित्र्ये ॥ (०२.०२.१५)

इति । विश्वेदेवार्थे द्वौ, पित्रर्थे त्रीन्पितृपितामह-प्रपितामहानामेकैकस्यैकैकं ब्राह्मणमामन्त्रयेत् । तेनोभयार्थे पञ्चब्राह्मणमित्युक्तं भवति । अत्र विकल्पप्रतिपादक वा शब्दाद्यभावेऽपि एतत् सूत्रारम्भ सामर्थ्याद्विकल्प इति गम्यते ॥

२१२.एकैकमुभयत्र वा ॥ (०२.०२.१६)

इति । देवार्थे एकः पितॄणां त्रयाणामेकः। एवं द्वौ ब्राह्मणाविति सूचितम् ॥

२१३.मातामहानां चैवम् ॥ (०२.०२.१७)

इति । अत्र बहुवचनेन मातामहमातुःपितामहमातुः-प्रपितामहा उच्यन्ते। पित्रर्थब्राह्मणसङ्ख्याविषये त्रयः पक्षाः दर्शिताः। ते मातामहार्थेऽपि समा द्रष्टव्याः। एषु पक्षेषु यः पक्षः पित्रर्थे आश्रितः स एव मातामहार्थेऽपि । एवं च पित्रर्थे यावन्तो ब्राह्मणास्तावन्त एव मातामहार्थेऽपीति सिद्धम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

"पितरौ यत्र पूज्यन्ते तत्र मातामहा अपि । अविशेषेण कर्तव्यं विशेषान्नरकं व्रजेत्" इति वचनात् । तेन पित्रर्थे यावन्तो ब्राह्मणास्तावन्त एव मातामहार्थेऽपीति सिद्धम् । अत्र मातामहार्थं वैश्वदेविकं पृथङ्नानुष्ठेयम् । एतदुक्तं याज्ञवल्क्येन "द्वौ दैवे प्राक्त्रयः पित्र्य उदगेकैकमेव वा । मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्" इति ॥ अस्यायम-भिप्रायः-देवार्थे द्वौ प्राङ्मुखावुपवेशयेत् । पित्राद्यर्थे त्रीनुदङ्मुखानुपवेशयेत् । मातामहाद्यर्थे त्रयः। एवमष्टौ ब्राह्मणाः एकैकपक्षे त्रयः। एतस्मिन् पक्षे देवार्थे पित्राद्यर्थे एकः मातामहार्थे एकः॥

ननु मातामहाद्यर्थं किं वैश्वदेविकं न वर्तते? उच्यते, वा शब्दोऽवधारणार्थः। तन्त्रमेव वैश्वदेविकं प्रयाजादिवदारादुपकारकत्वात् । एवमनेकेषां मासिकानां सन्निपाते वैश्वदेविकं तन्त्रमेव । एवं महालयकारुण्यपितृपक्षेऽपि ॥

अथात्र मातामहश्राद्धप्रसङ्गात् किञ्चिद्विचार्यते । किं सर्वेषु श्राद्धेषु मातामहश्राद्धं कार्यमुत कतिपयेषु? किन्तावदिह प्राप्तः? "पितरौ यत्र पूज्यन्ते तत्र मातामहा अपि" इति वचनात् सर्वेषु श्राद्धेष्विति प्राप्तेऽभिधीयते । "कर्षूसमन्वितं उक्त्वा तथाद्यं श्राद्धं षोडशम् । प्रत्याब्दिकं च शेषेषु पिण्डाः स्युः षडिति स्थितिः" इति वचनात् कतिपयेष्वेव मातामह्यं कार्यमिति प्रतीयते । कर्षूःसमन्वितं सपिण्डीकरणमाद्यमेकादशेऽह्नि मध्याह्ने कर्तव्यम् । महैकोद्दिष्टं षोडशश्राद्धानि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकोद्दिष्टपार्वणोभयरूपषोडशश्राद्धानि । प्रत्याब्दिकं मृतेऽहनि प्रतिसँवत्सरं क्रियमाणमाब्दिकं प्रत्याब्दिकरूपम् । कर्षूः समन्विताद्याब्दिकान्तानि मुक्त्वा दर्शादिषु मातामह्यं दौहित्रैः कर्तव्यम् । अमुमर्थं चन्द्रिकाकार; सङ्ग्रहवचनेन प्रतिपादयति। "याज्ञवल्क्येन कालस्तु अमावास्यादिरीरितः। अविशेषेण पित्र्यस्य तथा मातामहस्य च ॥ युगपच्च स विज्ञेयो वचनात् वक्ष्यमाणकात् । कालभेदेन तन्त्रः स्यात् देशभेदेन चैव हि ॥ तस्मात्तन्त्रविधानां तु यौगपद्यं प्रतीयते । अमावास्यादि कालेषु तन्त्रं यन्न मृतेऽहनि । अमावास्यादि कालेषु कालैकत्वात् सहक्रिया । मृतेऽहनि तु तद्भेधा न युज्येति सहक्रियाः"इति ॥ अत्रायमाशयः– अमावास्याष्टकेत्यादिना श्राद्धकालो याज्ञवल्क्येन अभिहितः। सः कालः पितृमातामहश्राद्धयोः द्वयोरपि साधारणः। पितृमातामहयोः शब्दमुपादाय कालविधानाभावात् । अत उभयोरप्येते कालाः साधारणाः।

ननु कालस्य साधारण्येऽपि प्रथमं पितृश्राद्धं समाप्य पश्चान्मातामह्यं क्रियतां दर्शश्राद्धपिण्डपितृयज्ञयोरिव । मैवम्, युगपच्च स विज्ञेयः सः श्राद्धरूपोऽर्थो युगपदेव विज्ञेयः। कर्तव्यत्वेन विज्ञातव्यः कथं वक्ष्यमाणकात् वचनात्? "मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्" इति याज्ञवल्क्येन अत्रैव श्राद्धप्रकरणे वक्ष्यमाणत्वात् । अनेन वचनेन यौगपद्य प्रतीतिः कथमिति चेत् उच्यते, वैश्वदेविकस्य तन्त्रत्वं प्रति–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पादयिता नूनमनयोः श्राद्धयोर्यौगपद्यं साधितमिति निश्चीयते। यदि यौगपद्यं न स्यात् तर्हि तन्त्रत्वप्रतिपादनमनुपपन्नं स्यात्। एतद्यौगपद्यं दर्शाष्टकादिषु "न मृतेऽहनी"त्येतत् सपिण्डीकरणादीनामुपलक्षणार्थम् । मृताहादौ समानतन्त्रत्वविचारो न सङ्गच्छते मातामहानां तत्र प्राप्त्यभावात् । तथाहि पितॄणां यत्र दर्शादौ विहितं श्राद्धमात्रं च मातामहानां दौहित्रमात्रेण घ्अनृण्यहेतुतः इति । दौहित्रमात्रो दर्शादिश्राद्धं मातामहस्य अवश्यं कुर्यात् । अकरणे प्रत्यवायस्मरणात् । तत्र कुत्र तेषां कर्तव्यमिति शङ्कायामाह–

"सापिण्ड्यान्तं च दाहादि प्रेतप्रत्याब्दिकं विना" इति । अस्यार्थःस्पष्टः–यस्तु धनहारिदौहित्रः पुत्रिकापुत्रश्च दाहादि सर्वं कुर्यात् । तयोर्व्यतिरिक्तास्तु दर्शादौ कुर्यात्त् । पितृमृताहे तु पित्रादीनां त्रयाणामेव कार्यं न मातॄणां न मातामहानां च । एवं मातृमृताहे मातृवर्गस्यैव न पितृमातामहवर्गयोः। एवं पितृव्य, भातॄणामपि तत्तन्मृताहे मृतं प्रथममुद्दिश्य तत्पितृपितामहावुद्दिश्य पार्वणश्राद्धं कार्यम् ।

अत्रायमनुष्ठेयार्थः पितृश्राद्धे पितृपितामहप्रपितामहाः देवताः, मातृश्राद्धे मातृपितामहीप्रपितामह्यः,केचिन्मातृमृताहे पितृवरणं कुर्वन्ति । उभयथा स्मृतेः सद्भावात् यथाचारं व्यवस्था । न तु तत्रापि मातामहवर्गस्य वरणम् । पितृव्यश्राद्धे

घ्–१.अनुद्दिश्यत २.अनृण्यहेतुतः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पितृव्यपितामहप्रपितामहाः, भ्रातृश्राद्धे भ्रातृपितृपितामहाः, पितृव्यपत्नीश्राद्धे पितृव्यपत्नीपितामहीप्रपितामह्यः, भ्रातृपत्नी-श्राद्धे भ्रातृपत्नीमातापितामह्यः एवं सर्वत्र योजयितव्यम् । पुरुषस्य मृतेऽहनि मृतं प्रधानं प्रथममुद्दिश्य तत्पितृपितामहा-वुद्देशनीयौ । स्त्रीमृताहे तामुद्दिश्य तच्छ्वश्रूस्तच्छ्वश्रूंश्च निर्दिशेत् । यस्मिञ्छ्राद्धे याः देवतास्ता एव पिण्डार्घ्यादौ देवताः।

ननु खादिराचार्यः पितृवर्गस्यैव पिण्डादीन्विधत्ते । तेन मात्रादिश्राद्धेऽपि पितृवर्गस्यैव पिण्डदानं कार्यमिति चेत् मैवम्, अन्वष्टक्ये पठिताः पित्रादिशब्दाः समवेतदेवताः प्रकाशनपराः अग्नये त्वा जुष्टमीत्यादिवन्न स्वरूपपराः। तत्परत्वे दौहित्रादि करणभङ्गप्रसङ्गः। तेन यस्मिञ्छ्राद्धे याः देवतास्ता एवोद्दिश्य पिण्डदानादिकं कार्यमिति साधितं भवति ।

ननु अन्वष्टक्यस्य प्रकृतित्वेनोहासम्भवात् कथं मातामहस्य पिण्डदानादिकं कार्यम्? उच्यते, अस्मच्छाखिना-मन्वष्टक्यपिण्डपितृयज्ञेषु श्राद्धप्रसक्तिरेव न सम्भवति । केवलं होमपिण्डदाने कर्तव्ये । श्राद्धं तु धर्मशास्त्रानुसारेण पार्वण-विधानात् वर्गद्वयमुद्दिश्योहेन कर्तव्यम् । श्राद्धस्यापि प्रकृत-त्वादन्वष्टक्यपिण्डपितृयज्ञयोर्होमदाने भवतः। अष्टकायां होम एव । अष्टकायां यदि स्मृत्यनुसारेण श्राद्धं क्रियते तदा खादिरोक्तहोमानन्तरं श्राद्धं पार्वणविधिना कर्तव्यम् इति ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकृतमनुसरामः ।

२१४.दैवपूर्वं श्राद्धं कुर्वीत ॥ (०२.०२.१८)

इति । देवसम्बन्धिकर्म दैवमित्युच्यते । दैवं पूर्वं यस्य तद्दैवपूर्वम् । वैश्वदेविकं कर्म प्रथमं कृत्वा पश्चात् पित्र्यं कर्तव्यम् ॥

२१५.पिण्डपितृयज्ञवदुपचारः ॥ (०२.०२.१९)

इति । प्राचीनावीत्यप्रदक्षिणदक्षिणाग्रत्वपितृतीर्थादीनि तूपचारशब्दवाच्यानि । होमपिण्डदानादिकं सर्वं पिण्डपितृयज्ञवत् कुर्यात् । ननु पिण्डपितृयज्ञवच्छ्राद्धमेकदेशवह्नौ कर्तव्यं स्यात् । मैवम्, तत एवातिप्रणयेत् इत्युक्तम् । ततश्शब्देन गृह्याग्निः परामृष्यते । गुह्याग्नेरति प्रणयेदित्यर्थः। अत्रेदं प्रष्टव्यम्- एव शब्दस्य किं ततश्शब्देनान्वयः उत अतिप्रणयेदित्यनेन? न तावदाद्यः। सर्वनाम्ना गृह्याग्नेरेव प्रतिनिर्दिष्टत्वात् नाग्न्यन्तरसन्निधानम् । येन एवकारेणान्यत् व्यवच्छिद्येत ॥

ननु अन्वष्टक्यस्य विकृतित्वान्मथिताग्निप्राप्तिरस्तीति चेत् न । उपदिष्टेन गृह्याग्निनातिदिष्टस्य मथिताग्नेर्बाधितत्वात् शरैः कुशबाधवत् । औपदेशिकवचनेन श्रपणमात्रमेव बाध्यते न तु होम इति चेत् सत्यम् । यदि ततश्शब्दो न भवेत् तर्हि स्यात् एतदेवम् । ततश्शब्द ग्रहणादेव मथिताग्निहोमो निवर्तते नापि द्वितीयः व्यावृत्याभावात् । अनतिप्रणीतत्वं व्यावर्त्यमिति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चेन्न । व्रीहीन् प्रोक्षतीत्यादावपि नियमप्रसङ्गः। तस्मादेव-कारोऽनर्थकः सन् ज्ञापयति पिण्डपितृयज्ञ एवातिप्रणयेत् न तद्विकारेषु । तेन पार्वणश्राद्धेषु पिण्डपितृयज्ञविकारेषु सत्स्वपि कृस्नाग्नावेव होम इति निश्चीयते ॥

२१६.पित्र्ये द्विगुणभुग्नांस्तु दर्भान् ॥ (०२.०२.२०)

इति । पित्र्ये यत्र दर्भो विहितस्तत्र दर्भान् द्विगुणभुग्नान् कृत्वा समुच्छिद्य प्रयोजयेत् । तु शब्देन वैश्वदेवे द्वौ द्वौ दर्भौ कार्याविति प्रतीयते ॥

२१७.पवित्रपाणिर्दद्यात् ॥ (०२.०२.२१)

इति । पवित्रं पाणौ यस्य सः पवित्रपाणिरिति व्यधिकरण बहुव्रीहिः । श्राद्धे दद्यादित्यर्थः ॥

२१८.श्राद्धे क्षणः कर्तव्य इति ॥ (०२.०२.२२)

इति । सामान्येन श्राद्धशब्दोक्तावपि "निर्विशेषं न सामान्य"मिति न्यायेन श्राद्धविशेषं निर्दिशेत् । अमावास्या श्राद्ध इतिवच्चतुर्थीविभक्त्या विश्वेदेवशब्दं निर्दिश्य पश्चात् क्षणः कर्तव्य इति वदेत् । "सङ्कल्पासनयोः षष्ठी द्वितीयावाहने तथा । चतुर्थी वरणे दाने शेषाः सम्बुद्धयः स्मृताः" इति । सम्बुद्धिशब्दोऽत्र सम्बोधनवाची । अत्रायमनुष्ठेयार्थः-प्रथमं षष्ठीविभक्त्या गोत्रनामान्युक्त्वा पित्रादित्रितयं मातामहादि त्रितयं चैवं षष्ठीविभक्त्या निर्दिश्यामावास्याः श्राद्धं करिष्य इत्युच्चरेत् । ततो ब्राह्मणान् वृणीते । अस्मिन्नमावास्याः श्राद्धे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विश्वेभ्योदेवेभ्यः क्षणः कर्तव्य इति ब्रूयात् । वैश्वदेवविशेषास्तु धर्मशास्त्रादन्वेष्टव्याः।अस्मिन्नमावास्याः श्राद्धे श्रीवत्सगोत्रेभ्यः श्रीकृष्णशर्मभ्योऽस्मत्पितृभ्यो वसुस्वरूपेभ्यः क्षणः कर्तव्य इति ब्रूयात् । एवं पितामहादीनामपि सर्वोपचारेष्वपि गोत्रनामसम्बन्धरूपाणि निर्देष्टव्यानि मन्वादौ धर्मशास्त्रेऽपि तथा विहितत्वात् । एकैकपक्षे तु श्रीवत्सगोत्रेभ्यः श्रीकृष्ण वेङ्कटेश्वरवरदराजशर्मभ्य इत्युक्त्वा अस्मत् पितृपितामह प्रपितामहेभ्यो वसुरुद्रादित्यस्वरूपेभ्यः क्षणः कर्तव्यः इति वदेत् । एवं सर्वत्रोहनीयम् । सर्वानुद्दिश्यैवं क्षणः कर्तव्य इति ब्रूयात् । एवमन्यत्रापि भोक्तृणामन्यकर्तव्येष्वोपचारेषु ब्राह्मणसङ्कोचे सति पित्रादिशब्दाः समासेन कर्तव्याः ॥

२१९.ॐतथेति पतिवचनम् ॥ (०२.०२.२३)

इति । भोक्ता ब्रूयात् ॥

२२०.प्राप्नोतु भवानिति ॥ (०२.०२.२४)

इति । कर्तेति शेषः॥

२२१.प्राप्नवानीति ॥ (०२.०२.२५)

इति । भोक्ता वदेदित्यर्थः ॥

२२२.अनुज्ञातः॥ (०२.०२.२६)

इति । प्राप्नवानीत्युक्ते वक्ष्यमाणं कर्म कुर्यात् ॥

२२३.आसीनः सर्वत्र प्रश्नेषु ॥ (०२.०२.२७)

इति । सर्वेषु प्रश्नेषु सम्यगासित्वा पृच्छेत् । प्रश्ने-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ष्वासनं वदतः तद्व्यतिरिक्तेषु स्थानासनयोर्विकल्प इत्याशयः॥

२२४.पङ्क्तिमूर्धन्यं पृच्छति सर्वान् वा ॥ (०२.०२.२८)

इति । पङ्क्तिमूर्धन्यः प्रथमस्थानोपविष्टः। आरादुपकारकेषूपचारेषु वैश्वदेविकस्थानेषु प्रथमोपविष्टं पृच्छेत्। सर्वान्वा पृच्छेत् । पाद्यादि सर्वं वरणक्रमेण कुर्यात् । नियोजनादि पदार्थवत् तैलकृसरादेः प्रदानं नावश्यकं सूत्रकारेणानुक्तत्वात्। कृतेत्वभ्युदयः ॥

इति द्वितीयपटलस्य द्वितीयः खण्डः ॥

अथ द्वितीयपटलस्य तृतीयः खण्डः ॥

२२५.आसनेषु दर्भानास्तीर्योपवेश्य वृणुयात् ॥ (०२.०३.०१)

इति । दारुमयाद्यासनेषु दर्भानास्तीर्य वरणक्रमेण उपवेशयेत् । उपवेशनान्तरमासनादि प्रदाय पूर्ववद्वरणं कुर्यात् पदार्थानुसमयेन सर्वं कार्यम् ॥ छन्दोगानान्त्वत्र विशेषः- पादप्रक्षालनकेष्वत्र देवयोश्चतुरश्रिका । पितृणां वर्तुलाकारा प्रेतस्य स्यात्त्रिकोणिका इति ॥

२२६.यवानादायोङ्कारं कृत्वा विश्वान्देवानावाहयिष्य इति पृच्छति ॥ (०२.०३.०२)

इति । यवानादाय ॐविश्वान्देवानावावाहयिष्य इति वैश्वदेविकब्राह्मणान् पृच्छेत् । करोतिरत्रोच्चारणे वर्तते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२२७.ॐआवाहयेत्यनुज्ञातः ॥ (०२.०३.०३)

इति । तैरेवमुक्तः सन् आवाहयेत् ॥

२२८.विश्वेदेवा स आगत श्रुणुताम इमं हवम् । एदं बर्हिर्निषीदतेत्यनयावाह्येति ॥ ओमासश्चर्षणीधृतो विश्वेदेवा स आगत । दाश्वंसो दाशुषः सुतमिति वा ॥ (०२.०३.०४)

इति । वा शब्दश्चार्थः। तेन द्वाभ्यां मन्त्राभ्यामावाहयेत् इत्युक्तं भवति ॥

२२९.यवैरवकीर्य ॥ (०२.०३.०५)

इति । यवैर्विप्रानर्चयेत् । किरतिरर्चयतेरर्थे वर्तते । विप्रशिरस्सु यवान् प्रक्षिपेत् इत्यर्थः । अर्चनन्तु तूष्णीमेव मन्त्रस्यानभिधानात् ॥

२३०.विश्वेदेवाः श्रुणुतेमं हवं मे ये अन्तरिक्षे य उपद्यविष्ठ । ये अग्निजिह्वा उतवा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वमिति जपित्वा ॥ (०२.०३.०६)

इति । जपेदित्यर्थः ॥

२३१.तिलानादायोङ्कारं कृत्वा पितॄनावाहयिष्य इति पृच्छति ॥ (०२.०३.०७)

इति । पितृग्रहणं प्रदर्शनार्थम् । तेन यस्मिञ्छ्राद्धे ये उद्देश्यास्तान् गोत्रनामसम्बन्धरूपसहितान् द्वितीयाविभक्त्या निर्दिश्य आवाहयिष्य इति पृच्छतीति । स्पष्टमन्यत् ॥

२३२.ॐआवाहयेत्यनुज्ञातः ॥ (०२.०३.०८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । गतार्थः॥

२३३.एत पितर इत्यनयावाह्य ॥ (०२.०३.०९)

इति । आवाहयेत् । अनयेति वचनमृगेवेयमिति दर्शयितुम् । तेन मात्रादिश्राद्धे सपिण्डीकरणे तदूर्ध्वभाविन्येकोद्दिष्टरूपपितृश्राद्धेऽप्येष मन्त्रो नोहनीय इति सिद्धम् ॥

२३४.उशन्तस्त्वा हवामह उशन्तः समिधीमह्युशन्नुशत आवह पितॄन् हविष आत्तव इति वा ॥ (०२.०३.१०)

इति । अत्र वेति वा शब्दार्थः। समुच्चय एवावाहनमनयोरिति यावत् । अस्मिन् मन्त्रेऽपि पितृशब्दस्यानूहः॥

२३५.उक्त्वा तिलैः प्रकीर्य ॥ (०२.०३.११)

इति । यवैरवकीर्येतिवद्व्याख्येयम् ॥

२३६.आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैरस्मिन्यज्ञे स्वधया मदत्वधिब्रुवन्तु ते अवन्त्वस्मानिति जपित्वा ॥ (०२.०३.१२)

इति । जपेदित्यर्थः। जपस्त्वावाहनाभावेऽपि भवत्यनङ्गत्वात् । यत्र स्वधाशब्दः प्रतिषिध्यते तत्र तद्वर्ज्यं कृत्स्नं मन्त्रमुच्चरेत् । अत्र मन्त्रे पितर इत्ययं शब्दो यथा पितामहादीन् ब्रवीत्येवमादीनपि । ततश्च मात्रादि श्राद्धेष्वविकृतेन प्रयोगः । उभयत्र पितृत्वस्यावशिष्टत्वात् ॥

२३७.यज्ञियवृक्षचमसेषुपवित्रान्तर्हितेषु॥ (०२.०३.१३)

इति । यज्ञार्हो वृक्षो यज्ञियवृक्षः । तेन निर्मितश्चमसो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यज्ञियवृक्षचमसः। पालाशवैकङ्कतकाश्मर्यबैल्वखादिरौदुम्बराणां तेषामन्यतमयज्ञियवृक्षचमसाः तेषु पवित्रान्तर्हितेषु । निष्ठा-प्रत्ययनिर्देशादवश्यमेतस्मिन् काले पवित्रमन्तर्धानं कर्तव्यम्। एवं भूतेषु पात्रेष्वर्घ्यार्थमुदकं गृह्णीयादिति शेषः॥

२३८.एकैकस्मिन्नप आसिञ्चति ॥ (०२.०३.१४)

इति । एकैकस्मिन्निति वदता क्रमेणैव पात्रेष्वप आसेचनं न युगपदिति दर्शितम् । देवार्थं पात्रद्वयं कर्तव्यम् । तदुक्तं मत्स्यपुराणे-"विश्वान्देवान् यवैः पुष्पैरभ्यर्च्यासन-पूर्वकम् । पूरयेत्पात्रयुग्मं तु स्थाप्य दर्भपवित्रकः" इति । युग्मशब्दगतस्यैकत्वस्याविवक्षितत्वात् देवार्थं पात्रद्वयमेव कर्तव्यम् । एकब्राह्मणपक्षे चतुष्टयादि पक्षे च ब्राह्मणा-भावेऽपि पात्रद्वयं भवति । एकब्राह्मणपक्षेऽपि द्विरर्घ्यदानं कार्यम् । चतुष्टयपक्षे एकैकपात्रस्थं द्वाभ्यां द्वाभ्यां प्रदेयम् । षट्पक्षे त्रयाणामेकैकेन । पितृवर्गार्थं त्रीणि पात्राणि भवन्ति । तथा च विष्णुः- "दक्षिणाग्रेषु दर्भेषु दक्षिणापवर्गेषु चमसेषु त्रिषु पवित्रान्तर्हितेषु अप आसिञ्चतीति । शन्नो देवीरिति" । चमसेषु त्रिष्विति ब्रुवन् पित्रादीनां त्रयाणामेकैकस्यैकैकं पात्रमिति दर्शयति । पित्रर्थमेकं, पितामहार्थमेकं, प्रपिता-महार्थमेकमित्यर्थः। तेन पित्रादीनां त्रयाणामेकैकस्थाने एकब्राह्मणपक्षेऽपि पात्रत्रयं त्रिष्वित्यभिधानात् । द्विपितृणामपि पात्रत्रयमेव सादनीयम् । एकैकस्मिन्पात्रे द्वौ द्वौ निर्दिश्या-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घ्र्यदानं कार्यं न तु ब्राह्मणसङ्ख्यया । मातृमातामहवर्गस्यापि च पात्रत्रयं कार्यम् । अत्रायमनुष्ठेयार्थः होमस्थानस्य पश्चाद्दक्षिणाग्रान् दर्भानास्तीर्य तेषु पात्राणि सादयेत् । देवपात्रे उदकपवर्गे स्याताम् । तयोः पुरस्तात् दक्षिणापवर्गाणि त्रिणि भवेयुः। तेषां पुरस्तात् मातामहार्थानि । एवं सर्वत्र योजनीयम् ॥ अप आसिञ्चतीत्युक्तम् । तत्प्रकारमाह–

२३९.शन्नो देवीरिति घ्गन्धोदकेन पूरयित्वा ॥ (०२.०३.१५)

इति । गन्धमिश्रितमुदकं गन्धोदकं तेन पात्राणि शन्नो देवीरित्यनया पूरयेत् । प्रतिपात्रं मन्त्रावृत्तिः॥

२४०.यवोऽसि धान्यराजानो वारुणो मधुसंयुतः । निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतमिति देवपात्रे तण्डुलानोप्य ॥ (०२.०३.१६)

इति । प्रक्षिपेत् । पात्रस्य प्राधान्यात् । तदनुसारेण मन्त्रावृत्तिः। मन्त्रलिङ्गात् यवतण्डुला एव गृहीतव्याः ॥

२४१.पितृपात्रेष्वेकैकस्मिन्नेव तिलानावपति ॥ (०२.०३.१७)

इति । पितृगृहणमुपलक्षणार्थम् । तेन मातृमातामहादीनि पात्राणि पितृपात्राणीति सूचितम् । पितृपात्रेषु मध्ये एकैकस्मिन् क्रमेणैव तिलानावपेत् । एकैकस्मिन्निति वचनं क्रमार्थमितरथा युगपदेवावापः प्रसज्येतेति ॥

२४२.तिलोऽसि सोमदेवत्यो गोसवो देवनिर्मितः । प्रत्नवद्भिः

घृ–१.अन्धोदकं २.गन्धोदकेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रऩ्नःस्वधया पितॄनिमाँल्लोकान् प्रीणीहिनः स्वधा नम इति ॥ (०२.०३.१८)

इति । अनेन मन्त्रेण तिलानामावापः कार्यः। अथवा एकैकस्मिन्निति वचनात् प्रतिपात्रं मन्त्रावृत्तिरुक्ता भवति । पूर्वस्मिन्पक्षे सकृन्मन्त्रमुक्त्वा सर्वपात्रेषु क्रमेण तिलावापः। अस्मिन् पक्षे यावन्ति पात्राणि तावन्तं मन्त्रावृत्तिरिति विवेकः। पूर्वस्मिन् पक्षे मन्त्रस्य सर्वार्थत्वात् अनूहः सिद्धः। आवृत्ति-पक्षेऽप्यनूहः कथम्? बहुत्वस्य समवेतत्वात् सूर्यं चक्षु-र्गमयतामितिवत् । तेन पितामहादिपात्रेषु पितृशब्दः प्रयोगः तथा प्रेतपात्रेऽपि । तथैव प्रयोगवचनस्य विपरिणामः प्रागेव दर्शितः। केचित् सर्वत्र पितृशब्दस्थाने प्रेतशब्दं प्रयुञ्जते सपिण्डीकरणात् प्राक् पितृत्वाभावात् । तेषां यमायेत्यादीनां नमो वः पितर इत्यस्य च विपरिणामः प्रसज्येत । प्रत्यक्ष-प्रेतस्य स्थितत्वात् तेषामपि यथार्थविपरिणामः कर्तव्य इति चेदुच्यते, पाठस्य क्वचिदप्ययत्नासम्भवेन प्रथमप्रवेशनं निरर्थकमापद्यते । नमो वः पितर इत्यस्य चाविधानमेव श्रेयः। विहितेऽपि तस्य प्रयोगासद्भावात् ॥ अथार्घ्यपात्रविकल्पमाह-

२४३.सौवर्णराजतौदुम्बरकांस्यमणिमयानां पात्राणामन्यतमेषु ॥ (०२.०३.१९)

इति । उदुम्बरं ताम्रं, वृक्षविकारस्य तु पूर्वेणैव सिद्धे सौवर्णादिषु पाठादपि ताम्रवचनमौदुम्बरशब्दः। मणिमयमर-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कतादि रत्नमयम् । शिष्टानि प्रसिद्धानि ॥

२४४.यानि वा विद्यन्ते मृण्मयवर्ज्यम् ॥ (०२.०३.२०)

इति । यानि जलाधिकरणयोग्यानि तानि वा अर्घ्यार्थं सादनीयादित्यर्थः। मृण्मयन्तु वचनात् प्रतिषिद्ध्यते ॥

२४५.पत्रपुटेष्वेकैकस्यैकैकेन ददाति ॥ (०२.०३.२१)

२४६.सपवित्रेषु हस्तेष्विति ॥ (०२.०३.२२)

इति । पात्रस्यान्तःप्रदेशः पुटशब्देनोच्यते । एकैकस्य ब्राह्मणस्यैकैकेन पवित्रेण सहितेषु हस्तेष्वर्घ्यं दद्यात् । तत्तदर्घ्यपात्रस्यान्तः पत्रपुटे गृहीत्वा वक्ष्यमाणेन तन्त्रेण तत्तद्ब्राह्मणपाणिष्वर्घ्यं दद्यात् । अत्रायमनुष्ठेयार्थः–वैश्वदेविक स्थाने प्रथमोपविष्टब्राह्मणहस्ते किञ्चिदुदकं प्रदाय तत्पात्रस्थं पवित्रं तद्धस्ते निधाय पात्रपुटादर्घ्यं गृहीत्वा "या दिव्या" इति मन्त्रेण पवित्रस्योपरि प्रदाय, पुनः शुद्धोदकं प्रदाय, पवित्रं तद्धस्तात् गृहीत्वा अर्घ्यपात्रे प्रक्षिपेत् । एवमितरेषामर्घ्यदानं कार्यम् । अर्घ्यपात्राणि प्रागवनेजनान्न चालयेत्। उदकग्रहणस्य द्वयं प्रयोजनमर्घ्यप्रदानमवनेजनञ्च दीपादिवत् । अवनेजनात् पूर्वं पात्रभेदादिना उदकनिर्गमने पूर्ववन्मन्त्रेण तत्पात्रमभिपूर्य या दिव्या मन्त्रेणापः कार्यः प्रकृत्या दर्शनात् । तत्पात्रमुदकाहरणासमर्थं चेत् पात्रान्तरमाहरणीयम् ॥ अथार्घ्यमन्त्रमह–

२४७.या दिव्या आपः पयसा सम्बभूवुर्या आन्तरिक्ष उत पार्थिवीर्याः। हिरण्यवर्णा यज्ञियास्तान आपः शं स्योना सुहवा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवन्त्वित्यसावेतत्तेऽर्घ्यमिति ॥ (०२.०३.२३)

असौ शब्दस्थाने सम्बुद्ध्या गोत्रनामपुरःसरमुद्देश्यं गृहीत्वा एतत्तेऽर्घ्यमिति विप्रहस्तेऽर्घ्यं दद्यात् । असौ ते इत्येकवचनं ब्रुवाणस्य आचार्यस्य आर्घ्यदाने सम्बोधन बहुवचनचतुर्थीविभक्तिप्रयोगश्च न सम्मत इत्यभिप्रायः। द्विपितृकेषु द्विवचनान्तं कृत्वा अर्घ्यं दद्यात् ॥

२४८.एकस्मिन् पात्रे संस्राव्यानुसमानीय ताभिरद्भिः पुत्रकामो मुखमनक्ति ॥ (०२.०३.२४)

इति । ब्रह्मणहस्तच्युतानुदकान् कस्मिंश्चित् पात्रे गृहीत्वा ताभिरद्भिः पुत्रकामश्चेत् मुखमनक्ति । यदि पुत्रेच्छा न भवति तदा मुखाञ्जनं न कर्तव्यम् ॥

२४९.पितृभ्यः स्थानमसीति न्युब्जपात्रं करोति॥(०२.०३.२५)

इति । संस्रावपात्रमनेन मन्त्रेणाधोमुखं कुर्यादेतद-सत्यामपि कामनायां भवति ।

२५०.अत्र गन्धपुष्पधूपदीपवाससां प्रदानम् ॥ (०२.०३.२६)

इति । अस्मिन्नवसरे गन्धादीन् प्रदद्यात् । चतुर्थ्या पित्रादीनुद्दिश्य गन्धादीन् प्रदद्यात् ॥

२५२.अलाभे यज्ञोपवीतं हिरण्यं च दद्यादिति॥ (०२.०३.२७)

इति । वस्त्रालाभ इत्यभिप्रायः ॥

२५२.उद्धृत्य घृताक्तमन्नं पृच्छत्यग्नौ करिष्य इति ॥ (०२.०३.२८)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नौ करिष्य इत्यभिधानात् आचार्योऽञ्जलाद्यधिकरणेष्वेवं प्रश्नो न कर्तव्य इति दर्शयति । घृतेनाक्तं घृताक्तमित्युच्यते । घृताक्तमित्युक्ते चतुरवदानपञ्चावदानयोर्निवृत्तिः। इदानीं विचार्यते किं दार्शिकविध्यन्तः प्रवर्तत उत परिचरणतन्त्रमेव? किन्तावत्प्राप्तम्? ओदनस्य औषधत्वात् दर्शविध्यन्त एव कर्तव्य इति प्राप्तः। उच्यते, अन्नशब्दस्य तन्त्रलक्षणपरत्वात् अन्नधर्मकं कर्मान्तरं श्राद्धाङ्गतया विधीयते। नित्यहोमस्य अन्नद्रव्यत्वात् तद्धर्ममात्रमतिदिश्यते । यदुक्तमौषधत्वात् दार्शिकविध्यन्तोऽत्र प्रवर्तत इति । सत्वौषधत्वमाश्रित्य प्रवर्तते । अत्रान्नशब्दश्रवणादौषधविशेषधर्म एवापेक्ष्यते । नतु सामान्यम् । तस्मात् अन्नशब्दोपादानात् अन्नसाधननित्यहोमस्य तन्त्रमत्र प्रवर्तत इति सिद्धम् । यतो नित्यहोमधर्मप्राप्तिः तेनान्यतस्सिद्धमेव उपगृहीतव्यमिति निश्चीयते । उद्धृत्य आदायेत्यर्थः॥

२५३.अग्नौ करवै करवाणीति वा प्रत्याहुः क्रियतां कुरुष्व कुर्विति वा ॥ (०२.०३.२९)

इति । भोक्तारो ब्रूयुरित्यर्थः। यस्तु त्रयाणां समुच्चय इति वाचयेत् तं प्रत्याहुः॥

२५४.क्रियतामित्यर्थकामम् ॥ (०२.०३.३०)

इति । शेषः। असत्यामपि कामनायां क्रियतामिति ब्रूयुः प्रथमनिर्दिष्टत्वात् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२५५.कुरुष्वेति पशुकामं कुर्विति पुत्रकामम् ॥ (०२.०३.३१)

इति । स्पष्टम् ॥ अथ नित्यहोमस्य यौ होममन्त्रौ ताभ्यां मन्त्राभ्यां होम इति प्राप्तावाह–

२५६.पिण्डपितृयज्ञवद्धुत्वा ॥ (०२.०३.३२)

इति । पिण्डपितृयज्ञे यौ होममन्त्रौ ताभ्यां मन्त्राभ्यां होम इति । स्वाहा सोमायेत्यादि ताभ्यामाहुतिद्वयं जुहुयात् ॥

२५७.हुतशेषं पाणिषु दद्यात् ॥ (०२.०३.३३)

इति । पित्र्यब्राह्मणपाणिष्वित्यर्थः। तदेव स्पष्टयति–

२५८.पाणिमुखाः पितर इति श्रुतेः ॥ (०२.०३.३४)

इति । अग्निरहितार्थमेतत् । "अग्नौकरणशेषं तु न दद्याद्वैश्वदेविक" इति पुराणवचनाच्च होमशेषं न वैश्वदेविक–ब्राह्मणेभ्यो दद्यात् । ननु सर्वाधानेन वा भार्याया अभावेन वा भावेऽप्यसन्निधानेन वा अग्निसन्धानं न शक्यते सहाधिकारात् सहिताधिकाराद्वा ॥ यदा वा ब्रह्मचर्यादिना गृह्याग्न्यभावः तदा पार्वणहोमाभावेन श्राद्धलोपः स्यादित्यत आह–

२५९.अनग्निकश्चेदाद्यं गृहीत्वा भवत्स्वेवाग्नौ करणमिति पूर्ववत् ॥ (०२.०३.३५)

इति । पूर्वोक्तरीत्या योऽग्निरहितःऔपासनासन्निधाने त्वाद्य मदनीयमन्नमित्यर्थः। तद्गृहीत्वा भवत्स्वेवाग्नौ करण–मित्युक्त्वा पूर्ववत् करिष्ये करवै करवाणीति वा ब्राह्मणान् पृच्छेत् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२६०.तथास्त्वित्यनुज्ञातः॥ (०२.०३.३६)

इति। तथास्त्वित्येव प्रतिवचनं ब्रूयुः। अनुज्ञात इत्यनुज्ञात एव कुर्यात् । यथा केचित् पाणिहोमे विप्रानुज्ञां नेच्छन्ति तन्निरासार्थमनुज्ञात इत्युक्तमाचार्यैः। मेक्षणन्तु न भवति । नित्यहोमे पाणेरेव होमसाधनत्वदर्शनात् तद्विकारे श्राद्धेऽपि तस्यैव साधनत्वं न मेक्षणस्य । पिण्डपितृयज्ञवदित्यनेन नित्यहोममन्त्रमात्रमेव बाध्यते नान्यत्। पर्युक्षणमपि न भवति । अधिकारादेवाग्नेः सिद्धौ पुनरग्निग्रहणमग्न्यभावेन पाण्युदकादिषु कर्तव्येषु पर्युक्षणं न भवतीति ज्ञापयितुम् । "ब्राह्मणस्य दक्षिणहस्ते होतव्यमिति श्रुतेः" इत्यनया श्रुत्या ब्राह्मणस्य दक्षिणहस्ते जुहुयादिति दर्शयितुमित्युक्तवानाचार्यः। ब्राह्मणस्य दक्षिणहस्ते होतव्यमित्येकवचनस्य विवक्षितत्वात् एकस्यैव पाणौ होमः। अमुमेवार्थं कात्यायनोऽप्याह–

"पित्र्ये यः पङ्क्तिमूर्धन्यः तस्य पाणावनग्निकः। हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निक्षिपेत्" इति ॥ पित्र्यब्राह्मणानां यः प्रथमस्तस्यैव हस्ते जुहुयात् इत्याशयः। यद्वा वैश्वदेविकप्रथमोपविष्टब्राह्मणहस्ते वा जुहुयात् । तथा च यमः– "दैव विप्रकरे अग्निः कृत्वाग्नौकरणं द्विजः" इति । वायुपुराणेऽपि– "वैश्वदेवे यदेकस्मिन् भवेयुर्द्व्यादयो द्विजाः। तदेकपाणौ होतव्यं स्याद्विधिर्विहितस्तथा" ॥ ततश्च वैश्वदेविकब्राह्मणपाणौ वा पित्र्यब्राह्मणपाणौ वा होमः कार्यः। ये गृह्याग्न्यभावे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लौकिकाग्निमिच्छन्ति ते सूत्रविरुद्धत्वान्निरसनीयाः ॥

२६१.पूर्वं दैवान् प्रवर्तते ॥ (०२.०३.३७)

इति । दैवसम्बन्धान् पदार्थान् पूर्वं कुर्यात् । अनेन पैतृकस्य पश्चाद्भावित्वमर्थसिद्धम् ॥

२६२.पश्चाद्दैवं विसर्जयेत् ॥ (०२.०३.३८)

इति । उद्वासनकाले वैश्वदेविकब्राह्मणानां पश्चाद्भावित्व-मुद्वासने पितृणां पूर्वभावित्वमर्थसिद्धम् ॥

इति द्वितीयपटलस्य तृतीयः खण्डः ॥

अथ द्वितीयपटलस्य चतुर्थः खण्डः ॥

२६३.अथ पात्राण्यालभेत ॥ (०२.०४.०१)

इति । अथ शब्दः आनन्तर्यार्थः। होमानन्तरं ब्राह्मणार्थं परिश्रृतं प्रभूतमन्नं देवपितृपात्रेषु सर्वव्यञ्जनेन सह परिवेष्य पात्रालम्भन मेव कार्यं नान्यत् पिण्डदानादि । भोजनविधाना-क्षिप्तपात्रोद्देशेनालम्भो विधीयते । ऋत्विजो वृणीतेतिवत् । प्रत्युद्देशं वाक्यपरिसमाप्तेः न्याय्यत्वात्प्रतिपात्रमालम्भः कार्यः॥

२६४.पृथिवी ते पात्रं द्यौरभिधानं ब्राह्मणस्त्वा मुखे जुहोमि ब्राह्मणानान्त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्रामुष्मिन् लोक इति ॥ (०२.०४.०२)

इति । अनेन मन्त्रेणालम्भः कार्यः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२६५.इदं विष्णुरिति वैष्णव्यर्चा यजुषा च भोक्तुरङ्गुष्ठ मन्नेऽवधाय ॥ (०२.०४.०३)

इति । प्रतीकग्रहणादेव सिद्धे वैष्णवीग्रहणं स्पष्टार्थम् । सूत्रान्तरस्थो मन्त्रो बुद्धिस्थत्वात् मुखं यजुषेति गृह्यते ॥

२६६.असावेतत्तेऽन्नं भुङ्क्ष्वेति ॥ (०२.०४.०४)

इति । विष्णो हव्यं रक्षस्वेति तयोर्व्यवस्थापि तत्रैवोक्तत्वादिह नोच्यते ॥

२६७.सकृत्सकृदपः प्रदक्षिणं तूष्णीं दैवे ॥ (०२.०४.०५)

इति । अपो गृहीत्वा देवपात्रममन्त्रकं प्रदक्षिणं परिषिञ्चेत्यध्याहारः। सकृत् सकृदिति वीप्सया प्रतिपात्रं परिषेकावृत्तिरस्तीति गम्यते । दैवे इति द्वितीयार्थे सप्तमी ॥

२६८.अपहता इत्यप्रदक्षिणं पित्र्ये ॥ (०२.०४.०६)

इति । पितृसम्बन्धिपात्रमपहतेति आरभ्यास्मानित्यन्तमन्त्रेणाप्रदक्षिणं परिषिञ्चेत् ॥

२६९.अश्नत्सु जपेत् ॥ (०२.०४.०७)

इति । ब्राह्मणेषु भुञ्जानेषु वक्ष्यमाणं सामादिकं जपेत् । अत्र जपतिर्वदत्यर्थे । इतरथा महन्म इत्यादीनां स्वरः प्रसज्येत ॥

२७०.व्याहृतिपूर्वां सावित्रीम् ॥ (०२.०४.०८)

इति। व्याहृतयः पूर्वाः यस्याः सा तथोक्ता । सङ्ख्यायाः अनिर्दिष्टत्वात् सप्तापि व्याहृतयो गृह्यन्ते। अत्रायमभिप्रायः-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रत्येकप्रणवपूर्विकाः व्याहृतीरुक्त्वा सावित्रीं पच्छोऽर्धर्चश-स्सर्वामिति ब्रूयात् । एवं वक्तव्ये शिष्टाचारः प्रमाणम् । केचित् तिस्रो व्याहृतीरित्याहुः। अपरे तु भूर्भुवःस्वःसत्यं पुरुष इति पञ्चापि । व्याहृति सामान्युक्त्वा सावित्रीं पच्छोऽर्धर्चशः सर्वामित्युक्त्वा पश्चात् सावित्रीसाम वाच्यमित्याहुः॥

२७१.तस्यां चैव गायत्रं साम ॥ (०२.०४.०९)

इति । तत्सवितुरित्यस्यामृचि गीतं गायत्रम् ॥

२७२.इदङ्ह्यन्वोजसेति प्रथमोत्तमे त्वामिदाह्यो नरस्स्पूर्व्यो महोनां पुराम्भिन्दुर्युवाकविरुपप्रक्षेमधुमति क्षियन्तः पवस्व सोम मधुमाङ्ऋतावा सुरूपकृद्राहसं माधुच्छन्दसमेषा माधुच्छन्दसी नाम संहितैतां प्रयुञ्जन् देवान् प्रीणाति ॥ (०२.०४.१०)

इति । निगदव्याख्यानमेतत् ॥

२७३.यद्वा उ विश्पतिस्स्सनादग्नेऽक्षन्नमी मदन्तह्यभित्रि पृष्ठ मक्रान् त्समुद्रः कनिक्रन्तीति द्वे एषा पित्र्या नाम संहितैतां प्रयुञ्जन्पितॄन् प्रीणाति ॥ (०२.०४.११)

इति । स्पष्टम् ॥

२७४.ऋग्जपस्तरत्समन्दी धावति यः पावमानीरध्येत्येतोन्वि न्द्र७स्तवामेति सूक्तानि ॥ (०२.०४.१२)

इति । स्पष्टम् ॥

२७५.षड्वि७शप्रथमखण्डः, पञ्चपञ्चाशत इत्यन्त्यः॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(०२.०४.१३)

इति । पञ्चपञ्चाशतइत्येव सिद्धे अन्त्य इति स्पष्टम् ॥

२७६.महन्मे वोच इति पितरो भूरित्यन्तो मन्त्रः देवकृतस्येत्यष्टौ ॥ (०२.०४.१४)

इति । स्पष्टम् ॥

२७७.मधुश्चुन्निधनमिति ब्राह्मणम् ॥ (०२.०४.१५)

इति । तं दुग्धमित्यन्तं पठेत् ॥

२७८.स्वर्गे लोके महीयते ॥ (०२.०४.१६)

इति । पूर्वोक्तानि प्रयुञ्जानः स्वर्गे लोके पूज्यते ॥

२७९.दत्तं चाक्षय्यमिदं भवति ॥ (०२.०४.१७)

इति । ब्राह्मणेभ्यो दत्तमिदं द्रव्यजातमनन्तं भवति । एतत्सूत्रद्वय मर्थवादः। केचिद्रुद्रसंहितां, विष्णुसंहितां, महानाम्नि, तवश्यावीय, सोमोत्पत्ति, वृषदर्विकुलमितीतिहास, मधुविद्योपनिषत्, प्राणाग्निहोत्रपञ्चमाहुति, पुरुषोपनिषदश्च श्रावयन्ति ।

२८०.महन्मे वोच इति जपित्वा तृप्तास्थेति पृच्छति । तृप्तास्म इत्यनुज्ञातो नमो वः पितरो जीवाय नमो वः पितरः शूषायेति ॥ (०२.०४.१८)

इति । पितरोभूरित्यन्तमुक्त्वा तृप्तास्थेति पृच्छेत् । ब्राह्मणस्यापेक्षयेदं बहुवचनं नोद्देश्यपित्रपेक्षया। तेनैकब्राहणपक्षे तृप्तोऽसीति वदेत्। द्विविप्रपक्षे तृप्तौ स्थ इति, बहुत्वपक्षे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तृप्तास्थेति । तृप्तास्म इत्यनुज्ञातो नमो वः पितरो जीवायेति । तृप्तास्म इति विप्रैरनुज्ञातः सन् नमो वः पितरः शूषायेत्यन्तं जपेत् । "आत्मनि गुरुषु बहुवचनान्तं वक्तव्यम्" । तेन सर्वत्र पक्षेऽपि तृप्तास्थेत्येवं वक्तव्यं न तु विपरिणामः॥

२८१.तृप्तान् ज्ञात्वा ॥ (०२.०४.१९)

इति । अशनव्यञ्जनादिना ब्राह्मणान् तृप्तान् ज्ञात्वा वक्ष्यमाणं कुर्यात् । तृप्तानिति वदन् प्राक्तृप्तेर्विकिरणं न कार्यमिति दर्शयति ॥

२८२.वैश्वदेविकोच्छिष्टसमीपेऽन्नं प्रकीर्य "आसोमपाश्च ये देवा यज्ञभाग विवर्जितास्तेषामन्नं प्रदास्यामि विकिरं वैश्वदेविक"मिति ॥ (०२.०४.२०)

इति । "असोमपा" इति मन्त्रेण वैश्वदेविक ब्राह्मणोच्छिष्टसमीपेऽन्नं विकिरेदित्यर्थः॥

२८३.पित्र्युच्छिष्टसमीपे "ये त्वग्निदग्धा जीवा येऽप्यदग्धाः कुले मम । भूमौ दत्तेन तृप्यन्तु तृप्तायान्तु परां गति"मिति ॥ (०२.०४.२१)

इति । पितृणामुच्छिष्टसमीपेऽन्नं विकिरेदित्यर्थः ॥

२८४.सर्वमन्नमेकत उद्धृत्य शेषमन्नमनुज्ञाप्यान्नशेषैः किं क्रियतामिष्टैः सहोपभुज्यतामिति ॥ (०२.०४.२२)

इति। सर्वशब्देनाशनापूपशाकादीन्युच्यन्ते । अन्न कृतान्नात् पिण्डपर्याप्तान् एकीकृत्य मिश्रीकृत्य तिलैः सह दद्यात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकतः एकीकृत्य इत्यर्थः । शेषमन्नं पिण्डार्थं गृहीतादन्नादवशिष्टं यत्पदार्थजातं तत्सर्वं प्रदर्श्यान्नशेषैः किं क्रियतामिति पृच्छेत् । इष्टैः सहोपभुज्यतामिति उत्तरं ब्रूयुरिति शेषः ॥

२८५.उच्छिष्टसमीपे दक्षिणापवर्गेषु दर्भेषु त्रीन् पिण्डान् दद्यात् ॥ (०२.०४.२३)

इति । वचनात् पितृपितामहप्रपितामहानुद्दिश्य तावतां पिण्डदानं कुर्यात् । अत्र पितृशब्दः उद्देश्यदेवतापरः । तथा च यत्र यावन्त उद्देश्यास्तावतां पिण्डदानं कार्यम् । पिण्डदानस्य प्राधान्यात् प्राच्योदीच्याङ्गकलापेन सहात्र प्रवृत्तिर्भवति । कुण्डपायिनामयने मासाग्निहोत्रवदुल्मुकनिधानादयः सर्वे भवन्ति । प्रसङ्गात् सव्येनोल्मुकमित्यादि व्याख्यायते ।

सव्येनोल्मुकं दक्षिणतः कर्षूषु निदध्यादपहता इति । कर्षूणां दक्षिणतः सव्येनोल्मुकमादाय अपहता इत्यनेन मन्त्रेण निदध्यात् । पिण्डप्रदानदेशे दक्षिणापवर्गाः तिस्रः कर्षूः खात्वा तासां दक्षिणतो निदध्यात् । उल्मुकनिधानमौपासनाग्निहोत्रादेव भवति न पाणिहोमादौ । तत्रोल्मुकनिधानासम्भवात् । "विषये लौकिकः स्या"दिति न्यायेन लौकिकाग्निरिति चेन्न, दर्श पौर्णमास्यां यथा प्रहरणं शाखान्न प्रयुनक्ति एवं निधानमप्युल्मुकं न प्रयुनक्ति ॥

अथ वक्ष्यमाणानां क्रमः पूर्वस्यामिति । **पूर्वस्यां कर्ष्वां पितुर्मध्यमायां पितामहस्योत्तमायां प्रपितामहस्य** । इति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पित्रादिशब्दाः उद्देश्यस्योपलक्षणार्थः। तेन प्रथमस्य प्रथम-कर्ष्वां स्वधानिनयनादिकं कार्यम् । द्वितीयायां कर्ष्वां पितामहस्य स्वधानिनयनादिकं कार्यम् । उत्तमायां कर्ष्वां प्रपितामहस्य । दक्षिणापवर्गत्वात् स्वधानिनयनादिकं कार्यम् । एतदुक्तं भवति- यस्मिन् श्राद्धे यावन्त उद्देश्यास्तावन्तः कर्ष्वः कार्याः। एत पितर इति मन्त्रेण कर्षूषु पितृणामावाहनं कार्यं स्वधा पिण्डादयश्च पाठक्रमात् ॥

उदपात्राण्यपसलवि कर्षूषु निनयेदेकैकस्य नामोक्त्वाऽ सावनेनिङ्क्ष्व ये चात्रत्वान्यांश्च त्वमनु तस्मै ते स्वधेति । तत्तत्पात्रस्थान्युदकानि तत्तत्कर्षूषु निनयेत् । अङ्गुष्ठतर्जन्यो-र्मध्यमप्रदेशोऽपसलवीत्युच्यते । पितृतीर्थेनेत्याशयः। कर्षूणा मुपरि अनेन मन्त्रेणोदकं निनयेत् । प्रथमं नाम सम्बुद्ध्यन्त-मुक्त्वा असौ शब्दस्थाने सम्बुद्धिशब्दं ब्रूयात् । श्रीकृष्ण-शर्मन् पितरितिवत् । एकैकस्येति वीप्सया । यस्मिन् श्राद्धे यावन्त उद्देश्यस्तेषां प्रत्येकं नामादि गृहीत्वा ये चात्रत्वेति मन्त्रमावर्तयेदिति गम्यते । एतदुक्तं भवति- अन्वष्टक्ये कर्मणि त्वां त्वं तस्मै इति शब्दानां पितरं प्रति समर्थत्वात् पिता-महादीनां वृत्तिमन्तरेण वक्तुमशक्यत्वात् पितामहादिष्वयं मन्त्र आवर्तते । त्वां, त्वं, तस्मै इति शब्दाः यदा पुरुषविशेषणं भवति तदा यच्छब्दोऽपि पुल्लिङ्गो भवति । यदा मात्रादिश्राद्धे स्त्रीविशेषणं तदा यच्छब्दादयः स्त्रीलिङ्गाः भवन्ति ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तथैव पिण्डान्निधायेति । यथोदकं निनीयते तथा पिण्डान्निदध्यात् । उदपात्राणि पिण्डानिति बहुवचनं ब्रुवन् पदार्थानुसमयेन एषां करणमिति दर्शयति । तेन सपिण्डीकरणादौ सर्वेषामुद्देश्यानां पिण्डप्रदानानन्तरमेव वक्ष्यमाणं कर्म कुर्यात् नान्यथेति वक्तुम् ॥

जपेदत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति । आदिग्रहणेनैव कृत्स्नमन्त्रप्रत्ययने सिद्धे कृत्स्नोच्चारणं कुर्वन्नेतज्ज्ञापयति- मात्रादिश्राद्धे, एकोद्दिष्टेऽपि यथापाठमेव ब्रूयात् । न विपरिणामेन पठितव्य इति । तथा च सर्वे मन्त्रा नोहनीयेति सिद्धमस्य मन्त्रस्यारादुपकारकत्वादावृत्तिर्न भवति ।

उक्त्वोदङ्गावर्तेति । सूत्रान्तरोक्तानि व्याहृत्यादीनि पितृसंहितान्तोक्त्वा इत्यनेनानूद्यते । अत्रायमाशयः-पूर्ववत् सप्तव्याहृतीः सावित्रीं तत्साम चोक्त्वा यद्वाउ विश्पति रित्यादि कनिक्रन्तीत्यन्तमुक्त्वा उदङ्मुख आवर्तेत । कथ-मावर्तेत्याह - **सव्यं बाहुमुपसंवृत्य प्रसव्यमावृत्येति** । सव्यं बाहुं सङ्कोच्याप्रदक्षिणं कृत्वा उदङ्मुखो भवेत् ।

उपताम्य कल्याणं ध्यायन्निति । अनुच्छवसन् आत्मनो यदभिलषितं ध्यायेत् ।

अभिपर्यावर्तमानो जपेदमीमदन्त पितरो यथाभागमावृषायिषतेति । प्रदक्षिणं कुर्वन्नेतन्मन्त्रं जपेत् । कृत्स्नमन्त्रपठन-प्रयोजनं अत्र पूर्वपूर्वमन्त्रवद् दृष्टव्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिस्रो दर्भपिञ्जूलीरञ्जने निघृष्य कर्षूषु निदध्यादिति । तिस्र इति ग्रहणं प्रदर्शनार्थम् । तेन यावन्तः पिण्डाः तत्सङ्ख्याकाः पिञ्जूल्य इत्युक्तं भवति । पिञ्जूलीरञ्जने मार्जयित्वा तत्तत्कर्षूस्थपिण्डेषु निदध्यात् । कर्षूशब्देन कर्ष्वस्थाः पिण्डा उच्यन्ते । आधाराधेययोरभेदोपचारात् । केचित्तु पिण्डानामधः कर्षूषु दर्भपिञ्जूल्योऽञ्जनादय इति वदन्ति । **यथापिण्डमिति** । पिण्डो येन मन्त्रेण दत्तः तेनाञ्जनमपि दद्यात् ।

तैलं सुरभि चेति । अत्र पिञ्जूलीनियमो नास्ति । तैलसुरभिणोरेव प्रदेयत्वेन द्वितीयोपात्तत्वात् च शब्दाच्च पिण्डमन्त्रो निर्दिश्यते । ननु पिण्डादिष्वविकारेण मन्त्रो वक्तव्यः, नेत्याह–**पिण्डप्रभृति यथार्थमूहेदिति** । पिण्डप्रभृति पिण्डाञ्जनाभ्यञ्जनगन्धेषु मन्त्रो यथा समवेतार्थो भवति तथोहेत्। अयमाशयः–प्रथममन्त्रे आद्यन्तस्थयोः अवनेनिङ्क्ष्व स्वधाशब्दयोः स्थाने भुङ्क्ष्व पिण्डमिति पिण्डस्य वदेत् । अङ्क्ष्वाञ्जनमित्यञ्जनम् । अभ्यङ्क्ष्वाभ्यञ्जनमिति तैलम् । अनुलिम्पानुलेपनमिति सुरभि । न च विधिवाक्ये यद्द्रव्यं चोदितं तदेव मन्त्रवाक्येऽपि पठितव्यम् । तथा च तैलं सुरभि चेत्येव वक्तव्यमिति वाच्यम् । ऊहाधिकरणे नियमस्यानभिहितत्वात् । केचित्तु तथैवाङ्गीकुर्वन्ति ॥

अथ निन्हवनं पूर्वस्यां कर्ष्वां दक्षिणोत्तानौ पाणी कृत्वा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नमो वः पितरो जीवाय नमो वः पितरः शूषायेति । अथ शब्दः आनन्तर्यार्थः। गन्धप्रदानानन्तरं निन्हवनं कुर्यात् नान्यत् स्मृतिप्राप्ताचमनादिकम् । निन्हवो नमस्कारः। प्रथमखातायां कर्ष्वामुपरि निन्हवनं कुर्यात् । दक्षिणोत्तानौ दक्षिणोत्तानः तेन सव्यपाणेर्न्यक्त्वमर्थसिद्धम् । पितर इति बहुवचनमेकत्वमभिधातुमसमर्थं स्यात् । एकोद्दिष्टे विकृतौ न विपरिणम्यते । असमर्थं यदपि प्रयुञ्जते लाक्षणिकार्थमादाय अतः । केचित्तु नमो वः पितर इत्यादि मन्त्राणामेकोद्दिष्टसपिण्डीकरणश्राद्धेषूहमिच्छन्ति ते सूत्र कारेण कृत्स्नोच्चारणस्य प्रयोजनं बहुवचनस्य समवेतार्थत्वात् मन्त्रार्थमजानन्तो निरस्ताः। किञ्च पितृपितामहप्रपितामहस्थाने प्रकृतावपि बहुवचनान्तपितृशब्द एव प्रयुज्यते चेत्तथा विकृतावपि एतदुक्तं भवति । पिण्डसंसर्गात् प्राग्भाविष्वेकोद्दिष्टेषु यत्प्रतिषिध्यते तदिहापि । अन्यत्सर्वं प्रकृतिवत् । वः पितरो जीवाय वः पितरः शूषाय । वः पितरो घोराय वः पितरो रसाय । वः पितरः स्वधायै वः पितरो मन्यवे । वः पितरः पितरो वः। गृहान्नः पितरो दत्त । सदो वः पितरो देष्म इति । तदूर्ध्वभाविषु एकोद्दिष्टेषु अविकारेण नमः शब्दादिसहितमेव ब्रूयात् तस्मान्मात्रादि श्राद्धे अन्वष्टक्यवदेव ब्रूयात् । न च मात्रादि श्राद्धेऽन्वष्टक्यवत् पितृपितामहप्रपितामहानामेव पिण्डदानादिकं कर्तव्यमिति शङ्कनीयम् । मात्रादिश्राद्धे पित्रादीनां पिण्डकरणे सौर्यादा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वप्यग्न्यादीनां यागः प्रसज्येत । तथा सति विकृतिचोदनानामानर्थक्यमापद्यते । न च "मातृश्राद्धे तु सम्प्राप्ते पितरं तत्र पूजयेत् । अपूजिते तु पितरि मात्रा पिण्डो न गृह्यते"॥ इति स्मृतेः। मातृश्राद्धे पितृवरणमावश्यकम् । अन्यथा षट्पिण्डव्यवहारापत्तेरिति वाच्यम् । तस्य वचनस्य जीवत्पितृकमातृश्राद्धविषयत्वात् तत्र षट्पिण्डप्रसक्तेरभावात् । न च सामान्य प्रवृत्तायाः स्मृतेर्बाधकं विना विषयसङ्कोचो न न्याय्य इति वाच्यम्। "पितरं तत्र पूजयेत् । अपूजिते तु पितरि पितुर्वरणमाचरेत्" इति पितृगतैकवचनस्यैव बाधकत्वात् । किञ्च वाचनिकबाधकान्तरमपि "तत्तच्छ्राद्धं तत्तद्वर्गवरणेनैव कारयेत्। वर्गान्तरं न वृणुयात् वृतं चेन्निष्फलं भवेत् ॥ मातृश्राद्धं मातृवर्गवरणेनैव कारयेत् । तत्र पित्रादिवर्गस्य वरणे मातृहा भवेत् ॥ पितुरेव पितुः कुर्यान्मातुरेव मृतेऽहनि ।अन्यथा कुरुते यस्तु रौरवं नरकं व्रजेत्"॥ इत्याद्यनेकस्मृतिप्रतिपादितरौरवादि दोषस्येवात्यन्तं बाधकत्वात् । अपि च निश्चितमूलैर्वचनैः अनिश्चितमूलस्य वचनस्य बाधा सम्भवात् अप्रमाणमेवेति स्मृतिरत्नचन्द्रिकादौ प्रपञ्चितत्वाच्च । तस्मान्मातृश्राद्धे पितृवरणमसिद्धमेवेति निष्कर्ष इति दिक् । एवं तन्तुनिधानकर्ष्वनुमन्त्रण मध्यमपिण्डप्रदानमन्त्राणामपि निन्हवनमन्त्रवद् व्याख्येयम् ॥

सव्योत्तानौ मध्यमायां नमो वः पितरो घोराय नमो वः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पितरो रसायेति । द्वितीयकर्ष्वामित्यर्थः ॥

दक्षिणोत्तानौ पश्चिमायां नमो वः पितरः स्वधायै नमो वः पितरो मन्यवे । उत्तमायां कर्ष्वामित्यर्थः । एकोद्दिष्टे पिण्डपितृयज्ञे च गुणभूतकर्ष्वाभावेऽपि न प्रधानभूतमन्त्राणां लोपः। प्रथमकर्ष्वामेवेतरयोः । स्थानापन्नत्वात् तत्रैव सर्वं कुर्यात् । **अञ्जलिं कृत्वा नमो व इति** । स्पष्टम् ।

सूत्रतन्तून् कर्षूषु निदध्याद्यथापिण्डमिति । सूत्रस्य तन्तुः सूत्र तन्तुः तान् कर्षूणामुपरि निदध्यात् यथापिण्डम् । पिण्डाः येन प्रकारेण दत्तास्तेन प्रकारेण तन्तून् निदध्यात् । कर्ष्वपेक्षयात्र बहुवचनम् । एकैकस्यां कर्ष्वामुपर्येकैकं तन्तुं निदध्यात् । प्रतिकर्षुषु मन्त्रावृत्तिर्भवति । एतदुक्तं भवति- यस्मिन् श्राद्धे यावत्यः कर्ष्वः तावन्तस्तन्तवो देयाः। तेन पिण्डपितृयज्ञे एकोद्दिष्टे च एक एव तन्तुः। मन्त्रोऽपि सकृदेव । ऊहाभावस्तु प्रागेव दर्शितः। एतद्व इत्यनेन तन्तुनिधानं कार्यम् ॥

ऊर्जं वहन्तीरिति कर्षूरनुमन्त्रयेतेति । कर्षूशब्देन तत्रस्था आप उच्यन्ते । कुत एतदवगम्यते? मन्त्रलिङ्गात् । एकोद्दिष्टे स्वधाशब्दमुक्त्वा अन्यत्सर्वं प्रकृतिवत् । मात्रादिश्राद्धे स्वधाशब्दमेवाविकारेण ब्रूयात् ॥

मध्यमं पिण्डं पुत्रकामां प्राशयेदाधत्तेति । द्वितीय पिण्डमित्यर्थः। पत्न्यनेकत्वे पिण्डं विभज्य सर्वासां प्रदद्यात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रतिपत्नी मन्त्रावृत्तिः। मन्त्रस्तु कर्तुरेव न पत्न्याः॥

अभून्नो दूत इत्युल्मुकमग्नौ प्रक्षिपेत् । दक्षिणहस्तेनानेन मन्त्रेण उल्मुकं प्रक्षिपेत् । मन्त्रार्थस्योभयता प्रतीतेः॥

इति द्वितीयपटलस्य चतुर्थः खण्डः ॥

अथ द्वितीयपटलस्य पञ्चमः खण्डः ॥

२८६.आचान्तेषूदकं पुष्पाण्यक्षतान् यथाशक्ति दक्षिणां च दत्वा ॥ (०२.०५.०१)

इति । आचमनात् प्रागेव पिण्डदानं कार्यमित्याचार्यपक्षः। आश्वलायनस्तु आचमनात् प्रागूर्ध्वं वेत्याह । तदर्थस्तु स्पष्ट एव । चकारादनुक्ताम्बूलादिकमपि देयम् ॥

२८७.अक्षय्यमिति वाचयित्वा ॥ (०२.०५.०२)

इति । विश्वेषां देवानां दत्तं श्राद्धमक्षय्यमस्त्विति ब्रूत । पितॄणां दत्तं श्राद्धमक्षय्यमस्त्वितिवत् तद्गोत्रनामपुरस्सरं षष्ठीविभक्त्या यस्मिन् श्राद्धे ये उद्देश्यास्तान् सर्वान् प्रत्येकं गृहीत्वा दत्तं श्राद्धमक्षय्यमस्त्विति ब्रूतेति कर्ता ब्रूयात् । अक्षय्यमस्त्विति ते प्रतिब्रूयुः ॥

२८८.स्वधा वाचनाय दर्भान् सपवित्रानास्तीर्य स्वधां वाचयिष्य इति पृच्छति ॥ (०२.०५.०३)

इति । दर्भान् स्व स्व पात्रस्थानि पवित्राणि चादाय तैः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सह स्तृणुयात्त् ॥

२८९.वाच्यतामित्यनुज्ञातः ॥ (०२.०५.०४)

इति । वाच्यतामिति प्रतिब्रूयुरिति शेषः ॥

२९०.पितृभ्यः पितामहेभ्यः प्रपितामहेभ्यः स्वधोच्यतामिति पृच्छेत् अस्तु स्वधेति प्रतिवचनम् ॥(०२.०५.०५)

इति । अत्र पित्रादिशब्दाः उपलक्षणार्थः । एवं च यत्र यत्र ये उद्देश्यास्तान् तत्र तत्र तांश्चतुर्थीबहुवचनमुक्त्वा स्वधोच्यतामिति पृच्छेदस्तु स्वधेति प्रतिवचनमिति स्पष्टम् ॥

२९१.स्वधां निनयेदिति ॥ (०२.०५.०६)

अस्तु स्वधेत्युक्ते आस्तीर्णेषु सपवित्रेषु दर्भेषु किञ्चिदुदकं निनयेत् । अत्र स्वधा शब्द उदकवचनः॥

२९२.धारां दद्यादूर्जं वहन्तीरिति ॥ (०२.०५.०७)

इति । अत्र तृतीयार्थे द्वितीया । दद्यादिति सिञ्चतेरर्थे वर्तते । उदकधारया परिषिञ्चेत् । सिञ्चतेः सकर्मकत्वात् कर्माकाङ्क्षायां संनिहिताः पिण्डाः तामाकङ्क्षां पूरयितुं शक्नुवन्ति । अर्घ्यपात्रस्थानामपां प्रतिपत्यपेक्षितत्वात्तैरेवोदकैः परिषेचनं कार्यम् । तत्तदर्घ्यपात्रस्थोदकैः तत्तत्पिण्डमप्रदक्षिणं परिषिञ्चेदूर्जं वहन्तीरिति मन्त्रेण । प्रतिपिण्डं मन्त्रावृत्तिः। अनूहस्तु प्रागेव दर्शितः। यत्र यावन्तः पिण्डाः तत्र तावन्ति अर्घ्यपात्राणि भवन्तीतरथा अपरपात्रसेचनप्रसङ्गात् घृतेन

घृ–१.नास्ति २.अधिकःपाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अर्घ्यपात्रभेदः सिद्धो भवति ॥

२९३.स्वधा सम्पद्यतामस्तु सम्पद्यतामिति पित्र्ये पुनर्वाचयेत् ॥ (०२.०५.०८)

इति । पित्रर्थे स्थितान् ब्राह्मणान् पुनर्वाचयेत् । अत्राय मनुष्ठेयार्थः- ऊर्जं वहन्तीरिति कर्ष्वनुमन्त्रणानन्तरमाचान्तेष्वि- त्यादि विश्वेदेवाः प्रीयन्तामित्यन्तं कृत्वा मध्यमपिण्डप्राशन- मुल्मुकप्रक्षेपणं च कार्यमितरथा द्वितीयपात्रस्य परिषेचनरूप- प्रतिपत्यभावः प्रसज्येत । तदन्त न्यायेन प्राशनस्य कर्षूल्मुक प्रक्षेपणस्याप्युत्कर्षः। पात्राणि परिचारकाः हरेयुः। देवपात्रस्य प्रतिपत्यभिधानाभावेऽपि परिषेचनपर्यन्तं स्थापनीयमेव शिष्टाचारात् ॥

२९४.उत्तानं पात्रं कृत्वा ॥ (०२.०५.०९)

इति । उत्तानमिति वचनात् परिषेचनानन्तरमर्घ्यपात्राण्यधो बिलानि स्थाप्यानीति दर्शयति । उत्तानं पात्रमित्येक वचनमविवक्षितम् । सर्वाणि पात्राण्युत्तानानि करोति ॥

२९५.दातारो नोऽभिवर्धन्तां वेदः सन्ततिरेव नः । श्रद्धा च नो मा घे[१]व्यपगाद्बहुधेयं च नोऽस्त्विति ॥ (०२.०५.१०)

इति । ब्रूयादिति शेषः॥

२९६.अनेनाशिषः प्रतिगृह्य ॥ (०२.०५.११)

इति । अनेन वचनेन आशीर्वचनं भुक्तवद्भिर्ब्राह्मणैः

घे-१.व्यगमत् २.व्यपगात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कारयेत् । अस्मच्छब्दस्थाने युष्मच्छब्दः प्रयोक्तव्यः। "अन्नं च नो बहुभवेदतिथींश्च लभेमहि । याचितारश्च नः सन्तु मा च याचिष्म कञ्चन" इति ब्रूयादिति शेषः। अत्राप्यस्मत् शब्दस्थाने युष्मच्छब्दमुत्तमपुरुषस्थाने मध्यमपुरुषं च प्रयुञ्जीरन् । द्वितीयमन्त्रस्य वाचनमाचार्येण अनुक्तमपि शिष्टाचारानुसारेण प्रयोक्तव्यम् ॥

२९७.गविविप्रेषु पिण्डा निधीयन्ते ॥ (०२.०५.१२)

इति । गवादीनामन्यतमेषु पिण्डाः प्रक्षेपणीयाः ॥

२९८.वाजे वाजेवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञा अस्य मध्वः पिबत मादयध्वं तृप्तायात पथिभिर्देवयानैरित्यनया विसृज्य" ॥ (०२.०५.१३)

इति । अनयेति ग्रहणमृगियमिति विकृतिष्वनूहः इति ज्ञापनार्थम् । तेन मात्रादिश्राद्धेष्वनूहः सिद्धः । तस्मादृचं नोहेदिति प्रतिषेधात् ॥

२९९.आमा वाजस्य प्रसवो जगम्यादिमेद्यावापृथिवी विश्व रूपी । आमागन्तां पितरं मातरं युवा वाचा सोमो अमृतत्वाय गम्यादित्यनुवृज्य ॥ (०२.०५.१४)

इति । गच्छतो ब्राह्मणाननुव्रजेत् ॥

३००.प्रदक्षिणीकृत्य गृहं प्रविशति ॥ (०२.०५.१५)

इति । प्रदक्षिणं कृत्वा गृहं प्रविशतीत्यर्थः ॥

३०१.वामदेव्यं गायेत् ॥ (०२.०५.१६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । वामदेव्यं तृचं गायेत् ॥

३०२.शेषस्य ग्रासावरार्ध्यं प्राश्नीयात् ॥ (०२.०५.१७)

इति । पित्राद्यर्थमुपकल्पितान्नशेषं ग्रासस्यावरार्ध्यमास्य परिमितकवलन्यूनं भुञ्जीयात् ॥

इति द्वितीयपटलस्य पञ्चमः खण्डः ॥

अथ द्वितीयपटलस्य षष्ठः खण्डः ॥

सर्वश्राद्धप्रकृतिभूतमासिश्राद्धमुक्त्वातद्विकृतिभूतमेकोद्दिष्टमाह–

३०३.अथैकोद्दिष्टम् ॥ (०२.०६.०१)

इति । अथ शब्दः आनन्तर्यार्थः। वृषोत्सर्जनं कृत्वा पश्चात् एकोद्दिष्टं कर्तव्यम् ।"एकादशेऽह्नि सम्प्राप्ते वृषोत्सर्गं च कारयेत् । प्रेतत्वान्न विमुञ्चेत यावन्तोत्सृज्यते वृषः" ॥ इति स्मृतेः । एकोद्दिष्टप्रयोगमारभते । पार्वणश्राद्धवत्कर्तव्यम् । अविशेषेण सर्वाङ्गेषु प्राप्तेषु कानिचित् प्रतिषिध्यते ॥

३०४.अदैवम् ॥ (०२.०६.०२)

इति । वैश्वदेविकं कर्म वर्जयेत् ॥

३०५.अधूपम् ॥ (०२.०६.०३)

इति । धूपरहितम् ॥

३०६.अदीपम् ॥ (०२.०६.०४)

इति । दीपरहितम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३०७.[घै]एकं पात्रमेकं पवित्रमेकोऽर्घ्य एकः पिण्डः॥ (०२.०६.०५)

इति । पिण्डशब्दः उपलक्षणार्थः। तेनावनेजनादीन्यपि एकैकानि ॥

३०८.नावाहनम् ॥(०२.०६.०६)

इति । गतार्थः। "आयन्तुन" इति भवत्येव ॥

३०९.नाग्नौकरणम् ॥ (०२.०६.०७)

इति । अग्निशब्दः प्रदर्शनार्थः। तेन पाणिहोमादिरपि न भवति ॥

३१०.न स्वधा ॥ (०२.०६.०८)

इति । आयन्तु नः, तिलोऽसीत्यादिषु यः स्वधाशब्दः तिष्ठति तत्र तं शब्दं विहाय ब्रूयात् ॥

३११.न नमस्कारः ॥ (०२.०६.०९)

इति । नमः शब्दमपि वर्जयेत् । न च स्वधानमः-शब्दयोरभावे तत्तन्मन्त्राणां साकाङ्क्षत्वात् वाक्यसमाप्तिर्न स्यादिति वाच्यम् । इषे त्वेत्यादिवत् अर्थकल्पनयाप्युपपत्तेः। अपहतेत्याद्यूर्जंवहन्तीरित्यन्तेषु मन्त्रेषु ये स्वधानमःशब्दा-स्तान्विहाय शिष्टमन्त्रमात्रं प्रकृतिवदेव ब्रूयात् । केचित् पितृशब्दस्थाने प्रेतशब्दं, वः शब्दस्थाने ते शब्दं च ब्रुवते । तेषां किं मूलमिति न विद्मः। न च मन्त्राणां समवेतार्थप्रका-

घै-१.नास्ति २.विशेषसँयोजनम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शकत्वात् प्रेतभूते पितृशब्दस्यासामर्थ्यमिति वाच्यम् । एवं तर्हि प्रेतशब्दं सूत्रकारो नावक्षत् । यद्वा पितृशब्दस्थाने प्रेतशब्दं ब्रूयादित्यवक्ष्यत् । न च तथोक्तम् । तस्मात्पितृ-शब्दमेव ब्रूयात् न प्रेतशब्दम् ॥

३१२.नाभिश्रवणम् ॥ (०२.०६.१०)

इति । व्याहृतिपूर्वामित्यादि च न भवेत् ॥

३१३.उपतिष्ठतामिति विसर्गः ॥ (०२.०६.११)

इति । वाजे वाजे इत्यस्य स्थाने उपतिष्ठतामित्येव ब्रूयात् । अथ भोक्तुर्दक्षिणामाह-

३१४.छत्रमुपानहौ वाससी कर्णपवित्रेअङ्गुलीमुद्रामञ्जनं च दत्वा ॥ (०२.०६.१२)

इति । कर्णपवित्रं कर्णाभरणम् । शिष्टं स्पष्टम् ॥

३१५.अक्षय्यस्थाने अभिरमतामिति विसृज्याभिरमतेति प्रणिपत्य प्रसादयेत् ॥ (०२.०६.१३)

इति । अभिरमतेति तं ब्रूहीति वदेत् । प्रणिपत्य प्रणम्य प्रसादयेत् हर्षयेत् ॥

३१६.पूतो भवति ॥ (०२.०६.१४)

इति । एकोद्दिष्टानन्तरं संस्कर्ता पूतो भवतीति वदन् एकोद्दिष्टानन्तरमेव संस्कर्तुः शुद्धिर्न ततः प्रागिति दर्शयति । तेन प्रथमेऽहनि यो जलदानं कुर्यात्स एकोद्दिष्टं कुर्यात् । दाहोपर्येकोद्दिष्टात् प्रागत्यन्तं शुचित्वान्नापैति । तथा च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्मृत्यन्तरम्- "एकोद्दिष्टान्त एव स्यात् संस्कर्तुः शुद्धता न हि"॥ इति । तथा-"आद्यश्राद्धमशुद्धोऽपि कुर्यादेकादशेऽहनि । एकादशेऽह्नि मध्याह्ने एकोद्दिष्टं विधीयते ॥ सपिण्डादन्यदहने श्राद्धान्तं मुनिचोदितम् । कुर्वीत दाहकर्तैव सपिण्डीं ज्ञाति-माचरेत्" ॥ पुत्राभावे तु स्यादित्यादि । "श्राद्धानि षोडशादत्वा नैव कुर्यात् सपिण्डनम् । तदाकृष्यापि कर्तव्यं सपिण्डी-करणात्पुरा" इति । स्मृतिचोदितमाद्यश्राद्धव्यतिरिक्तमेकोद्दिष्टं सर्वमतिदिशति ॥

३१७.एवं तृतीये पक्षे मासि मासि च ॥ (०२.०६.१५)

इति । तृतीयपक्ष इत्येतत् ऊनमासिकत्रयस्यापि उप-लक्षणम् । एवं च द्वादशमासिकानि, त्रीण्यूनानि, त्रैपक्षिकं चेति षोडशश्राद्धानि । तत्राद्यस्य एकादशाहे करणम्। तदुक्त-माद्यमेकादशेऽहनीति । तथा-"सप्तविंशदिनादूर्ध्वं त्रिष्वहस्सून मासिकम् । चत्वारिंशद्दिनादूर्ध्वं पञ्चाहस्सु त्रिपक्षिकम् ॥ तथा दशसु षण्मास्यं सप्तत्यतिशतात्परम् । ऊर्ध्वं पञ्च-दशाहस्सु चत्वारिंशच्छतत्रयम् ॥ ऊनाब्दिकं प्रकुर्वीत सौरेण पुनरा-ब्दिकम् ॥ नारदः। आब्दिकं प्रथमं कुर्यात् मृताहे पुनराब्दिकम् ॥ इति। मृताहं समतिक्रम्य मामले दिवसे यदि । आब्दिकन्तु प्रकुर्वीत सौरेण पुनराब्दिकम्" इति । एषामेको-द्दिष्टानां पार्वणभूतानां च परेद्युस्तिलोदकमपि न कार्यम् । तदुक्तम्-"ऊनेषु च त्रिपक्षे च मासि मासि मृतेऽहनि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संवत्सरविमोके च न कुर्यात्तिलतर्पणम्" इति । संवत्सरान्त-सपिण्डीकरणे सर्वेषां मासिकानामेकोद्दिष्टमेव । त्रिपक्षत्रिमास षाण्मासेषु सपिण्डीकरणे सर्वेषामुत्तरभाविनां चैकोद्दिष्ट-मपकृष्यापि कृत्वा तत्पश्चाद्भाविनां मासि मासि पार्वणश्राद्धं कार्यं न तु पूर्वतनानां पुनः पार्वणरूपेण करणमिति । एतच्च स्मृतिषु च स्पष्टम् ।

एतेषामेकोद्दिष्टरूपाणां मासिकानां दक्षिणामाह-

३१८.सर्वेषां गोमिथुनं दद्यात् ॥ (०२.०६.१६)

इति । स्पष्टम् । एतत्सूत्रद्वयं केषुचित्पुस्तकेषु प्रमादाद् व्युत्क्रमेण लिखितम् ॥ सपिण्डीकरणमाह -

३१९.ततः संवत्सरे पूर्णे षण्मासे त्रिमासेऽर्धमासे द्वादशरात्रे वा ॥ (०२.०६.१७)

इति । तत इति एकोद्दिष्टश्राद्धषोडशानन्तर्यमुच्यते । तदुक्तम्- "श्राद्धानि षोडशादत्वा नैव कुर्यात् सपिण्डनम् । अपकृष्यापि कर्तव्यं सपिण्डीकरणात्पुरा ॥ तथा- श्राद्धानि क्रमशो लब्ध्वा सपिण्डीकरणे कृते । प्रेतभावविनिर्मुक्तः स्वकर्मफलभाग्भवेत्" इति । संवत्सरे पूर्णेऽब्दपूर्ते, षण्मासे षष्ठे मासे, त्रिमासे तृतीये मासे, अर्धमासे पञ्चदशे दिवसे, द्वादशदिवसे, द्वादशरात्रे द्वादशाहे वा सपिण्डीकरणं कार्यम् । तथा च स्मृतिः - "आनन्त्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात् । अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते ॥ एकादशे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वादशे वा त्रिपक्षे वा त्रिमासि वा । षष्ठे चैकादशे वाब्दे सम्पूर्णे वा शुभागमे ॥ सपिण्डीकरणस्येत्थमष्टौ कालाः प्रकीर्तिताः। साग्नौ कर्तर्युभावाद्यौ प्रेते साग्नावनन्तराः। अनग्नेस्तु द्वितीयाद्याः सप्तकालाः प्रचोदिताः॥ प्रेतश्चेत् आहिताग्निः स्यात् कर्तानग्निर्यदा भवेत् । सपिण्डीकरणं तस्य कुर्यात् पक्षे तृतीयके ॥ नासपिण्डीकृते प्रेते पितृयज्ञः प्रवर्तते। पितरौ प्रमितौ यस्य देहस्तस्याशुचिर्भवेत्। न दैवन्नापि पित्र्यं च यावत्पूर्णो न वत्सरः" इति । "सपिण्डीकरणात् प्रेते पैतृकं पदमास्थिते । आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्तते ॥ द्वादशाहे ततस्तस्मात् पित्रोः कुर्यात् सपिण्डनम् । उत्पाद्य पुत्रं संस्कृत्य वेदमध्याप्य यः पिता । कुर्याद्वृत्तिं च नष्टेऽस्मिन् द्वादशाहं महागुरौ ॥ महागुरुनिपाते तु आर्द्रवस्त्रोप[घो]वासिना । अतीतेऽब्देऽपि कर्तव्यं प्रेतकार्यं यथाविधि ॥ ततस्त्रयोदशे तस्य सपिण्डीकरणं भवेत् । पित्रोः सपिण्डीकरणे द्वादशाहा-दिषूद्भवे । सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतम् । द्रव्येण चाविभक्तेन तत्सर्वैस्तु कृतं भवेत् ॥ अकृत्वा प्रेतकार्याणि नित्यनैमित्तिकान्यपि । न कुर्यात्तावदाशौचं यावत्प्रेतस्य मोक्षणम् ॥ दाहादिविधिवत् कृत्वा सपिण्डीकरणे कृते। पिण्डत्वमश्नुते प्रेतः प्रेतत्वं च विमुञ्चति ॥ अकृते प्रेतकार्ये तु न कुर्यादात्मनः शुभम् । कुर्यादेव शुभं कर्म मुख्यकर्तुश्च

घो–१.वीतिना २.वासिना ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सन्निधौ ॥ सपिण्डीकरण श्राद्धमकृत्वा शुभकर्मकृत् । ध्रुवमाप्नोति नरकं सपिण्डानां मृतौ क्रमात् ॥ सपिण्डी-करणात्पूर्वं शोभनं न विधीयते । यदि चेत्तत्कृतं कर्म कर्तृ-नाशाय कल्पते ॥ भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा । सपिण्डीकरणं कृत्वा कुर्यादभ्युदयं ततः॥ नासपिण्डीकृते प्रेते पितृकार्यं प्रवर्तते । सपिण्डीकरणं कृत्वा कुर्यात्पित्र्यं शुभानि च ॥ ज्येष्ठपुत्रे तु दूरस्थे कनिष्ठाद्याः यथोदितम् । कुर्युः पित्रोस्तु संस्कारं सपिण्डीकरणं न तु ॥ ज्येष्ठपुत्रस्य सद्भावे कनिष्ठः कुरुते क्रियाम् । प्रेतत्वान्न विमुच्येत पितृत्वं च न गच्छति ॥ नवश्राद्धं सपिण्डं च श्राद्धान्यपि च षोडश । एकेनैव तु कार्याणि संविभक्तधनेष्वपि ॥ मुख्यकर्ता विदेशस्थो मातापित्रोर्मृतौ यदि । संवत्सरे व्यतीतेऽपि कुर्यात् प्रेतक्रियां पुनः॥ ज्येष्ठेन वा कनिष्ठेन सपिण्डीकरणे कृते । देशान्तरं गतानां तु पुत्राणां च कथं भवेत् ॥ श्रुत्वा तु वपनं कृत्वा दशाहान्तं तिलोदकम् । ततः सपिण्डीकरणं कुर्यादे-कादशेऽहनि ॥ द्वादशाहे न कर्तव्यमिति शातातपोऽब्रवीत् । देशान्तरस्थौ पितरौ मृतौ चेत् अन्येऽपि कुर्यादखिलं च पैतृकम् । दाहं विना तानि पुनश्च सर्वं ज्येष्ठोऽपि कुर्यादनुजैः सपिण्डनम् ॥ मुख्यकर्ता विदेशस्थः कालेऽकाले श्रुते यदि । तिलवारि प्रकुर्वीत पिण्डदानं विवर्जयेत् ॥ ज्येष्ठपुत्रोऽनग्निमान् स्यात् कनिष्ठस्त्वग्निमान् यदि । कनिष्ठ एव कुर्वीत

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सपिण्डीकरणं पितुः॥ अनग्नयस्तु सर्वे स्युर्ब्रह्मचर्येण वावृताः। तदा ज्येष्ठः सपिण्डन्तु कुर्याद्वै लौकिकानले ॥ सपिण्डीकरणं कुर्यात् स्मार्ताग्नौ तु विचक्षणः। अभावे पाणिहोमः स्यात् लौकिके वापि केचन ॥ कनिष्ठेनापि कर्तव्याः पित्रोः पिण्डोदकक्रियाः। ज्येष्ठेनापि च कर्तव्यं सपिण्डीकरणं पुनः॥ यवीयसा कृतं कर्म प्रेतशब्दं विहाय तु । तदग्रजेन कर्तव्यं सपिण्डीकरणं पुनः ॥ पुनः सपिण्डीकरणश्राद्धं पार्वणवच्च रेत् । अर्घ्यसंयोजनं नैव पिण्डसंयोजनं न च" इति च ज्येष्ठस्त्वन ग्निकश्चेत् कनिष्ठः साग्निमान् चेदपि ज्येष्ठेनैव सपिण्डीकरणं मुख्यमिति स्मृतिसारोक्तं ग्राह्यम् । तथा च गर्गः-"ज्येष्ठपुत्रे त्वनग्नित्वे कनिष्ठः कुरुते क्रियाम् । प्रेतत्वान्न विमुच्येत पितृत्वं च न गच्छति ॥ कनिष्ठविषयं मूकानग्निमज्ज्येष्ठ विषयम् । शुभकर्म निमित्तस्य नान्दी श्राद्धस्य पूर्वतः। तदूर्ध्वमासिकश्राद्धानपकृष्यापि कारयेत् ॥ आब्दिकं प्रथमं कुर्यात् मृताहे पुनराब्दिकम् । मृताहं समुपक्रम्य मामले दिवसे सति ॥ आब्दिकं तु प्रकुर्वीत सौरेण पुनराब्दिकम् । ततो मृताहे तच्छ्राद्धं भूरि तूष्णीं तु कारयेत् ॥ त्रिवर्षादुदकं पिण्डं चतुर्थादुदकं बलिम् । पञ्चमादस्थिचयनं श्राद्धान्तं सप्तमात् परम् ॥ अष्टमात् सकलं ग्राह्यं सपिण्डीकरणं विना । ब्रह्मचारी मृतौ तस्य सपिण्डीकरणं भवेत् ॥ नारायणबलिर्वापि तथा संन्यासिनोऽपि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च । एकादशाहे यतिनः पार्वणं विधिवच्चरेत् ॥ पितुर्मे ब्रह्मभूतस्येत्यादि सङ्कल्पमाचरेत् । नारायणबलिं वापि कुर्यादिति हि केचन" ॥ इत्यादि बहुस्मृतिवचनान्यन्यत्रानुसन्धेयानि ॥ अथ प्रकृतमनुसरामः ।

न ततः पूर्वमिति वक्तुं ततः शब्दः प्रयुक्तः। दैवान्मानुषाद्वा एकोद्दिष्टोत्कर्षेऽपि एकोद्दिष्टं कृत्वैव कार्यं न ततः पूर्वं सपिण्डीकरणम् । यस्मिन्नहनि रात्रौ वा संवत्सरः पूर्यते तस्मिन्नहनि सपिण्डीकरणं कुर्यात् । सर्वत्र नाक्षत्रमासः स्वीकार्यः। कथम्? संवत्सरशब्दसाहचर्यात् । चान्द्रमासस्वीकारो मासिकसपिण्डीकरणयोः कालैक्यादन्यतरस्य कालो बाध्येतासम्भवत्यां गतौ तदन्याय्यम् । यस्मिन्नहनि षष्ठो मासः पूर्यते तस्मिन्नहनि वा कुर्यात् । एवमुत्तरत्रापि योजनीयम् । अर्धमासे पञ्चदशेऽहनि द्वादशेऽहनि वा कुर्यात् । एतत् स्मृत्युक्तकालानामप्युपलक्षणम् । छन्दोगस्यैते कालाः मुख्या इति । एतत् सपिण्डीकरणं श्राद्धद्वयप्रकृतिकम् । पार्वणतन्त्रमेकोद्दिष्टतन्त्रं च सह प्रवर्तते । आरादुपकारकाणि तानि सकृदेव कार्याणि । आयन्तु नः,अत्र पितरो,ऽमी मदन्त पितरो, नमो वः पितरः, कर्ष्वनुमन्त्रणादीनि आरादुपकारकाणि । निन्हवनमन्त्रास्तु प्रतिपिण्डमावर्तन्ते ॥

३२०.चत्वारि पात्राणि घौ सतिलगन्धोदकानि ॥ (०२.०६.१८)

घौ–१.सतिलोदकानि २.सतिलगन्धोदकानि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति । चत्वार्यर्घ्यपात्राणि सतिलोदकानि तिलगन्धोदक-सहितानि भवेयुः । तेन देवपात्रव्यतिरिक्तमेतत्पात्रचतुष्टयमिति गम्यते । अत्रोक्तं देवपात्रव्यतिरिक्तं पात्रं चतुष्टयमित्येतत् कथ-मवगम्यते? तिलशब्दोपादानात् तद्व्यतिरिक्तमिति निश्चीयते । अत्र विशेषमाह-

३२१.त्रीणि पितृणामेकं प्रेतस्य ॥ (०२.०६.१९)

इति । मृतस्य पितृपितामहप्रपितामहानामेकैकस्यैकैकं पात्रं प्रेतस्य त्वेकमिति चत्वारीति वदन्ति । सूत्रकारस्य अयमभिप्रायः- देवपात्रव्यतिरिक्तानि चत्वारि न तु पिण्डाधि-क्येऽपि पात्राधिक्यं भवति ॥

ननु सपिण्डीकरणे मृतस्य पित्रादीनां त्रयः पिण्डाः मृतस्यैकः। एवं सति सपिण्डीकरणे चत्वार एव पिण्डाः। अतः कथं पिण्डाधिक्यप्राप्तिः? उच्यते, जीवभर्तृकायाः सपिण्डी-करणे भर्तुः पित्रादीनां त्रयाणां त्रीन् पिण्डान् दत्वा भर्तु-र्मात्रादीनां तिसृणामपि पिण्डत्रयं दातव्यं मृतायाश्चैकः एवं सप्तपिण्डा भवन्ति । जीवभर्तृकायाः सपिण्डीकरणे भर्तुः पित्रादीनां मात्रादीनां च मध्ये ये जीवन्ति तानतिक्रम्य मृतांस्त्रीनुद्दिश्य पिण्डत्रयं दद्यात् । मातृवर्गेऽपि जीवन्तीरति-क्रम्य मृतानां मात्रादीनां तिसृणां पिण्डत्रयं दद्यात् । पितृवर्गस्य पिण्डदानं मातृवर्गस्यैव । वरणाद्युपचारैः पूजनं मातृवर्गस्यैव तत्र देवतात्वात् । तत आह यमः- "जीवत्पिता पितामह्याः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मातुः कुर्यात् सपिण्डनम्" इति । सपिण्डतामित्यन्न भोजन-पिण्डदाने अभिधीयते । सर्वत्र तथा प्रसिद्धेः पितामहीग्रहणं प्रदर्शनार्थम् । पितामह्यां जीवन्त्यां प्रपितामह्याद्यास्तिस्रः, तस्याःजीवन्त्यां ततः परास्तिस्रः, प्रपितामह्यां जीवन्त्यां पिता-मह्यां मृतायां पितामहीमुद्दिश्य प्रपितामह्याः पराभ्यां दद्यात् । अत्रायमाशयः-स्त्रीणां सपिण्डीकरणेषु स्त्रीणामेव देवतात्वं पुरुषाणां सपिण्डीकरणेषु पुरुषाणामेव देवतात्वम् । अत्राय मनुष्ठेयार्थः-जीवभर्तृकायाः सपिण्डीकरणे ब्राह्मणभोजनान्तं मातृवर्गस्यैव कृत्वा अवनेजनादिकं वर्गद्वयस्य कार्यम् । मातृवर्गार्थपात्रस्योदकैरेव पितृवर्गस्यावनेजनं कृत्वा मातृवर्गस्यावनेजनं कुर्यात् । पिण्डप्रदानादिकं पदार्थानुसमयेन पितृवर्गस्य प्रथमं कृत्वा पश्चात् मातृवर्गस्य कुर्यात् । पात्रादि संसर्गस्तु मात्रादिभिः सह । मृतभर्तृकायास्तु पित्रादिभिः सह वा पितामह्यादिभिः सह वा सपिण्डीकरणं कुर्यात् । अयं विकल्पो व्यवतिष्ठते ॥

धर्मविवाहोढायाः पुत्रः पितामह्यादिभिरेव कुर्यात् । आसुरादिविवाहोढायाः पुत्रः पितामह्यादिभिर्वा पित्रादिभिर्वा कुर्यात् । तथा च यमः- "प्रमीतपितृकः पित्रा पितामह्यापि वा सुतः" । इति एतद्वचनं व्याचक्षाणेन कालादर्शेन व्यवस्था प्रतिपादिता । सा तु तत एव दृष्टव्या स्मृतिचन्द्रिकायाम् । पितृवर्गेण वा मातृवर्गेण वा कार्यम् । यदि पितृवर्गेण कुर्यात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वरणादि सर्वोपचारेषु पित्रादीनामेव देवतात्वं न मातृवर्गस्य । यदि मातृवर्गेण कुर्यात्तदा वरणादिषु मातृवर्गस्यैव देवतात्वम् । पिण्डा अपि चत्वारः। न पितृणाम् । एवं सर्वत्रोहनीयम् । अनुयाने तु पत्या सहैव सपिण्डीकरणं कार्यम् । तदाह यमः "पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः । सा मृतापि हितेनैक्यं गता मन्त्राहुतिवृतैः" इति । अत्रैकशब्दः पितामहादि विकल्पः व्यावृत्यर्थः। तथा शातातपोऽपि– "मृता यानुगता नाथं सह तेन सपिण्डनम् । अर्हति स्वर्गवासोऽपि यावदाभूतसम्प्लवम्"॥ षड्विंशन्मते अपि – "मातुः सपिण्डीकरणं पत्या सार्धं विधीयते । यस्मात्पतिव्रतानां तु सैव सन्नतिरिष्यते" इति । मनुः– "स्त्रीणां पतिव्रतानां तु भर्त्रा सापिण्ड्यमुच्यते । पितामहादिभिः सार्धं पितृपिण्डं नियोजयेत्"॥ इति । अत्र सापिण्ड्यशब्देन साङ्गं सपिण्डीकरणमुच्यते । तेन अर्घ्यपिण्डसंसर्गादिकं सर्वं पत्येव कार्यम् । मातुरर्घ्यं पित्रर्घ्येण, मातृपिण्डं पितृपिण्डेन नियोज्य तं पिण्डं त्रेधा कृत्वा तत्पितृपिण्डेषु नियोजयेदित्यर्थः। अत एव याज्ञवल्क्योऽपि– "स्त्रीणां सपिण्डीकरणमन्वारोहे विशेषतः। पत्या सहैव नियतं ततोऽन्यत्र स्वमातृभिः"॥ इति । शङ्खोऽपि– "अन्वारोहे तु भर्तैव मातुः सह सपिण्डनम् । स्त्रीपिण्डं भर्तृपिण्डेन नियोज्य विधिवत्पुनः॥ तत्पिण्डं भर्तृपिण्डैस्तु संसृजेदिति निश्चयः" इति । स्मृतिसारसमुच्चये– "परेद्युरनु–

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यानेऽपि मरणाहः क्रमेण तु । दहनादि सपिण्डान्तं सह कुर्याद्यथाविधि ॥ पिण्डं दत्वा स्वधां तस्याः भर्तृपात्रे निनीय तु । मन्त्रेणैव तु तत्पात्रं पितृपात्रेषु सेचयेत् ॥ भर्तृपिण्डेन संसृज्य पितृपिण्डेषु योजयेत्" इति । विश्वादर्शेऽपि- "स्त्रीपिण्डे पतिपिण्डगे तदनुतं पित्रादिभिर्मिश्रयेत्" इति । अपरार्के जातूकर्णिः-"मातुः सपिण्डीकरणे पितृपूर्वं समाचरेत्। पितामह्यादि वरणे दोष एव भवेद्ध्रुवम्" इति । पाराशर्ये- "भर्तृसायुज्यकामानां स्त्रीणामनुमृतौ तदा । भर्त्रा सहैव सापिण्ड्यं साम्परायिकमुच्यते" इति । यत्तु कैश्चिदुक्तमनुयाने पत्या सह प्रथमं संयोज्य तत्पुनर्द्वेधा कृत्वा द्विविधमपि प्रत्येकं त्रेधा कृत्वा पितामह्यादि पिण्डेषु पितामहादिपिण्डेषु च योजयेदिति । यच्चोक्तं चन्द्रिकाकारेण पितृपिण्डं पितामहादि- पिण्डैः,मातृपिण्डं पितामह्यादिपिण्डैः संसृजेदिति । तत्पूर्वोक्त- मनुपराशरयाज्ञवल्क्याद्यनेकमूलस्मृतिविरोधाच्छिष्टाचाराभावात् दोषस्मरणाच्च उपेक्ष्यम् । न च मातृसपिण्डीकरणे पिता- मह्यादीना मुद्देश्यत्वविधायकवचनं निर्विषयं स्यादिति वाच्यम् । तद्वचनस्य अनुमृतिव्यतिरिक्तप्रसङ्गमरणादिविषयत्वेन निर्विषय- त्वासम्भवात् ।

नन्वनुमरणे पत्या सह सपिण्डीकरणे मासिकप्रत्याब्दि- कादौ मातुः पार्वणं न स्यात् । श्वश्वादिभिः सह पिण्ड- संयोजनाभावे नोद्देश्यासम्भवात् । न च व्युत्क्रमवृत्तौ मातुः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पितुर्वा पुनः सपिण्डीकरणं कृत्वा नैरन्तर्येण तत्पित्रादिभिः पार्वणवदनुयानमृतमातुः पुनः पितामह्यादिभिः सह सपिण्डीकरणश्राद्धं कृत्वा पार्वणकरणमिति वाच्यम् । तथा कालादर्श वचनं बहुस्मृतिविरुद्धं तस्माद्रुद्रस्कन्दव्याख्याने मातृणामेव वरणमित्युक्त्वा न पितृवरणं कालादर्शेऽपि विवाहभेदे दत्तम्। तस्मात् सपिण्डीकरणविध्यदर्शनादिति चेत् न, पत्या सह सपिण्डीकरणेऽपि मासिकप्रत्याब्दिकादौ पितामह्यादिभिः सह पार्वणस्य स्मृतिषु सिद्धत्वात् । यस्मिन् कर्मणि यस्य देवतात्वं स्मृतिचोदितं तत्तथैवानुष्ठेयम् । अन्यथा निष्फलप्रसङ्गात् । नहि सपिण्डीकरणे ये उद्देश्यास्तेषामेव सर्वत्रोद्देश्यमिति नियमः। आसुरादि विवाहोढापुत्रकर्तृकसपिण्डीकरणे मासिकश्राद्धादौ च व्यभिचारात् । किञ्च मासिकादौ पितामह्यादिभिःसह पार्वणसम्भवे तत्पुत्रपौत्रकर्तृकमातृश्राद्धे सन्ततिविच्छेदापत्तेः इत्यलमनया प्रसक्तानुप्रसक्त्या प्रकृतमनुसरामः ॥

दैवात् सह प्रमीतयोः पित्रोः सपिण्डीकरणं सहतन्त्रेण कार्यम् । तदुक्तं चन्द्रिकायाम्–"पाथेयं चैव गोदानं वृषोत्सर्गः पृथक् पृथक् । सह प्रमीतयोः पित्रोः तन्त्रेण स्यात् सपिण्डनम् ॥ पितामहादि पात्रेषु प्रेतपात्रस्य सेचनम् । पितामह्यादिपात्रेषु प्रेतायाः पात्रसेचनम् ॥ पिण्डयोश्च तथा योगात् उपस्थानादिकं समम्" इति । ननु सङ्गतमरणे पित्रादेः सपिण्डीकरणमिति चेन्न, मरणक्रमेण सर्वेषां दाहादि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सपिण्डीकरणविधानात् । पितृमातृव्यतिरिक्तानां मरणक्रमः। पित्रोस्तु मध्ये पश्चाद्वा मरणे पितृमातुश्च सर्वं पूर्वं पूर्वं समाप्य पश्चादन्येषां कारयेत् । मासिकप्रत्याब्दिकादौ तिथिभेदे तत्तिथौ कुर्यादिति केचित् । पात्रं पिण्डसंयोजनात् पूर्वं पाथेयदानं वैतरणी गोदानं च कार्यम् । **देशाद्देशं प्रयातृणामध्वश्रमहरं परम् । पाथेयं पुण्डरीकाक्ष तृप्तिं शर्म च यच्छ मे ॥** इति पाथेयदनम् । **यमद्वारे पुरे घोरे तप्ता वैतरणी नदी । तामहं तारयिष्यन्तु कृष्णां गां प्रददामि ते ॥** इति गोदानं च कुर्यात् । अन्यदपि दशदानादिकं च कुर्यात् । प्रकृतमनुसरामः ।

प्रेतपात्रासादनं मध्यमपात्रस्य पुरस्तात् भवति शिष्टाचारात् । अत्र पार्वणप्रकृतित्वात् वरणादि सर्वं पार्वणवत् कार्यं पितृणाम् । प्रेतस्यैकोद्दिष्टवत् प्रकृतित्वात् । होमे परिचरणतन्त्रमेव भवति न त्वाज्यतन्त्रम् । केचिदाज्यतन्त्रमिच्छन्ति । तत्र प्रमाणमतिदेशाभावेन गवेषणीयम् । तत्र पित्र्यहोमपिण्डदाने भोजनार्थं यदन्नं तेनैव कार्ये, धर्मशास्त्रे तथा प्रतिपादितत्वात् । अवनेजनादि पिण्डदानादिकं पित्रादीनां प्रेतस्य च पदार्थानुसमयेन कार्यम् । तत्र अत्र पितरो, अमीमदन्त, नमो वः पितरः पितरो नमो वः, ऊर्जं वहन्तीरित्येतेषामारादुपकारकत्वात् सकृदेव ॥

३२२.प्रेतपात्रं पितृपात्रेष्वासिञ्चति "ये समानाः समनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पता"

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मिति ॥ (०२.०६.२०)

इति । ऊर्जं वहन्तीरिति कर्ष्वनुमन्त्रणान्ते प्रेतपात्रस्थ मुदकं ये समानाः इति मन्त्रेण पित्रादीनां पात्रेषु किञ्चित् किञ्चित् निनयेत् । यथा प्रेतपात्रं निरवशेषं भवति तथा निनयेत् ॥

३२३.प्रेतपिण्डं पितृपिण्डेषु निदधाति "ये सजाताः सजातयो जीवा जीवेषु मामकास्तेषां श्रीर्मयि कल्पतामस्मिँल्लोके शतं समा" इति ॥ (०२.०६.२१)

इति । पैतृकेषु पिण्डेषु निवपति । प्रेतपिण्डमादाय त्रेधा विभज्य पित्रादिपिण्डानामुपरि ये सजाता इति मन्त्रेण निवपेत्। अत्र पैतृकेषु पिण्डेष्विति बहुवचनं वदन्नाचार्यः एतद् ज्ञापयति त्रिष्वेव पिण्डेषु संयोजनं कार्यमिति । तेन प्रेतायाः त्रिष्वेव संसर्गः कार्यः नन्वेकेन न वा षड्भिरिति सिद्धम् । उभयत्र पिण्डग्रहणं प्रदर्शनार्थम् । तेन यैः सह संसर्गः करिष्यते तेषां पात्रेषु पिण्डेषु च संसर्गः कार्यः। इतरथा स्त्रीणां सपिण्डीकरणेऽनिष्टमापद्येत ॥

३२४.अथोपस्थानम् । "सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानतां देवाभागं यथापूर्वे सञ्जानाना उपासत । समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषां समानं केतो अभिसंरभध्वम् । संज्ञानेन वो हविषा यजामः। समानीव आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथावस्सु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहासती''त्येते पिण्डा व्याख्याताः ॥ (०२.०६.२२)

इति । पात्राणि पिण्डांश्चोपतिष्ठेरन् । आचान्तेष्वित्यादि पूर्ववत् । सपिण्डी करणात् प्राग्भावितानां एकोद्दिष्टानामेकोद्दिष्टं प्रकृतिः। ततः परेषां पार्वणानां मासिश्राद्धं प्रकृतिः। ननु सपिण्डीकरणादूर्ध्वभाविषु यद्येकोद्दिष्टस्य प्रकृतित्वं तथात्वे च सपिण्डीकरणेन प्रेतत्वाद्विमुक्तस्य एकोद्दिष्टधर्मित्वे पितृभूतस्य पुनरपि प्रेतत्वं प्रसज्येत । कृष्णलादाववघातवद्यावदंश-मपेक्षितं तावदंशं प्रवर्तते । द्वितीयतृतीयपिण्डयोर्ये धर्माः ते न भवन्ति । प्रथमपिण्डस्य यावदपेक्षितं तावद्भवति । अर्घ्यपात्रे त्विदमेकमेव । सर्वत्र स्वधानमःशब्दाः वक्तव्याः। आवाहन मपि भवति । पार्वणधर्मत्वात् धूपदीपावपि भवतः। अग्नौ-करणमपि भवत्येव । अवनेजनं, पिण्डादीन्येकैकानि । निन्हवनमन्त्राः सर्वे भवन्ति । अभिश्रवणमपि भवति । मध्यम पिण्डप्रदानं न भवति । मध्यमपिण्डाभावात् । वैश्वदेवस्य विकार एवेत्युच्यते । यत्र शास्त्रानुसारेण प्रतिषिध्यते तत्र दैविकानि न भवेयुः। यत्र न प्रतिषेधः तत्र प्रवर्तते । यैस्तु परम्परया प्रत्याब्दिकं पार्वणविधिना अनुष्ठीयते तत्र भ्रातृ श्राद्धेऽपि पार्वणतन्त्रं प्रतिषिद्धम् । तत्र वैश्वदेविकतन्त्रं प्रत्याब्दिकादावपि भवति । प्राक्सपिण्डीकरणात् वैश्वदेविकं पार्वणार्थेषु न भवति । पितुः सपिण्डीकरणादर्वाक् कथं दर्शादिकं कर्तव्यमिति चेत् लोप एव पितृत्वाभावात् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सपिण्डीकरणादिकं कस्मिन्नग्नौ कार्यम्? उच्यते, गृह्याग्निमत एव स्मार्तकर्माधिकारात् सर्वेषां सपिण्डीकरण-मौपासनाग्नौ कार्यम् । गृह्याग्नावेव सपिण्डीकरणं कार्यमिति केनोक्तमिति न विद्मः। उच्यते, "कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही" । इति वचनात् स्मार्तकर्म गृह्याग्नावेव कुर्यात् । तेन मातृपितृव्यतिरिक्तानामपि सपिण्डीकरणादिकं गृह्याग्नावेव कार्यमित्युक्तं भवति । वैधुर्यादिना गृह्याग्न्यभावे दूरभार्यतया असन्निधाने पाणिहोमः कार्यः। केचित् लौकि-काग्नौ कुर्वन्ति तत्र प्रमाणं गवेषणीयम् ॥

अत्र प्रसङ्गात् किञ्चिदुच्यते । औपासनाग्निसहितानां विधुराणां यतीनामौत्तपनाग्निना दाहः। ब्रह्मचारिणां कपालाग्निः। अनाहिताग्नीनामौपासनाग्निः। भार्यानेकतया गृह्याग्निबहुत्वे प्राक् संसर्गात् मृतस्य कुशाच्छादनान्ते सर्वानेकीकृत्य दहेत् तस्मात्त्वमिति । गृह्याग्निविच्छिन्नं प्रति पूर्ववत् सन्धाय दहेत् । प्राक्सन्धानात् मृतश्चेत् विच्छिन्नप्रेताधानविधिना सन्धाय औपासनहोममपि कृत्वा कुशाच्छादनान्ते सर्वानेकीकृत्य दहेत् । सर्वाधानिनां वैतानिकाग्निभिर्दहेत् । सर्वाधानादूर्ध्वं विवाहं कृतवतां वैतानिकैरौपासनेन च दाहः। आधानेन सहाधिकृतानां सर्वाधानिनः पत्नीनां जीवद्भर्तृकाणां सर्वासां वैतानिकाग्निभिर्दाहः। अर्धाधानिनां तत्पत्नीनां च त्रेताग्निभि-रौपासनेन च दाहः। सर्वाधानादूर्ध्वं विवाहं कृतवतां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पत्नीनामाधानेन सहाधिकृतानां त्रेताग्निभिर्दाहः। तासामौपासनसम्बन्धासम्बन्धाभावात् । आधानेन विना कृतानां स्वस्वौपासनाग्निभिरेव दाहः। अनाहिताग्निपत्नीनामुत्तपनीयेन दहनं भवति । दहनं नाम शरीरेऽग्निं निधानं तदेव प्रधानम् । तेन कुशाच्छादनान्तस्य चोदनात् पूर्वाकरणे सत्यपि शरीरेऽग्निसंयोजनं प्रदानम् । तथा च सति संयोजनस्य प्राधान्यात् संयोजनकालमारभ्य आहिताग्नीनामाशौचं भवति ॥

अथ प्रसङ्गात् प्रेताधानविषये किञ्चिदुच्यते । पश्चात् मृतस्य यजमानस्य पत्न्याः चोक्तप्रकारेण विहारं कल्पयित्वा वैतानिकाग्नीन् उत्पाद्य दहेत् । यदि आत्मसमारूढाग्निर्मृतः स्यात् तदा मृतस्य दक्षिणं पाणिं लौकिकाग्नौ तापयित्वा अवरोहणमन्त्रं जपित्वा तेनाग्निना दहेत् । आत्मसमारोपणकाले पत्नी यदा मृता स्यात्तदा समारोपयिता पतिः लौकिकाग्नौ स्व पाणिं सन्तप्यावरोहमन्त्रं जपेत् । यद्यरण्यां समारोप्य म्रियते तदा मृतस्य दक्षिणपाणिनाग्निं संस्पृश्य निर्मन्थ्य अवरोहणमन्त्रं जपित्वा विहारादि कल्पयित्वा दहेत् । यदि स्नातकः विवाहात्पूर्वं मृतः स्यात् तदा अन्त्यसमिदाधानाग्निना दहेत् । यदि तस्य समिदाधानाग्निर्नष्टः तदा लौकिकाग्नौ प्राजापत्यान्तपञ्चकं प्रायश्चित्तं कृत्वा तेन समिदाधानाग्निना दहेत् । विवाहाभावेन ब्रह्मचार्यविशेषात् कपालसन्तपनाग्निना वा । त्रिवर्षादि प्रमीतान् कन्याबाल-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सपिण्डीकरणादिकं कस्मिन्नग्नौ कार्यम्? उच्यते, गृह्याग्निमत एव स्मार्तकर्माधिकारात् सर्वेषां सपिण्डीकरण-मौपासनाग्नौ कार्यम् । गृह्याग्नावेव सपिण्डीकरणं कार्यमिति केनोक्तमिति न विद्मः। उच्यते, "कर्म स्मार्तं विवाहाग्नौ कुर्वीत प्रत्यहं गृही" । इति वचनात् स्मार्तकर्म गृह्याग्नावेव कुर्यात् । तेन मातृपितृव्यतिरिक्तानामपि सपिण्डीकरणादिकं गृह्याग्नावेव कार्यमित्युक्तं भवति । वैधुर्यादिना गृह्याग्न्यभावे दूरभार्यतया असन्निधाने पाणिहोमः कार्यः। केचित् लौकि-काग्नौ कुर्वन्ति तत्र प्रमाणं गवेषणीयम् ॥

अत्र प्रसङ्गात् किञ्चिदुच्यते । औपासनाग्निसहितानां विधुराणां यतीनामौत्तपनाग्निना दाहः। ब्रह्मचारिणां कपालाग्निः। अनाहिताग्नीनामौपासनाग्निः। भार्यानेकतया गृह्याग्निबहुत्वे प्राक् संसर्गात् मृतस्य कुशाच्छादनान्ते सर्वानेकीकृत्य दहेत् तस्मात्त्वमिति । गृह्याग्निविच्छिन्नं प्रति पूर्ववत् सन्धाय दहेत् । प्राक्सन्धानात् मृतश्चेत् विच्छिन्नप्रेताधानविधिना सन्धाय औपासनहोममपि कृत्वा कुशाच्छादनान्ते सर्वानेकीकृत्य दहेत् । सर्वाधानिनां वैतानिकाग्निभिर्दहेत् । सर्वाधानादूर्ध्वं विवाहं कृतवतां वैतानिकैरौपासनेन च दाहः। आधानेन सहाधिकृतानां सर्वाधानिनः पत्नीनां जीवद्भर्तृकाणां सर्वासां वैतानिकाग्निभिर्दाहः। अर्धाधानिनां तत्पत्नीनां च त्रेताग्निभि-रौपासनेन च दाहः। सर्वाधानादूर्ध्वं विवाहं कृतवतां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पत्नीनामाधानेन सहाधिकृतानां त्रेताग्निभिर्दाहः। तासामौपासनसम्बन्धासम्बन्धाभावात् । आधानेन विना कृतानां स्वस्वौपासनाग्निभिरेव दाहः। अनाहिताग्निपत्नीनामुत्तपनीयेन दहनं भवति । दहनं नाम शरीरेऽग्निं निधानं तदेव प्रधानम् । तेन कुशाच्छादनान्तस्य चोदनात् पूर्वाकरणे सत्यपि शरीरेऽग्निसंयोजनं प्रदानम् । तथा च सति संयोजनस्य प्राधान्यात् संयोजनकालमारभ्य आहिताग्नीनामाशौचं भवति ॥

अथ प्रसङ्गात् प्रेताधानविषये किञ्चिदुच्यते । पश्चात् मृतस्य यजमानस्य पत्न्याः चोक्तप्रकारेण विहारं कल्पयित्वा वैतानिकाग्नीन् उत्पाद्य दहेत् । यदि आत्मसमारूढाग्निर्मृतः स्यात् तदा मृतस्य दक्षिणं पाणिं लौकिकाग्नौ तापयित्वा अवरोहणमन्त्रं जपित्वा तेनाग्निना दहेत् । आत्मसमारोपणकाले पत्नी यदा मृता स्यात्तदा समारोपयिता पतिः लौकिकाग्नौ स्व पाणिं सन्तप्यावरोहमन्त्रं जपेत् । यद्यरण्यां समारोप्य म्रियते तदा मृतस्य दक्षिणपाणिनाग्निं संस्पृश्य निर्मन्थ्य अवरोहणमन्त्रं जपित्वा विहारादि कल्पयित्वा दहेत् । यदि स्नातकः विवाहात्पूर्वं मृतः स्यात् तदा अन्त्यसमिदाधानाग्निना दहेत् । यदि तस्य समिदाधानाग्निर्नष्टः तदा लौकिकाग्नौ प्राजापत्यान्तपञ्चकं प्रायश्चित्तं कृत्वा तेन समिदाधानाग्निना दहेत् । विवाहाभावेन ब्रह्मचार्यविशेषात् कपालसन्तपनाग्निना वा । त्रिवर्षादि प्रमीतान् कन्याबाल-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कुमारानुत्तपनाग्निना दहेत् । एतदाचार्येणानुक्तमपि सूत्रान्तर माश्रित्यास्माकमपेक्षितत्वात् अस्माभिरभिहितम्। औपासनस्य दक्षिणाग्नेश्चायन्ते योनिस्तत एवोत्पाद्य तौ कल्पयेत् ॥

इति गौतमीयापरसूत्रे द्वितीयपटलस्य षष्ठः खण्डः ॥

॥ इति द्वितीयपटलः ॥

इति महोपाध्याय
कृष्णभट्टसूनुना अनन्तयज्वनः
यवीयसा अल्लालभट्टेन विरचितं गौतमीयापरसूत्रे
पितृमेधसूत्रविवरणं सम्पूर्णम् ॥

॥ समाप्तोऽयं ग्रन्थः ॥

-----===ॐ===-----

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथ पातञ्जलनिदानसूत्रम्

॥ [घं]द्वितीये प्रपाठके षष्ठः खण्डः॥

१.तदप्यपरपक्षे प्रायणं परिजिहीर्षितं भवति। (०२.०६.०१)

इति । तदपि इत्येतौ शब्दौ मिलित्वा आनन्तर्यमाहतुः। ननु पौर्णमास इष्टिं कृत्वा दर्शमकुर्वन् कर्मान्तरं न कुर्यात् । तथा सायं होमं कृत्वा प्रातर्होममकुर्वन्नपि कर्मान्तरं नाग्नौ कुर्यादिति पूर्वमुक्तम् । अनन्तरकृष्णपक्षे मरणमपि परिहर्तव्यमित्याह । अपरपक्षे प्रायणं मरणं परिजिहीर्षितं परिहर्तुमिष्टं सर्वथा परिहर्तव्यमित्युक्तं भवति । परिहारप्रकारस्तु उत्तरत्र वक्ष्यते ।

०२.रात्रौ वा । (०२.०६.०२)

इति । वा शब्दोऽपि अर्थः। रात्रिमरणमपि परिहरेत् ।

०३.यज्ञविलोपो विसꣳस्थिते । (०२.०६.०३)

इति । यदा अपरपक्षे पूर्वपक्षस्य रात्रौ मरणं भवति तदा पक्षशेषप्रातराहुत्योः एकतया दर्शपूर्णमासाग्निहोत्राणि विसंस्थितानि असमाप्तानि तदा यज्ञस्य विलोपःस्यात् । विसंस्थिते दर्शपूर्णमासाग्निहोत्रे असमाप्ते सति इत्यर्थः।

०४.अपि च नोह तमस एव तम इयादिति । (०२.०६.०४)

इति । न केवलं यज्ञविलोप एव किन्तु दोषान्तरमप्यस्तीति वक्तुं अपि शब्दः प्रयुक्तः। आचार्येण समाप्तो यज्ञः

घं–२.पञ्चमप्रपाठके चतुर्थःखाण्डः। ३.निदानसूत्रम् पृष्ठ ३०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्यः, भिन्नशब्दः अवधारणार्थः। अपर पक्षस्य अहोरात्रयः पूर्वपक्षस्य रात्रयश्च तमस एव तमोरूपाण्येव दिनानि प्रविशेदेव। एतदुक्तं भवति- पूर्वोक्तकाले मृतस्तु असमाप्त-यज्ञपक्षः सन् तामसीं गतिमवाप्नुयादिति। ननु मरणकालस्य अनियतत्वात् केनचिदपि परिहर्तुमशक्यत्वात् च कथं यज्ञविलोपः न स्यात्? इत्यत आह-

०५.तच्चेदपरपक्षे प्रायणमाशङ्क्येत यावत्योऽपरपक्षस्याति शिष्टा रात्रयः स्युस्तासाँ सायं प्रातराहुतीः प्रतिसङ्ख्याय हुत्वा प्रत्याहृत्याऽऽमावास्येन हविषेष्ट्वा समापयेयुः। [घ]एवमयज्ञ विलोप इति। (०२.०६.०५)

